३. अगस्त्य उत्तर देतोः 'तूं मजबरोबर इतकीं वर्षेपर्यंत ब्रह्मचर्य आचरून देवोपासनेचे कष्ट केलेस, ते व्यर्थ गेले असें समजूं नको. कारण आम्हीं आपल्या ब्रह्मचर्यानें आणि सततोपासनेनें देवांस प्रसन्न करून घेतलें आहे, त्यामुळें ते आमचें संरक्षण करूं लागले आहेत, आणि पाहिजे त्या शत्रूंचा पराजय करण्याचें सामर्थ्य आमच्या आंगीं आलें आहे. शिवाय, तूं आणि मी आजपर्यंत एकमतानें व प्रेमानें वागलों, हेंच एक मोठें श्रेय, हाच एक मोठा जय आपण संपादिला. याहून आणखी काय पाहिजे ?' वृत्तासाठीं 'अभि अश्नवाव' असें म्हणावें लागतें.

४. वरील ऋचेंत ऋषीनें पहिल्या ऋचेच्या पहिल्या तीन पादांचें उत्तर दिलें. 'अप्यू नु पत्नीर्वृषणो जगम्युः' हा जो चवथा पाद त्याचें दिलें नाहीं, तें या चवथ्या ऋचेंत दिलें आहे. ऋषि स्त्रियेला वश होऊन म्हणतो, मी तुला वश झालों, मी कामानें चोहींकडून व्याप्त झालों आहें. तूं अबला आणि मी पुरुष प्रबळ, असें आहे तथापि आणि मी धीमान् व तूं प्रज्ञारहित असें म्हणतात तरी, तूं मला वश केलेंस.'

इमं नु सोममन्तितो हृत्सु पीतमुप ब्रुवे ।
यत्सीमागश्चकृमा तत्सु मृळतु पुलुकामो हि मर्त्यः ॥ ५ ॥

इमम् । नु । सोमम् । अन्तितः । हृत्ऽसु । पीतम् । उप । ब्रुवे ।
यत् । सीम् । आगः । चकृम । तत् । सु । मृळतु । पुलुऽकामः । हि । मर्त्यः ॥ ५ ॥

अगस्त्यः खनमानः खनित्रैः प्रजामपत्यं बलमिच्छमानः ।
उभौ वर्णावृषिरुग्रः पुपोष सत्या देवेष्वाशिषो जगाम ॥ ६ ॥
॥ २२ ॥ २३ ॥

अगस्त्यः । खनमानः । खनित्रैः । प्रऽजाम् । अपत्यम् । बलम् । इच्छमानः ।
उभौ । वर्णौ । ऋषिः । उग्रः । पुपोष । सत्याः । देवेषु । आऽशिषः । जगाम ॥ ६ ॥ २२ ॥ २३ ॥

---

काम ] इतो [ दिशः ] अमुतः ( =ततो दिशः ) [ अपि च ] कुतश्चित् ( =सर्वतोपि ) आजातः ( =प्रादुर्भूतोस्ति ) । लोपामुद्रा वृषणं ( =कामिनं पुरुषं मां ) नी रिणाति ( =स्ववशं गमयति ) । अधीरा ( =अधीमती ) [ सत्यपि ] धीरं ( =धीमन्तं ) श्वसन्तं ( =" महाप्राणं महाबलं " ) [ मां ] धयति ( =उपभुङ्क्ते ) ॥

इतस्त्वत्संगमनिमित्तात् तथामुतो वसन्तादिकालात् कुतश्चित्कारणादाजातः सर्वत उत्पन्नः । इति सायणः ॥

---

## भाषायाम्.

५. नु ( =इदानीं ) हृत्सु पीतम् (=अतिप्रेम्णा पीतम् ) इमं सोमम् अन्तितः उप ब्रुवे ( =समीपदेशात् प्रार्थये=तस्य समीपे गत्वा प्रार्थये ) । [ तद्यथा ] । यत् सीं ( =यद्यद् ) आगः ( =पापं ) चकृम ( =कृतवन्तः स्मस् ) तत् सु मृळतु ( =तद् अस्माकं सुष्ठु यथा तथा क्षमताम् ) । हि ( =यस्मात् कारणात् ) मर्त्यः ( =मरणधर्मा मनुष्यः) पुलुकामः (=पुरुकामः=बहुकामो ) [ भवति ] ॥

यतो मनुष्या बहुकामाः सन्ति अतः कारणात् ते स्वकामपूरणसाधने बहूनपराधान् कुर्वन्ति । तस्मात्क्षमया विना नास्ति तेभ्यो मोक्ष इत्यर्थः ॥

६. प्रजां ( =संततिम् ) अपत्यं (=पुत्रपौत्रादिकं ) बलं [ च ] इच्छमानः (=अ-

५. आतां हा जो अगदीं अंतःकरणपूर्वक प्यालेला सोम, त्याजपुढें उभा राहून मी प्रार्थितों; कीं आम्हीं जें पाप केलें आहे त्याची तो अगदीं क्षमा करो. कारण कीं मर्त्य बहुकाम होय.

६. महाबळी अगस्त्य ऋषि प्रजा, अपत्य आणि बळ यांची इच्छा करून आवतांनीं खणता झाला आणि दोन्ही वर्णांचा उत्कर्ष करिता झाला. तो देवांपासून यथार्थ आशीर्वादांप्रत पावला.

5. I now approach and pray to this Soma that is drunk in the heart. May he pardon the sin that we have committed. For a mortal has many desires.

6. The mighty sage Agastya, desiring posterity, progeny, [and] strength dug with pickaxes, and benefited both colours. He obtained unfailing blessings from the gods.

---

'अवरोध करणाऱ्या '='रुधतः.' म्हणजे रेतोवरोध करणाऱ्या, संग ज्याला घडत नाहीं अशा.

---

५. ही ऋचा अगस्त्य आपणास आणि लोपामुद्रेस अनुलक्षून म्हणतो असें समजलें तर बरें होईल. यांत सोमदेवानें पापाची क्षमा करावी असें प्रार्थिलें आहे.

'अंतःकरणपूर्वक प्यालेला '='हृत्सु पीतम्.' म्हणजे मोठ्या आवडीनें प्यालेला. कोणीं प्यालेला? अगस्त्यानें देवांस अर्पण केलेला देवांनीं जो प्याला तो असें असेल. वरच्या चार मंत्रांशीं या आणि पुढच्या मंत्रांचा संबंध वस्तुतः नसेल, आणि नाहीं असें घेऊन चाललें तर अर्थ चांगला लागेल. खरोखर संबंध नसतां हे दोन मंत्र सूक्ताला जोडिले गेले; तर अशा जोडण्याचीं उदाहरणें ऋग्वेदांत इतरत्रहि आढळतील. सू. १२६ मं. ७ आणि टीप पहा.

या सूक्ताशीं या ऋचेचा संबंध नाहीं अशा पक्षीं, कोणी ऋषि (कदाचित् अगस्त्यच) देवांस सोम अर्पण करून त्याला म्हणतो, 'आम्हीं केलेलीं पातकें आम्हांला क्षमा कर. आमच्या वांछा फार असल्यामुळें आम्हांकडून त्या पुरवण्याच्या कामीं फार पापें घडतात.'

वृत्तासाठीं 'मर्तिअः' असें म्हणावें लागतें.

६. या मंत्राचाहि संबंध या सूक्ताशीं नसेल अशा समजुतीनें लाविला तर अर्थ बरा लागेल. तो असा; यांत अगस्त्याविषयीं अन्योक्ति आहे आणि तिचें तात्पर्य असें कीं, 'अगस्त्यानें संतति

## सूक्तम् १८०.

अगस्त्य ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ॥

युवो रजांसि सुयमासो अश्वा रथो यद्वां पर्यर्णांसि दीयत् ।
हिरण्यया वां पवयः प्रुषायन्मध्वः पिबन्ता उषसः सचेथे ॥ १ ॥

युवोः । रजांसि । सुऽयमासः । अश्वाः । रथः । यत् । वाम् । परि । अर्णांसि । दीयत् ।
हिरण्ययाः । वाम् । पवयः । प्रुषायन् । मध्वः । पिबन्तौ । उषसः । सचेथे इति ॥ १ ॥

न्विष्यन् ) खनित्रैः खनमानः ( =खननसाधनैरायुधैः खनमान ) उग्रोगस्त्य ऋषिः ( =बलवान् अगस्त्यनामा ऋषिर् ) उभौ वर्णौ पुपोष ( =वृद्धिं प्रापयत् ) [ स ] देवेषु ( =देवेभ्यः ) सत्याः ( =सत्यफला ) आशिषो जगाम ( =प्राप ) ॥

खनित्रैः खनमान इत्यत्र फलस्योत्पादनसाधनैर्यज्ञस्तोत्रादिभिः खनमानः फलमभिमतमुत्पादयन्निति सायणः । उभौ वर्णावित्यत्र च वर्णौ वर्णनीयावाकारौ कामं च तपश्च पुपोषेति स एव ॥

### भाषायाम्.

१. [ हे अश्विनौ ], [ यदा ] युवोः सुयमासः अश्वाः ( =युवयोः सुष्ठु नियन्तुं शक्या अश्वा ) रजांसि [ परि दीयन् ] ( =आन्तरिक्षान् लोकान् परिगच्छन्ति )— यद् ( =यदा ) वां रथः ( =युवयो रथः ) अर्णांसि परि दीयत् ( =आन्तरिक्षप्रदेशान् परिगच्छति ) [ तदा ] वां हिरण्ययाः पवयः ( =युवयो रथसंबन्धिनः सुवर्णमयाश्चक्रवलयाः ) प्रुषायन् ( =मधु प्रुष्णन्ति=सिञ्चन्ति ) । [ तथैव ] [ युवां ] मध्वः पिबन्तौ ( =यजमानैः प्रार्पितं मधुरं सोमरसं पिबन्तौ ) [ प्रतिदिनं प्रातःकाल ] उषसः सचेथे ( =उषसो देवीः सेवेथे=ताभिः सहोदित्य ताभिः सहान्तरिक्षान् प्रदेशान् भ्रमथः ) ॥

आणि बळ यांची इच्छा करून देवोपासना केली, ती उदयास येऊन त्याला फलप्राप्ति झाली, आणि त्याला देवांपासून वर मिळाले व ते वर शेवटीं खरे झाले.'

' आवतांनीं '=' खनित्रैः.' हीं आवतें म्हणजे यज्ञ, स्तोत्र इत्यादिक जीं फलप्राप्तीचीं साधनें तीं होत, असें सायण म्हणतात तें खरें दिसतें.

## सूक्त १८०.

ऋषि–अगस्त्य. देवता–अश्वी. वृत्त–त्रिष्टुभ्.

१. [ हे अश्वी हो ], जेव्हां तुमचे सुयंत्र घोडे अन्तरिक्षाच्या सभोंताली भ्रमण करितात, आकाशप्रदेशांच्या सभोंताली जेव्हां तुमचा रथ भ्रमण करितो, तेव्हां तुमच्या सुवर्णमय धांवांपासून थपथप [ मध ] गळतो. तुम्ही मधुर सोमरस पीत पीत उषांबरोबर जातां.

## Hymn. 180.

To the *As'vins.* By *Agastya.* Metre—*Trishtubh.*

1. [When] your well-trained horses [go round] the firmament, when your chariot goes round the sky, your golden tires drop [honey]. Drinking the sweet Soma you accompany the Ushases.

---

'दोन्ही वर्णांचा उत्कर्ष करिता झाला' ='उभौ वर्णौ पुपोष.' म्हणजे काम आणि तप असें आचार्य म्हणतात, पण तसें असेल कीं नाहीं याविषयीं संशय आहे. आम्हीं भाषांतर अक्षरशः केलें आहे.

वृत्तासाठीं 'अगस्तिअः' आणि 'देवेषु आशिषो' असें म्हटलें पाहिजे.

पांचवा आणि सहावा हे मंत्र अगस्त्य ऋषीच्या शिष्यानें म्हटलेले आहेत अशा समजुतीस अनुलक्षून (१ ल्या मंत्रावरील टीप पहा) शौनक म्हणतात कीं 'इमं नु सोमम्' इत्यादि दोन ऋचा जो कोण शुद्ध होऊन जपेल, तो सर्व मनोरथांच्या सिद्धीला पावेल आणि सकळ पापांपासून मुक्त होईल (इमं नु सोममित्येते द्वे ऋचौ प्रयतो जपेत् । सर्वान्कामानवाप्नोति पापेभ्यश्च प्रमुच्यते ).

---

१. 'हे अश्वी हो, तुम्ही आपल्या रथांत बसून जेव्हां ब्रह्मांडाच्या सभोंताली प्रदक्षिणा करितां, तेव्हां तुमच्या रथाच्या चाकांपासून मध गळत असतो, आणि तुम्ही जाऊं लागलां म्हणजे तुम्हांला उपासकजन सोमरस अर्पण करितात आणि तो तुम्ही पीत पीत उषेला बरोबर घेऊन भ्रमण करीत असतां.'

'सुवर्णमय धावांपासून'='हिरण्ययः पवयः.' अश्वींचा रथ आणि त्या रथाचे अवयव सोन्याचे केले असतात याविषयीं सू. १३९ मं. ३ आणि टीप पाहा.

'मध'='मध्वः.' सू. ११७ मं. १ पाहा.

'उषांबरोबर जातां.' ज्या वेळीं उषा उगवते त्याच वेळीं अश्वींचाहि उदय होतो; म्हणून अश्वी हे उषेबरोबर उग-

**युवमत्यस्याव नक्षथो यद्विपत्मनो नर्यस्य प्रयज्योः ।**
**स्वसा यद्वां विश्वगूर्ती भराति वाजायेट्टे मधुपाविषे च ॥ २ ॥**

युवम् । अत्यस्य । अव । नक्षथः । यत् । विऽपत्मनः । नर्यस्य । प्रऽयज्योः ।

स्वसा । यत् । वाम् । विश्वगूर्ती इति विश्वऽगूर्ती । भराति । वाजाय । ईट्टे । मधुऽपौ । इषे । च ॥ २ ॥

---

## भाषायाम्.

२. यद् (=यदा) युवं (=युवां) विपत्मनः (=विशेषेण संचारिणो) नर्यस्य (=नृभ्यो हितस्य) प्रयज्योः (=प्रकर्षेण पूजनीयस्य) अत्यस्य (=अश्वस्य=सूर्यरूपस्याश्वस्य) अव (=अवस्तात्=प्राक्) नक्षथः (=उदयप्रदेशानागच्छथः) यद् (=यदा च) हे विश्वगूर्ती (=सर्वैरपि स्तुतावश्विनौ), स्वसा (=? यजमानभार्या) वां भराति (=वां पोषयति हविरन्नं भक्षणाय ददाति) [तदा] हे मधुपौ (=सोमरसस्य पातारौ), [सा] [वां] वाजाय (=बलाय) इषे च (=अन्नाय च) ईट्टे (=स्तौति=वां बलमन्नं च याचते) ॥

नक्षथः इत्यस्य निघातत्वम् ईट्टे इत्यस्य च अनिघातत्वं व्यत्ययमूलकमिति कृत्वा सहनीयम् ।

सायणस्त्वन्यथा । तदेवम् । हे अश्विनौ युवं युवां यदत्यस्यातनशीलस्य सततसंचारिणो विपत्मनो विविधगमनस्य विचित्रगमनस्य वा नर्यस्य मनुष्याणां हितस्य प्रयज्योः प्रकर्षेण पूज्यस्य ॥ एतानि कर्मणि षष्ठ्यन्तानि ॥ उक्तरूपं रथमव अवस्तात् तदुदयात्पूर्वं नक्षथः । व्याप्नुथो देवयजनं गन्तुम् । किंच यत् यदा हे विश्वगूर्ती सर्वस्तुत्यौ सर्वदोद्गूर्णौ वा वां युवयोः स्वसा स्वसृस्थानीया स्वयंसारिणी वोषा भराति । पोषते । त्वदागमनाय प्रभातं करोति । यदा हे मधुपौ मधुरस्य सोमरसस्य पातारौ युवां यजमानौ वाजाय बलाय गमनाय वा इषे प्रभूतान्नायेट्टे । स्तौति । तदा रथं प्राप्नुथ इत्यर्थः । इति ॥

---

वणारे देव होत. सू. १८३ मं. २. शिवाय 'उषर्बुध' (प्रातःकाळीं जागृत होणारे) म्हणजे पांहाटेस उगवून ब्रह्मांडासभोंताली परिभ्रमण करणारे जे देव, त्यांत अश्वींचा समावेश होत असतो, त्यामुळें अश्वींला उषांबरोबर जाणारे असें म्हटलें तें योग्यच आहे.

वृत्तासाठीं 'परि अर्णांसि' असें म्हणावें.

२. [ हे अश्वी हो ], तुम्ही जेव्हां सततसंचारी, मनुष्यहितकारी, [ आणि ] पूज्य अशा वेगवंत अश्वाच्या पूर्वी येऊन पोंहचतां, [ आणि ] जेव्हां हे सर्वस्तुत [अश्वी] हो, बहीण तुम्हांला जेऊं घालिते, तेव्हां हे सोम पिणारे [अश्वी] हो, ती तुम्हांपाशीं बळ आणि अन्न याचिते.

2. When you arrive before the swift, pervading, humane [and] honoured Horse, [and] when, o all-praised As'vins, the sister feeds you, she prays you for strength and food, o drinkers of Soma!

---

२. ही ऋचा फार कठिण आहे. आम्हीं भाषांतर अक्षरशः केलें आहे. यांत इतकें तात्पर्य दिसतें कीं, 'सूर्योदयापूर्वी अश्वींचा प्रादुर्भाव होतो, तेव्हां उपासकाची स्त्री हीच जी तुमची बहीण, ती तुम्हांला हविरन्नांनीं भजून तुम्हांपाशीं संपत्ति मागते.' असें आहे तथापि 'अत्यस्य अव नक्षथः' म्हणजे 'अश्वाच्या पूर्वी येऊन पोंहचतां' असा अर्थ होण्यास अडचण आहे. यांत सांगितलेला अश्व म्हणजे सूर्य असा अर्थ मात्र निःसंशय विवक्षित दिसतो.

वृत्तासाठीं 'अत्यस्य अव,' 'नरिअस' आणि 'वाजाय ईट्टे' असें म्हणावें लागतें.

युवं पयं उस्त्रियांयामधत्तं पक्वमामायामव पूर्व्यं गोः ।
अन्तर्यद्वनिनौ वामृतप्सू ह्वारो न शुचिर्यजते हविष्मान् ॥ ३ ॥

युवम् । पयः । उस्त्रियायाम् । अधत्तम् । पक्वम् । आमायाम् । अव ।
पूर्व्यम् । गोः ।

अन्तः । यत् । वनिनः । वाम् । ऋतप्सू इत्यृतऽप्सू । ह्वारः । न ।
शुचिः । यजते । हविष्मान् ॥ ३ ॥

---

## भाषायाम्.

३. युवं (=युवाम्) उस्त्रियायां (=गवि) पयः अधत्तं (=दुग्धम् अधारयतम्)। गोः आमायां [वक्षणायां] पूर्व्यं पक्वं [पयः] अव [अधत्तं] (=गोरपक्व ऊधनि पक्वं भक्षणयोग्यं श्रेष्ठं च दुग्धम् अधारयतम्)। यद् (=यस्मात् कारणात्) हे ऋतप्सू (=सत्यस्वरूपौ), शुचिर्हविष्मान् (=तेजस्वी यजमानो) ह्वारो न (=चोर इव) अन्तर्वनिनः (=? "वृक्षसमूहस्यान्तर्मध्ये") [जागरूकः सन्] वां यजते (=पूजयति)॥

दुर्बोधतमोत्तरार्धैषा सायणेनैवं व्याख्याता । हे अश्विनौ युवं युवामुस्त्रियायाम् । गोनामैतत् । भोगोत्साविण्यां गवि पयोऽधत्तम् । अधारयतम् । स्थापितवन्तौ । तथामायामपक्वायां पक्वं परिपक्वं भोगयोग्यं [गोः] गोसंबन्धि दुग्धं पूर्व्यं पूर्वभवं तत्रैवोत्पन्नमव अवस्तादधारयतम् । गवि क्षीरमुत्पाद्य पुनर्भोगाय पृथक्कृतवन्तावित्यर्थः । यत् यस्मात् हे ऋतप्सू सत्यस्वरूपौ यज्ञियहविर्भक्षयितारौ वा हे अश्विनौ वां वनिन उदकवत उदकोपलक्षितहविष्मतो यज्ञस्यान्तर्मध्ये हविष्मान् प्रदेयहविषा तद्वान् शुचिः शुद्धो यजमानो यजते । पूजयति युवाम् । तस्मादेवमकुरुतम् । यद्वा यदेवं यजमानः करोति तदेत्यर्थः । तत्र दृष्टान्तः । वनिनो वनसंबन्धिवृक्षसमूहस्यान्तर्मध्ये ह्वारो न । चोर इव । स यथा जागरूको वर्तते । तथा यजमानोऽपीत्यर्थः । इति ॥

३. [ हे अश्वी हो ], तुम्ही गाईच्या ठायीं दूध स्थापिते झालां, श्रेष्ठ पक्व दूध [गाई]च्या अपक्व [कासे]मध्यें स्थापिते झालां. कारण कीं हे सत्यस्वरूप [अश्वी हो], कांतिमान् यजमान चोराप्रमाणें [जागा राहून] तुम्हांला वृक्षांमध्यें भजतो.

3. You placed the milk in the cow, placed the excellent ripe milk in the raw udder of the cow. For the brilliant sacrificer sacrifices to you, o [As'vins] of truthful forms, in the trees [wakeful] like a thief.

३. 'गाईच्या ठायीं दूध इ०.' म्हणजे गाईत दूध उत्पन्न करिते झालां. आणि 'गाईच्या अपक्व कासेमध्यें पक्व दूध स्थापिते झालां' म्हणजे गाईच्या कच्च्या अथवा दुग्धरहित आणि केवळ मांसमय कासेंत पिण्यास योग्य असें दूध उत्पन्न करिते झालां. सू. ६२ मं. ९ यांतहि इंद्राविषयीं असेंच सांगितलें आहे. तेथें गाई म्हणजे मेघमाला असा जो अर्थ केला आहे तो येथेंहि घेतल्यास चालेल.

या मंत्राचा उत्तरार्ध कठिण आहे. आम्हीं अक्षरशः अर्थ केला आहे. 'चोराप्रमाणें' या उपमेचा भावार्थ असा कीं, चोराप्रमाणें जागा राहून मोठ्या पहांटेस तुम्हांला भजतो, परंतु 'अन्तर्वनिनः' याबद्दल 'अन्तर्वनिषु' असें असावें तें नाहीं; ही अडचण एके बाजूस ठेविली तरी वृक्षांमध्यें भजतो याचें तात्पर्य समजत नाहीं, कारण कीं अरण्यांत उपासना करण्याची चाल वेदांत प्रसिद्ध नाहीं.

'गाईच्या अपक्व कासेमध्यें'='गोः आमायां [ वक्षणायाम् ].' ऋ. ६. ७२. ४ यांतहि इन्द्र आणि सोम यांविषयीं असें म्हटलें आहे कीं, 'इन्द्रासोमा पक्वम् आमासु अन्तः नि गवाम् इत् दधथुः वक्षणासु'=हे इंद्र आणि सोम हो, तुम्हीं गाईच्या अपक्व कासांमध्यें पक्व दूध स्थापिते झालां.

वृत्तासाठीं 'पूर्व्यम्' बद्दल 'पूर्विअम्,' आणि 'वाम्' बद्दल 'वआम्' असें म्हणावें लागतें.

**युवं ह घर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतमेषे ।**
**तद्वां नरावश्विना पश्वइष्टी रथ्येव चक्रा प्रति यन्ति मध्वः ॥ ४॥**

युवम् । ह । घर्मम् । मधुऽमन्तम् । अत्रये । अपः । न । क्षोदः । अवृणीतम् । एषे ।
तत् । वाम् । नरौ । अश्विना । पश्वःऽइष्टिः । रथ्याऽइव । चक्रा । प्रति । यन्ति । मध्वः ॥ ४ ॥

**आ वां दानाय ववृतीय दस्रा गोरोहेण तौग्र्यो न जिव्रिः ।**
**अपः क्षोणी सचते माहिना वां जूर्णो वामक्षुरंहसो यजत्रा ५॥२३**

आ । वाम् । दानाय । ववृतीय । दस्रा । गोः । ओहेन । तौग्र्यः । न । जिव्रिः ।
अपः । क्षोणी इति । सचते । माहिना । वाम् । जूर्णः । वाम् । अक्षुः । अंहसः । यजत्रा ॥ ५ ॥ २३ ॥

---

## भाषायाम्.

४. युवं ह (=युवां किल) एषे (=? साहाय्यमिच्छते) अत्रये [ नाम ऋषये ] मधुमन्तं घर्मं (=मधुयुक्तं तप्तं पयः) अपो न क्षोदः (=अपां न क्षोदः=उदकस्य प्रवाहमिव) अवृणीतं (=पर्यहरतम्)। तत् (=तस्मात् कारणात्) हे अश्विना नरौ (=वीरावश्विनौ), पश्वइष्टिः (=पशुयागो) मध्वः (=सोमरसाश्च) रथ्या चक्रा इव (=रथसंबन्धीनि चक्राणीव) वां प्रति यन्ति (=वाम् अभिगच्छन्ति)॥

यतः कारणाद् युवामत्रिरक्षणादीनि वीरकर्माण्यकुरुतमतः कारणात् सर्वेपि जना वां पशुसाध्येन हविषा सोमरसेन च पूजयन्तीति भावः॥

अत्रेतिहासमाहुः। प्रवर्ग्येण प्रचरन्तमत्रिं राक्षसास्तप्ते घर्मेऽपातयन्। स च तप्यमानोऽश्विनौ तुष्टाव तौ च स्तुत्या हृष्टमनसावरक्षतामिति अपरेऽग्नौ क्षिप्तमपालयतामित्याहुरिति। इति सायणः॥

५. हे दस्रा (=दस्रौ=शत्रुजितौ) [ अश्विनौ ], तौग्र्यो न जिव्रिः (=जीर्णस्तुग्रस्य पुत्रो यथा) [ आवर्तयति स्म तथा ] गोरोहेन (=गोरसस्याहुत्या) वां दानाय आ ववृतीय (=युवां संप्रदानाय मम समीप आवर्तयेयम्=आगमयेयम्)। अपः माहिना क्षोणी (=? आपो बृहती क्षोणी च=अन्तरिक्षं च महती पृथिवी च) वां सचते

४. तुम्ही साहाय्याची इच्छा करणाऱ्या अत्रीसाठीं मधुर गोरसानें भरलेल्या उष्ण दुधाचा, पाण्याच्या प्रवाहाचा [ परिहार केल्या]प्रमाणें, परिहार करिते झालां. त्यामुळेंच हे वीर अश्वी हो, पशूची आहुति [ आणि ] सोमरस हे रथाच्या चाकांप्रमाणें तुम्हांप्रत धांवतात.

4. You warded off for Atri that was imploring [ help ] [ the effects of ] the heated milk mixed with sweet clarified butter, like those of a stream of water. Hence it is that animal oblation and libations of Somas run to you, o brave As'vins, like the wheels of a chariot.

५. हे पराक्रमकारी [अश्वी] हो, तुग्राच्या वृद्ध पुत्रानें तुम्हांला आपणाकडे वळविलें त्याप्रमाणें गोरसाच्या आहुतीनें तुम्हांला मजकडे वरदानासाठीं वळविण्याचें सामर्थ्य मला द्या. अंतरिक्ष आणि विस्तीर्ण पृथिवी तुमच्या सेवेंत असतात. हे पूजनीय अश्वी हो, दुःखाचें प्राचीन जाळें तुमच्या [ सेवेंत असतें ].

5. May I, o brave [As'vins], turn you hither for gifts with an oblation of milk even as the old son of Tugra [did]. Heaven and great Earth attends on you, on you [ attends ] the ancient net of distress, o worshipful ones !

---

४. 'तुम्हीं अत्रीचें संरक्षण केलें त्या दिवसापासून लोक तुम्हांला देव मानून तुम्हांला हवि अर्पण करूं लागले.'

अत्रीविषयीं जो इतिहास येथें उद्दिष्ट आहे तो अनेक रीतींनीं सांगितला आहे. येथें सायणांनीं सांगितलेला जो इतिहास तो असा कीं, अत्रि हा प्रवर्ग्य करून आराधना करीत असतांना, म्हणजे ऊन भांड्यांत ऊन दूध ओतून त्याचा पायस करून त्याच्या अर्पणानें आराधना करीत असतांना, त्याला शत्रूंनीं त्या ऊन पायसांत टाकिलें; तेव्हां त्याणें अश्वींची स्तुति केल्यावरून अश्वींनीं तेथून त्याला काढिलें. परंतु इतर ठिकाणीं ही कथा दुसऱ्या रीतीनें सांगितलेली आहे. सू. ५१ मं. ३, सू. ११२ मं. ७ आणि सू. ११९ मं. ८ पहा.

'पाण्याचा प्रवाह'='अपो न क्षोदः.' 'अप्'शब्द एकवचनींहि क्वचित् आढळतो. ऋ. ८. ४. ३ आणि त्याजवरील सायणभाष्य पहा.

**नि यद्युवेथे नियुतः सुदानू उप स्वधाभिः सृजथः पुरंधिम् ।**
**प्रेषद्वेषद्वातो न सूरिरा महे ददे सुव्रतो न वाजम् ॥ ६ ॥**

नि । यत् । युवेथे इति । निऽयुतः । सुदानू इति सुऽदानू । उप ।
स्वधाभिः । सृजथः । पुरम्ऽधिम् ।
प्रेषत् । वेषत् । वातः । न । सूरिः । आ । महे । ददे । सुऽव्रतः ।
न । वाजम् ॥ ६ ॥

---

(=युवां सेवते)। हे यजत्रा (=यजत्रौ), [युवयोर्गमनकाले] अंहसो जूर्णोक्षुः (=? दुःखस्य प्राक्तनं जालम्=उपासकानां दुःखपरिहारकं प्राक्तनकालादारभ्य प्रसिद्धं युष्माकं साधनं) वां [सचते] (=युवां सेवते=सदैव युवयोः समीपं वर्तते)॥

जूर्णो वामिति चरमः पादो दुर्बोधः। अपः क्षोणी इति पदद्वयमपि संदिग्धार्थकम्। उत्तरार्धं सायण एवं व्याचष्टे। किमाश्चर्यमहमावर्तयामीति। किंतु अपः क्षोणी। अप इत्यन्तरिक्षनाम। क्षोणीति पृथिवीनाम। द्यावापृथिव्यावपि वां युवयोर्माहिना माहात्म्येन युवयोः प्रसादेन सर्वोपकारिण्याविति ख्यातिं सर्वप्रदेशव्यापित्वं वा सचते। सेवते प्रत्येकम्। यद्वा वां माहिना यजमानो द्यावापृथिव्यौ सचते। किंच हे यजत्रा यष्टव्यौ प्रसादादयमृषिर्जूर्णो जरया जीर्णाङ्गः सन्नंहसः पापाज्जरालक्षणात्प्रमुच्याक्षुश्चिरकालव्याप्तो दीर्घजीवी भूयात्। यद्वा हे यजत्रा वां प्रसादाज्जूर्णो जीर्णो यजमानोंऽहसो दुरितस्य हन्तीरप उक्तलक्षणानि सोमरसरूपाण्युदकानि क्षोणी क्षोण्याम्। सप्तम्यर्थे प्रगृह्यम्। भूम्यां चिरकालमक्षुर्व्याप्तः सन् माहिना माहात्म्येन सचते। द्वितीयो वामित्ययमादरार्थः। इति॥

---

## भाषायाम्.

६. हे सुदानू (=शोभनधनोपेतौ), यद् (=यदा) नियुतः (=अश्वान्) नि युवेथे (=नियुञ्जाथे=रथेश्वान् योजयित्वा गच्छथस्) [तदा] स्वधाभिः (=स्वतेजोभिः=स्वप्रभावैर्) [उपासकेभ्यः] पुरंधिं (=भूयसीं धियं मेधाम्) उप सृजथः (=प्रयच्छथः)। [अतः कारणाद्] [युवयोरागमने सति] वातो न (=वायुरिव शीघ्रं यथा तथा) वां वेषत् (=अभिगच्छतु) प्रेषत् आ [=तर्पयतु च]। [एवं कृते सति स] सुव्रतो न (=सुकर्मवानिव=उपासनादिसत्कर्मकारित्वात्) वाजम् (=अन्नम्=अन्नादिसंपदं) महे (=? महत्त्वाय) ददे (=आददे=स्वीकरोति=लभते=लब्ध्वा महान् भवति)॥

युक्ताश्वं रथमारुह्य यदा युवामागच्छथस्तदा युवामुपासकेभ्यो मेधां प्रयच्छथः।

६. हे महोदार [ अश्वी ] हो, तुम्ही जेव्हां घोडे हाकून जात असतां [तेव्हां] तुम्ही आपल्या सामर्थ्यानें मोठी बुद्धि [ यजमानाला ] देत असतां. यजमानानें वाऱ्याप्रमाणें जावें आणि [ तुम्हांस ] प्रसन्न करावें. [ मग ] त्याला सदाचारी म्हणून अन्नसंपत्तीची प्राप्ति होते, आणि तो मोठा होतो.

6. When, o bounteous [As'vins ], you drive your steeds, you confer great wisdom [on the sacrificer ] through your might. Let the sacrificer run [to you] like the wind and gratify [you]. He then receives [plenty of] food like a pious man, and becomes great.

---

त्यांत 'अपा' हें एकवचनी रूप आलें आहे तें पहा.

५. तुग्राचा पुत्र सू. ११६ मं. ३ याजवरील टीप पहा.

'अन्तरिक्ष आणि विस्तीर्ण पृथिवी'= 'अपः क्षोणी माहिना.' हें कठीण आहे. 'अपः' हें 'आपः' याबद्दल आहे आणि शब्द बहुवचनीं आहे तरी ' सचते ' या क्रियापदाशीं संबंध लावणें तो अंतरिक्ष या एकवचनी अर्थाच्या अपेक्षेनें अपः हें एकवचन आहे असें समजून लावणें इतकें अवश्य आहे. 'माहिना' याविषयीं सू. १५१ मं. ९ आणि ऋ. ८. ७१.९ हा मंत्र आणि त्याजवरील सायणभाष्य पहा.

या मंत्राचा चवथा पाद फार दुर्बोध आहे. त्यांत 'अक्षु' शब्दाचा अर्थ समजण्यास साधनें नाहींत. हा शब्द पुनः आलेला नाहीं. 'अंहसः' याचा संबंध कोठें घ्यावा तेंहि नीट समजत नाहीं. दुःखाचें प्राचीन जाळें तुमच्या सेवेंत असतें असा जो आम्हीं अर्थ केला आहे त्याचें तात्पर्य असें कीं, जीं जीं दुःखें उपासकांला गांजीत असतील तीं तीं दुःखें तुम्ही जाळ्यांत जणुं धरून प्राचीन काळापासून नाहींशीं करीत आलां आहां तसेच सांप्रतहि करीत असतां.

वृत्तासाठीं 'तौग्र्यो' याबद्दल, 'तौग्गरिओ' असें म्हणावें लागतें.

---

६. 'तुम्ही घोडे जोडिलेल्या रथांत बसून जातां तेव्हां उपासकाच्या घरीं येऊन त्याला बुद्धिसंपन्न करितां. यास्तव यजमानानें वाऱ्याप्रमाणें सत्वर जाऊन तुम्हांला प्रसन्न करावें, कारण कीं तुम्ही प्रसन्न झालां म्हणजे त्याला त्याच्या यजनरूप सत्कर्माचें फळ असें जें अन्न तें प्राप्त होतें.'

वृत्तासाठीं 'प्रएषत्' आणि 'सुव्वरतो' असें म्हणावें.

**वयं चिद्धि वां जरितारः सत्या विपन्यामहे वि पणिर्हितावान् ।**
**अधा चिद्धि ष्माश्विनावनिन्द्या पाथो हि ष्मा वृषणावन्तिदेवम् ॥ ७ ॥**

वयम् । चित् । हि । वाम् । जरितारः । सत्याः । विपन्यामहे । वि । पणिः । हितऽवान् ।
अध । चित् । हि । स्म । अश्विनौ । अनिन्द्या । पाथः । हि । स्म । वृषणौ । अन्तिऽदेवम् ॥ ७ ॥

**युवां चिद्धि ष्माश्विनावनु द्यून्विरुद्रस्य प्रस्रवणस्य सातौ ।**
**अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः ॥ ८ ॥**

युवाम् । चित् । हि । स्म । अश्विनौ । अनु । द्यून् । विऽरुद्रस्य । प्रऽस्रवणस्य । सातौ ।
अगस्त्यः । नराम् । नृषु । प्रऽशस्तः । काराधुनीऽइव । चितयत् । सहस्रैः ॥ ८ ॥

---

अतःकारणाद् यजमानो युवामभिगम्य क्षिप्रं तर्पयतु । युवां हि तस्य शोभनानि कर्माणि सेवित्वा तस्मा अन्नादिसंपदं प्रयच्छथस्तं च महान्तं कुरुथ इति भावः ॥

आ इति समुच्चयदर्शकं पदम् । सायणश्चतुर्थं पादमेवं व्याचष्टे । अनन्तरं सुव्रतो न अतिप्रशस्तोष्मादिकर्मवानिव वाजमन्नं महे महत्त्वायायं यजमान आ ददे । आदत्ते स्वीकरोति । इति ॥

---

## भाषायाम्.

७. [ हे अश्विनौ ], वयं चिद्धि ( =वयमेव ) वां सत्या जरितारः ( =युवयोः परमार्थतः स्तोतार इति ) विपन्यामहे ( =स्तूयामहे=कथ्यामहे=जना अस्मानेव सत्यान् स्तोतॄन् आहुः ) । [ अपि च ] पणिः ( =लुब्धकः=अनुपासको ) हितावान् वि [ पन्यते ] ( =निहितधनवान् इति=पिहितधनवान् इति=लुब्धक इति कथ्यते ) । अधचित् हि स्म ( =अतः कारणादेव ) हे अनिन्द्या ( =अनिन्द्यौ=प्रशस्यौ ) वृषणौ ( =बलवन्तौ ) अश्विनौ, [ युवाम् ] अन्तिदेवं पाथो हि स्म ( =अन्तिदेवं नाम सत्यं स्तोतारम् अरक्षतम् ) ॥

८. हे अश्विनौ, नरां नृषु प्रशस्तः (=नृणां मध्ये ये प्रशस्ता नरस्तेषु प्रशस्तः श्रेष्ठः)

७. [हे अश्वी हो], तुमचे खरे स्तोते अशी आमचीच ख्याति गातात [आणि] अनुपासकाची कृपण अशी ख्याति गातात. म्हणूनच हे पवित्र आणि बळवान् अश्वी हो, तुम्ही अंतिदेवाला रक्षिते झालां.

७. We alone are renowned as your sincere worshippers, the unbeliever is renowned as a miser. For thus, o stainless and mighty As'vins, you protected Antideva.

८. हे अश्वी हो, साधूंतील [उत्तम] साधूंमध्यें श्रेष्ठ [असा जो] अगस्त्य [ तो ] श्रेष्ठ मेघोदकाचा प्रवाह मिळण्यासाठीं प्रतिदिनीं शंखासारिखा तुम्हांलाच हजारो नादांनीं जागृत करितो.

8. You alone, o As'vins, does Agastya the best of men among men wake from day to day for the attainment of the excellent stream, with thousands of sounds like a conch.

---

७. 'अन्तिदेव.' हें येथें एका उपासकाचें विशेषनाम आहे यांत संशय नाहीं. सायणाचार्य तसें समजत नाहींत, तथापि दुसऱ्या अर्थाचा चांगला निर्वाह दिसत नाहीं. हा शब्द दुसऱ्या ठिकाणीं आलेला नाहीं.

८. 'मेघोदकादिकाच्या प्राप्तीसाठीं अगस्त्य ऋषि तुम्हांलाच प्रतिदिनीं प्रातःकाळीं भजतो.'

'जागृत करितो' = 'चितयत्.' म्हणजे अश्वी हे 'उषर्बुध्' अथवा मोठ्या पहांटेस उठून भ्रमण करणारे आहेत त्यांस अगस्त्य अनेक स्तोत्रें म्हणून प्रातःकाळीं झोंपेंतून जणुं उठवितो. अगस्त्याचीं अनेक स्तोत्रें ऐकून अश्वी जागृत होऊन आपल्या रथांत बसून येतात असा कवीचा भावार्थ आहे.

प्र यद्वहेथे महिना रथस्य प्र स्पन्द्रा याथो मनुषो न होता ।
धत्तं सूरिभ्य उत वा स्वश्व्यं नासत्या रयिषाचः स्याम ॥ ९ ॥

प्र । यत् । वहेथे इति । महिना । रथस्य । प्र । स्पन्द्रा । याथः । मनुषः । न । होता ।
धत्तम् । सूरिऽभ्यः । उत । वा । सुऽअश्व्यम् । नासत्या । रयिऽसाचः । स्याम ॥ ९ ॥

---

अगस्त्यो विरुद्रस्य प्रस्रवणस्य सातौ (=श्रेष्ठस्य मेघोदकप्रवाहस्य लाभे निमित्ते सति) अनु द्यून् (=प्रतिदिनं) काराधुनीव (=शङ्खादिरिव) सहस्रैः (=सहस्रसंख्याकैः) [स्तोत्ररूपैर्नादैर्] युवां चिद्धि स्म (=युवामेव) चितयत् (=चेतयति=प्रबोधयति=प्रातःकाले यज्ञागमनाय आह्वयति) ॥

विरुद्रस्य विशिष्टोष्णरूपदुःखद्रावणस्य विविधरोरूयमाणद्रवणवतो वा प्रस्रवणस्य वृष्ट्युदकसंस्त्यायस्य ...... । काराधुनीव । कारा शब्दः । तस्य धूनयितोत्पादयिता शङ्खादिः स इव । इत्यादि सायणः ॥

---

## भाषायाम्.

९. यद् (=यस्मात् कारणात्) [युवां] रथस्य महिना (=रथस्य माहात्म्येन=युक्तप्रभूताश्वत्वात् महान् यो रथस्तेन) प्र वहेथे (=प्रोह्येथे=तादृशं रथमारुह्य आगच्छथः)—हे स्पन्द्रा (=स्पन्द्रौ=गमनशीलौ), [यस्मात्] मनुषो न होता (=मनुष्यस्य यजमानस्य होतेव) प्र याथः (=गच्छथः) [अतः कारणात्] सूरिभ्यः (=यजमानेभ्यः) स्वश्व्यं (=शोभनानाम् अश्वानां समूहं) धत्तं (=धारयतं=प्रयच्छतम्) उत वा (=अपि च) हे नासत्या (=हे नासत्यौ), [वयं] रयिसाचः स्याम (=धनाढ्या भवेम) ॥

यस्मात् कारणाद् बहूनश्वान् योजयित्वा युवां यजमानान् आगच्छथः अतःकारणात् तेभ्योपि बहूनश्वान् प्रयच्छतम् अस्मान् स्तोतॄंश्च धनाढ्यान् कुरुतम् इत्यभिप्रायः॥

९. ज्यापेक्षां तुम्ही आपल्या मोठ्या रथांत बसून येत असतां, —हे सत्वरगामी [अश्वी] हो, [कोणा तरी] मनुष्याच्या होत्याप्रमाणें तुम्ही येत असतां, [त्यापेक्षां] तुम्ही यजमानांला अनेक उत्तम घोडे द्या आणि हे नासत्य हो, आम्ही धनाढ्य होऊं असें करा.

9. Since you are brought in a great chariot —you come forth, quick [ As'vins ], like a man's invoker, do you therefore give plenty of good horses to the sacrificers, and may we be rich, o Nâsatyas!

---

९. 'हे अश्वी हो, एकाद्या पुरोहिताप्रमाणें तुम्ही मोठ्या रथाला उत्तम घोडे जोडून येतां, कारण कीं तुम्हांजवळ पुष्कळ उत्तम घोडे आहेत. तर आम्हांलाहि तुम्ही पुष्कळ उत्तम घोडे द्या.'

'मोठ्या रथांत' = 'महिना रथस्य.' अक्षरशः, 'रथाच्या मोठेपणानें.' म्हणजे, मोठ्या रथाच्या योगानें.

'कोणातरी मनुष्याच्या होत्याप्रमाणें' = 'मनुषो न होता.' जसा एकाद्या यजमानाचा होता रथांत बसून येतो तसा. हा सरळ अर्थ उघडच आहे. पण होता रथांत बसून येत असे कीं काय ? या प्रश्नाचें उत्तर देणें कठिण आहे.

'ज्यापेक्षां.' म्हणजे ज्यापेक्षां तुम्ही इतके घोडे आपल्या रथास जोडितां, त्यापेक्षां तुम्हांजवळ पुष्कळ घोडे असतीलच; तर त्यांतून आम्हांला द्या, असें तात्पर्य आहे.

वृत्तासाठीं 'सुअश्व्यं,' 'नासत्तिआ' आणि 'सिआम' असें म्हणावें लागतें.

तं वां रथं वयमद्या हुवेम स्तोमैरश्विना सुविताय नव्यम् ।
अरिष्टनेमिं परि द्यामियानं विद्यामेषं वृजनं जीरदानुम् १०॥२४

तम् । वाम् । रथम् । वयम् । अद्य । हुवेम । स्तोमैः । अश्विना । सुऽविताय । नव्यम् ।
अरिष्टऽनेमिम् । परि । द्याम् । इयानम् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ १० ॥ २४ ॥

---

## भाषायाम्.

१०. हे अश्विना ( =अश्विनौ ), वां ( =युवयोर् ) नव्यं ( =स्तुत्यम् ) अरिष्टनेमिम् ( =अहिंसितचक्रवलयं ) परि द्याम् इयानं ( =द्युलोकस्य परितो गच्छन्तं ) तं ( =पूर्वोक्तं ) रथं वयम् अद्य स्तोमैः ( =स्तोत्रैः ) सुविताय ( =अस्माकं कल्याणाय ) हुवेम ( =आह्वयामः ) । [ अतः कारणाद् ] इषम् ( =अन्नं ) वृजनं ( =बलं ) जीरदानुं ( =क्षिप्रधनं ) [वीरं पुत्रं च ] विद्याम ( =लभेमहि ) ॥

---

## सूक्तम् १८१.

अगस्त्य ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ॥

कदु प्रेष्ठाविषां रयीणामध्वर्यन्ता यदुन्निनीथो अपाम् ।
अयं वां यज्ञो अकृत प्रशस्तिं वसुधिती अवितारा जनानाम् ॥१॥

कत् । ऊं इति । प्रेष्ठौ । इषाम् । रयीणाम् । अध्वर्यन्ता । यत् । उत्ऽनिनीथः । अपाम् ।
अयम् । वाम् । यज्ञः । अकृत । प्रऽशस्तिम् । वसुधिती इति वसुऽधिती । अवितारा । जनानाम् ॥ १ ॥

---

## भाषायाम्.

१. [ हे अश्विनौ ], प्रेष्ठौ ( =प्रियतमौ ) अध्वर्यन्ता ( =अध्वर्यन्तौ=अध्वरं पारयितुमिच्छन्तौ ) [ युवाम् ] इषाम् ( =अन्नानां ) रयीणां (=संपदाम् ) अपां (=मेघवृष्टीनाम् ) ( =अन्नानि संपदश्च ) अपः (=मेघवृष्टीश्च ) उन्निनीथः ( =आनयथः ) यत् [ तत् ] कत् ( =कदा ) ? हे वसुधिती ( =धनानां धारयितारौ ), हे जनानाम्

१०. हे अश्वी हो, तो जो तुमचा स्तुत्य [ आणि ] घट्ट धांवा असलेला आणि द्युलोकासभोंताली भ्रमण करणारा रथ, त्याला [ आमच्या ] कल्याणासाठीं आज आम्ही स्तोत्रांनीं बोलावीत आहों. [तर] आम्हांला अन्न, बळ आणि सत्वर संपत्ति मिळवून देणारा पुत्र, यांची प्राप्ति होओ.

10. We invoke today with hymns for our welfare, o As'vins, that your praiseworthy chariot of unbroken tires, that travels around heaven. May we [ therefore ] obtain food, strength, and a son that shall quickly make us rich.

१०. 'तो' = 'तम्.' म्हणजे पूर्वीच्या ऋचेंत सांगितलेला जो तो.

---

## सूक्त १८१.

ऋषि—अगस्त्य. देवता—अश्वी. वृत्त—त्रिष्टुभ्.

१. [ हे अश्वी हो ], अत्यंत प्रिय आणि यज्ञ तडीस नेऊं इच्छिणारे असे तुम्ही अन्नें, संपत्ति [आणि] मेघवृष्टि घेऊन येत असतां तीं केव्हां ? हे संपत्तीचे निधि हो, हे जनांचे रक्षक हो, या यज्ञानें तुमचें स्तोत्र केलें आहे.

## HYMN 181.

To the *As'vins*. By *Agastya*. Metre—*Trishṭubh*.

1. When is it that you, who are most dear and desirous of completing the sacrifice, bring food, riches [ and ] the rain-waters ? This sacrifice has, o treasures of wealth, o preservers of the people, sung your praise.

१. 'हा यज्ञ करून तुमची आराधना केली आहे, तर अन्नादिक संपत्ति आणि विपुल मेघवृष्टि तुम्ही यज्ञाच्या योगानें प्रसन्न झाल्यावर देत असतां तीं आम्हांला अजून कां देत नाहीं ?'

'अन्नें' = 'इषाम्.' या मंत्रांत 'इषां, रयीणाम्' ह्या षष्ठी कर्मणि आहेत, याशिवाय दुसरी अडचण कांहीं नाहीं.

**आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।**
**मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥ २ ॥**

आ । वाम् । अश्वासः । शुचयः । पयःऽपाः । वातऽरंहसः । दिव्यासः । अत्याः ।
मनःऽजुवः । वृषणः । वीतऽपृष्ठाः । आ । इह । स्वऽराजः । अश्विना । वहन्तु ॥ २ ॥

**आ वां रथोऽवनिर्न प्रवत्वान्त्सृप्रवन्धुरः सुविताय गम्याः ।**
**वृष्णः स्थातारा मनसो जवीयानहंपूर्वो यजतो धिष्ण्या यः ॥३॥**

आ । वाम् । रथः । अवनिः । न । प्रवत्वान् । सृप्रऽवन्धुरः । सुविताय । गम्याः ।
वृष्णः । स्थातारा । मनसः । जवीयान् । अहम्ऽपूर्वः । यजतः । धिष्ण्या । यः ॥ ३ ॥

---

अवितारा (=जनानां रक्षितारौ), अयं यज्ञः (=अयमस्माकं यज्ञो) वां प्रशस्तिं (=युवयोः स्तोत्रम्) अकृत (=अकरोत्) ॥

यस्मादेवं तस्मात् हे वसुधिती वसुनो धनस्य वस्तव्यकर्माणौ तथा हे जनानामवितारौ ......युवां कदान्नानां धनानां च दातारौ भवथ इति। इति सायणः ॥

---

## भाषायाम्.

२. शुचयः (=दीप्ताः) पयस्पाः (=मेघोदकस्य पातारो) वातरंहसः (=वायुवेगा) दिव्यासः (=दिवि भवा) अत्याः (=सततसंचारिणो) मनोजुवः (=मनोजवा) वृषणः (=युवानो) वीतपृष्ठाः (=सम्यक्पोषणेन प्राप्तपृष्ठभागाः) स्वराजः (=आत्मानं राजमानाः=आत्मनोपेक्षयाऽनन्यस्वामिनः) अश्वासः (=अश्वा) वां (=युवाम्) अश्विना (=अश्विनौ) आ वहन्तु (=आनयन्तु)॥

३. अवनिर्न प्रवत्वान् (=प्रवाह इव प्रवणवान्=निम्नभूमिं प्रति गच्छन् प्रवाह इव आशुगमनवान्) सृप्रवन्धुरः (=विस्तीर्णसारथिस्थानवान्) वां रथः (=युवयो रथः) सुविताय (=कल्याणाय) आ गम्याः (=आगच्छतु)। हे स्थातारा (=स्थातारौ=रथारूढौ तथा) धिष्ण्या (=स्तवनीयौ), यो [रथो] वृष्णो मनसो

२. तेजस्वी, मेघोदक पिणारे, वाऱ्याप्रमाणें वेगवंत, दिव्य, चपळ, मनोवेगी, नित्यतरुण, भरलेल्या पाठीचे आणि आपणाला आपणच हाकणारे असे जे तुमचे घोडे, ते तुम्हां अश्वींला येथें वाहून आणोत.

३. सखल जमिनीवर वाहणाऱ्या प्रवाहाप्रमाणें लौकर धावणारा आणि विस्तीर्ण सारथिस्थान असलेला असा जो तुमचा रथ, तो [ आमच्या ] कल्याणासाठीं येथें येओ. जो [ रथ ], हे स्तवनीय [आणि] रथारूढ अश्वी हो, वेगवान् मनापेक्षांहि वेगवान्, मनस्वी आणि पूजनीय होय.

2. May your horses carry you As'vins hither, horses that are bright, drinkers of the rain-waters, possessing the speed of the wind, heavenly, lively, quick as the mind, youthful, of sleek backs, and that are controlled by their own selves.

3. May your chariot, gliding down like a stream that glides down a slope, and furnished with a wide seat for the driver, come hither for our welfare; which, o ye mounted on the chariot, is quicker than the quick mind, conscious, and, o praiseworthy ones, fit to be worshipped.

---

२. ' भरलेल्या पाठीचे ' = ' वीतपृष्ठाः.' सू. १६२. मं. ७ आणि त्याजवरील टीप पाहा.

वृत्तासाठीं ' दिवि आसो ' असें म्हणावें लागतें.

३. ' मनस्वी ' = ' अहंपूर्वः.' म्हणजे सचेतन जीवंत, ज्याला दुसऱ्यानें हाकण्याची गरज नाहीं, जो आपणाला आपणच हांकून घेणारा, म्हणजे हाकल्याशिवाय हाकल्याप्रमाणें चालणारा.

पूर्वील मंत्रांत 'स्वराजः' या शब्दाचा जो अभिप्राय तोच ' अहंपूर्वः' याचा या मंत्रांत आहे.

वृत्तासाठीं ' धिष्णिआ ' असें म्हणावें लागतें.

इ॒हेह॑ जा॒ता सम॑वावशीताम॒रे॒पसा॑ त॒न्वा॒३॒॑ नाम॑भिः॒ स्वैः ।
जि॒ष्णुर्वा॑म॒न्यः सुम॑खस्य सू॒रिर्दि॒वो अ॒न्यः सु॒भगः॑ पु॒त्र ऊ॑हे ॥४॥

इ॒ह॒ऽइ॑ह । जा॒ता । सम् । अ॒वा॒व॒शी॒ता॒म् । अ॒रे॒पसा॑ । त॒न्वा॑ । नाम॑ऽभिः । स्वैः ।
जि॒ष्णुः । वा॒म् । अ॒न्यः । सु॒ऽम॑खस्य । सू॒रिः । दि॒वः । अ॒न्यः । सु॒ऽभगः॑ । पु॒त्रः । ऊ॒हे ॥ ४ ॥

---

जवीयान् (=वेगवतो मनसोपि वेगवत्तरः) अहंपूर्वः (=मनस्वी=अहमस्मीति प्रतीतिवान्=चेतनावान्) [ तथा ] यजतः ( =यजनीयो ) [ भवति ] ॥

---

## भाषायाम्.

४. इहेह जाता ( =इहेह जातौ=इहेह मध्यमोत्तमस्थानयोर्जातौ ) [ तौ ] अरेपसा तन्वा ( =अपापेन शरीरेण ) स्वैः नामभिः ( =स्वकीयै रूपैश्च द्वारा ) सम् अवावशीतां ( =सम्यक् स्तूयेते ) । [ हे अश्विनौ ], वाम् अन्यः ( =युवयोरेकः ) सुमखस्य जिष्णुः सूरिः ( =शोभनयज्ञस्य जयशीलः प्रेरको ) [ भवति ] अन्यः दिवः सुभगः पुत्रः ( =द्युलोकस्य शोभनभाग्यः पुत्र ) ऊहे ( =" वहति कृत्स्नमेवं पृथक् जगत् " ) ॥

इत्यक्षरार्थः । अत्र सायणः । हे अश्विनौ युवां समवावशीताम् । सह सम्यग्वा पुनःपुनः स्तूयेथे कामयेथां वा यज्ञम् । पुरुषव्यत्ययः । कीदृशौ युवाम् । इहेह जाता । उभाभ्यामिहशब्दाभ्यां मध्यमोत्तमस्थाने उच्येते । तयोः संभूतौ । चन्द्रसूर्येणेति यावत् । सूर्याचन्द्रमसावित्येक इति निरुक्तम् । अरेपसा अपापौ । आथर्वणस्य गुरोः शिरश्छेदनादिना पापलेपरहिताविति भावः । आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतमित्यादिमन्त्रवर्णात् । केन हेतुनेति उच्यते । तन्वा शरीरेण शरीरसौन्दर्येण निमित्तेन स्वैर्नामभिः स्वीयैर्माहात्म्यविशिष्टैरश्विनौ नासत्यावित्यादिभिरपि । रमणीयशरीरवत्त्वान्महिमोपेतनामवत्त्वाच्च हेतोः संस्तूयेथे इत्यर्थः । यद्वा अरेपसा तन्वेति योज्यम् । उक्तप्रकारेण गुरुशिरश्छेदादप्यपापेन शीर्षेण तादृङ्महत्त्वख्यापनेनेति यावत् । किंच वां युवयोरन्य एको मध्यमस्यान्तरिक्षस्य पुत्रस्थानीयः सोमो जिष्णुर्जयशीलः सुमखस्य शोभनयज्ञस्य सूरिः प्रेरयिता सन् ऊहे । वहति विश्वं जगद्धारयति । चन्द्रात्मनस्तस्योदये सति ह्योषधिवनस्पत्यादयो वर्धन्ते । अन्योऽपर उत्तमस्थानो दिवो द्युलोकस्य पुत्रः पुत्रस्थानीय आदित्यः सुभगः शोभनरश्मिरूपधन

४. येथें आणि तेथें उत्पन्न झालेले [हे] दोघेजण आपल्या पवित्र शरीराच्या योगेंकरून [आणि] आपल्या विभूतींच्या योगेंकरून स्तविले जातात.—तुम्हांपैकीं एकजण सुमखाचा नायक [ होय ] [ आणि ] दुसरा द्युलोकाचा भाग्यशाली पुत्र होय.

4. Born here and here the two [ As'vins ] owing to their spotless bodies and their own forms are praised.—One of you [ passes as ] the director of the good sacrifice, the other passes as the glorious son of heaven.

---

४. येथें अश्वी म्हणजे चंद्र आणि सूर्य हे दोघे होत असें समजून ऋषि बोलत आहे. अश्वी म्हणजे चंद्र आणि सूर्य होत अशी एक समजूत प्राचीन काळापासून आहेच. ती सायणभाष्य उतरून घेतलें आहे त्यांत दिली आहे. परंतु 'एकजण सुमखाचा नायक' म्हणजे चंद्र हा यज्ञाचा संपूर्तिकर्ता असें सायण म्हणतात, तें मात्र बरोबर आहे कीं नाहीं याविषयीं विशेष प्रमाणें पाहिजेत. 'दिवो अन्यः सुभगः पुत्रः' असें आहे, त्यावरून सूर्य घेणें योग्य दिसतें खरें. परंतु चंद्र याला वेदोत्तर काळीं यज्ञपति मानूं लागले तसाच वेदकाळीं मानीत कीं नाहीं याविषयीं संशय आहे.

या मंत्रांत प्रथम तृतीय पुरुषीं निर्देश असून नंतर द्वितीय पुरुषीं निर्देश आहे. हा प्रयोग छांदस होय.

**प्र वां निचेरुः ककुहो वशाँ अनु पिशङ्गरूपः सदनानि गम्याः ।**
**हरी अन्यस्य पीपयन्त वाजैर्मथ्रा रजांस्यश्विना वि घोषैः ॥**
॥ ५ ॥ २५ ॥

प्र । वाम् । निऽचेरुः । ककुहः । वशान् । अनु । पिशङ्गऽरूपः । सदनानि । गम्याः ।
हरी इति । अन्यस्य । पीपयन्त । वाजैः । मथ्रा । रजांसि । अश्विना । वि । घोषैः ॥ ५ ॥ २५ ॥

**प्र वां शरद्वान्वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।**
**एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः ॥ ६ ॥**

प्र । वाम् । शरत्ऽवान् । वृषभः । न । निष्षाट् । पूर्वीः । इषः । चरति । मध्वः । इष्णन् ।
एवैः । अन्यस्य । पीपयन्त । वाजैः । वेषन्तीः । ऊर्ध्वाः । नद्यः । नः । आ । अगुः ॥ ६ ॥

---

ऊहे । वहति । कृत्स्नमेवं पृथक् जगन्निर्वाहकौ महानुभावौ युवां सह स्तूयेथे । अत्र निरुक्तम् । इहेह जातौ संस्तूयेथे पापेनालिप्यमानया तन्वा नामभिश्च स्वैर्जिष्णुर्वामन्यः सुमहतो बलस्येरयिता मध्यमो दिवोऽन्यः सुभगः पुत्र ऊह्यत आदित्यः । नि० १२. ३. । इति ॥

---

## भाषायाम्.

५. वां (=युवयोर्) निचेरुः (=नितरां चरन्) ककुहः (=उच्छ्रितः) पिशङ्गरूपः (=सुवर्णकान्तियुक्तो) [ रथो ] वशान् अनु (=कामाननुगम्य=अनुकामं=यथेच्छं) सदनानि प्र गम्याः (=उपासकानां गृहाणि प्रति प्रकर्षेण गच्छतु) । हे अश्विना (=अश्विनौ), रजांसि (=लोकाः=येषु लोकेषु मध्ये गमनं भवति तत्रत्या जना) वाजैर्घोषैश् [ च ] (=हविरन्नैः स्तोत्रैश्च) अन्यस्य मथ्रा हरी (=युवयोर्मध्य एकस्य मथनशीलावश्वौ) वि पीपयन्त (=विशेषेणाप्याययन्तु) ॥

यदाश्विनो रथोन्तरिक्षादिलोकेषु चरति तदा ताभ्यां तत्रस्था जना हविरन्नानि प्राप्य तौ स्तुवन्तीत्यर्थः ॥

६. [ हे अश्विनौ ], वां (=युवयोः) शरद्वान् (=शरज्जातधान्ययुक्तो) वृषभो

५. तुमचा भरधांव जाणारा सुवर्णरूप उंच [ रथ ] [ उपासकांच्या ] गृहीं यथेच्छ येओ. हे अश्वी हो, लोक [ तुम्हांतून ] एकाचे गरगर फिरणारे पिवळे घोडे हविरन्नांनीं आणि स्तोत्रांनीं पुष्ट करोत.

६. हे अश्वी हो, तुमचा समृद्ध [ आणि ] वृषभाप्रमाणें प्रतापी [ रथ ] अनेक मधुर अन्नें लोटीत लोटीत येत असतो. [तुम्हांतून] एकाच्या वेगवान् अश्वांनीं उंच नद्या पुष्ट होतात [ आणि ] पसरत पसरत आम्हांप्रत येत असतात.

5. May your down-gliding, exalted, gold-hued [ chariot ] come to [ worshippers'] houses according to its pleasure. May the worlds, with oblations and praises, fatten the whirling steeds of one [of you], o As'vins !

6. Your [chariot] filled with the harvest, [ and ] mighty like Indra comes forth, bestowing numerous nourishments of sweetness. Through the swift horses of one of you are enriched [ and ] roll unto us the high and far-spreading rivers.

---

५. भावार्थः 'तुमचा रथ अंतरिक्षादिक लोकांमधून जाऊं लागला म्हणजे तेथील लोक तुम्हांला हविरन्नें आणि स्तोत्रें अर्पण करितात.'

'[ तुम्हांतून ] एकाचे' = 'अन्यस.' म्हणजे सूर्याचे असें विवक्षित दिसतें.

'गरगर फिरणारे' = 'मथ्रा.' येथें 'मथ्रा' आणि 'मथ्ना' असे वैदिकांत पाठ आढळतात. आणि ऋग्वेदांत पाठांतराचें हें एकच स्थळ आहे अशी समजूत आहे. 'मथ्ना' हा शब्द अथवा हें रूप ऋग्वेदांत पुनः आलेलें नाहीं. 'मथ्रा' हें ऋ. ८. सू. ४६ मं. २३ यांत आलें आहे, आणि तें तेथेंहि अश्वांचेंच विशेषण आहे. यावरून प्रस्तुत स्थळीं 'मथ्रा' हाच पाठ खरा आहे असें ह्मणून चालणें योग्य दिसतें.

सायणाचार्य पूर्वार्धांत सांगितलेला जो रथ तो उभय अश्वींचा नसून उभयतांतून एकाचा, म्हणजे चंद्राचा असें म्हणतात.

६. 'अश्वी येतात तेव्हां सर्व प्रकारचीं धान्यें आपणाबरोबर भरून आणीत असतात. आणि अश्वीपैकीं एकाच्या (= सूर्याच्या ?) अश्वांच्या योगेंकरून (= किरणांच्या योगेंकरून ?) समृद्धिदायक उदक नद्या भरून विस्तीर्ण हो-

अर्सर्जि वां स्थविरा वेधसा गीर्बाह्ले अश्विना त्रेधा क्षरन्ती ।
उपस्तुतावक्तं नाधमानं यामन्नयामञ्छृणुतं हवं मे ॥ ७ ॥

असर्जि । वाम् । स्थविरा । वेधसा । गीः । बाह्ले । अश्विना । त्रेधा । क्षरन्ती ।
उपऽस्तुतौ । अवतम् । नाधमानम् । यामन् । अयामन् । शृणुतम् । हवम् । मे ॥ ७ ॥

उत स्या वां रुशतो वप्ससो गीस्त्रिबर्हिषि सदसि पिन्वते नॄन् ।
वृषा वां मेघो वृषणा पीपाय गोर्न सेके मनुषो दशस्यन् ॥ ८ ॥

उत । स्या । वाम् । रुशतः । वप्ससः । गीः । त्रिऽबर्हिषि । सदसि । पिन्वते । नॄन् ।
वृषा । वाम् । मेघः । वृषणा । पीपाय । गोः । न । सेके । मनुषः । दशस्यन् ॥ ८ ॥

---

न निष्षाट् ( =वृषभ इव शत्रूणां निःसारयिता=इन्द्रसदृशः शत्रुनाशको ) [ रथो ] मध्वः पूर्वीः इषः इष्णन् ( =माधुर्यस्य बहून्यन्नानि=मधुराणि बहूनि अन्नानि प्रेरयन्=प्रयच्छन् ) प्र चरति ( =प्रकर्षेण गच्छति=वेगवान्सन्नागच्छति ) । अन्यस्य ( =युवयोर्मध्य एकस्य ) एवैर्वाजिः ( =वेगवद्भिरश्वैः ) ऊर्ध्वा नद्यः ( =उच्छ्रिता नद्यः ) पीपयन्त ( =पुष्टा भवन्ति ) [ अपि च ] वेषन्तीः ( =वेषन्त्यः=व्यापयन्त्यः सत्यो ) नः (=अस्मान्प्रति ) आ अगुः ( =आगच्छन्ति ) ॥

---

## भावार्थम्.

७. हे वेधसा अश्विना ( =मेधाविनावश्विनौ ), त्रेधा क्षरन्ती ( =त्रिभिः प्रकारैर्वहन्ती ) स्थविरा ( =सनातना ) वां गीः ( =स्तुतिरूपा युवयोर्वाक्=युवयोः स्तुतिर् ) बाह्ले असर्जि ( =? बाढं सृज्यते=उच्चैरुच्चारितास्ति ) [ मया ] । उपस्तुतौ ( =उपेत्य स्तुतौ ) [ सन्तौ युवां ] नाधमानं ( =युवयोरनुग्रहं याचमानं ) [ माम् ] अवतं (=तर्पयतम् ) । यामन् अयामन् (=गमने चागमने च ) मे हवं शृणुतं (=मया कृतमाह्वानं शृणुतम् ) ॥

८. उत ( =अपि च ) वां रुशतो वप्ससः ( =युवयोर्दीप्तस्य स्वरूपस्य ) स्या गीः ( =सा जनप्रसिद्धा स्तुतिः ) नॄन् ( =उपासकजनान् ) त्रिबर्हिषि सदसि ( =त्रिधा-

७. हे मेधावी अश्वी हो, तुमची तीन प्रकारांनीं वाहणारी सनातन स्तुति मोठ्यानें सोडिली आहे. तुमची स्तुति केली आहे, तर तुम्ही [ मज ] प्रसादयाचकाचा मनोरथ पूर्ण करा. तुमचें गमन होत असतें तेव्हां आणि होत नसतें तेव्हां माझी हाक ऐका.

८. आणि तुमच्या कांतिमान् स्वरूपाची ती प्रसिद्ध स्तुति तीन ठिकाणीं जेथें दर्भ आंथरले आहेत अशा घरीं भजकांला समृद्ध करिते. हे वीर्यवंत अश्वी हो, तुमचा वीर्यवान् मेघ, गोरसाच्या वृष्टीप्रमाणें मनोरथ पूर्ण करणारा होत्साता मनुष्यांला समृद्ध करितो.

7. Your ancient praise streaming in three ways is loudly sent forth, o wise As'vins! Worshipped with praises gratify you him who implores [your blessing]. Hear you my invocation when you are coursing and when you are not coursing.

8. And that praise of your brilliant form nourishes the worshippers in the house where the kus'a-grass is thrice spread. Your puissant cloud, o puissant As'vins, liberally nourisheth men as by a pouring of milk.

तात आणि आम्हांपाशीं येतात.'

'वृषभाप्रमाणें' = 'वृषभो न.' म्हणजे इंद्राप्रमाणें. वृषभ म्हणजे इंद्र असा अर्थ या ठिकाणीं सायणांनीं केला आहे. दुसरा अधिक समर्पक अर्थ काढणें कठिण आहे.

७. 'तीन प्रकारांनीं वाहणारी' = 'त्रेधा क्षरन्ती.' तीन तोंडांनीं वाहणारी नदी जशी, तशी. अश्वींचें सर्वच त्रिगुण अथवा त्रिप्रकार आहे. (सू. ३४ मं. २ पहा). इतक्यावरूनच 'तीन प्रकारांनीं' असें येथें म्हटलें आहे.

'सनातन स्तुति' = 'स्थविरा गीः.' म्हणजे पुरातन काळापासून ऋषिजन जशा प्रकारची करीत आले आहेत तशी.

'गमन' = 'यामन्.' म्हणजे अंतरिक्षादिक लोकांमधून अश्वी जात असतात तेव्हां.

वृत्तासाठीं 'त्रेधा' बद्दल 'त्रयधा' असें म्हटलें पाहिजे.

८. 'कांतिमान् स्वरूपाची' = 'रुशतो वप्ससः.' 'वप्ससः' याच्या अर्थाविषयीं संशय आहे. तो शब्द पुनः आलेला नाहीं. भाषान्तर सायणानुसार आहे.

'ती प्रसिद्ध स्तुति' = 'स्या गीः.'

युवां पूषेवाश्विना पुरंधिरग्निमुषां न जरते हविष्मान् ।
हुवे यद्वां वरिवस्या गृणानो विद्यामेषं वृजनं जीरदानुम् ९॥२६॥

युवाम् । पूषाऽइव । अश्विना । पुरम्ऽधिः । अग्निम् । उषाम् । न । जरते । हविष्मान् ।
हुवे । यत् । वाम् । वरिवस्या । गृणानः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ९ ॥ २६ ॥

---

स्तीर्णबर्हिषि यज्ञगृहे ) पिन्वते ( =आप्याययति ) [ उचितप्रदानादिना ] । हे वृषणा ( =सेचनसमर्थौ=वीर्यवन्तौ ), वां ( =युवयोर् ) वृषा मेघः ( =सेचनसमर्थो जलदो ) दशस्यन् ( =अभिमतफलं प्रयच्छन् ) गोर्न सेके ( =गोरसस्य सेचने सति यथा तथा=पयसो वर्षणेनेव ) मनुषः पीपाय (=मनुष्यान् आप्याययति=पोषयति ) ॥

---

## भाषायाम्.

९. हे अश्विना ( =अश्विनौ ), पुरंधिः पूषेव ( =बहुधीमान् पूषा नाम देव इव ) हविष्मान् ( =हविर्युक्तो यजमानः ) अग्निम् उषां न (=अग्निम् उषसं च यथा तथा ) वां ( =युवामपि ) जरते ( =स्तौति ) । गृणानः ( =स्तुवन्=स्तोता ) यद् (=यस्मात्कारणाद् ) वरिवस्या वां हुवे ( =पूजया सह युवामाह्वयति ) [ अतः कारणाद् ] इषम् ( =अन्नं ) वृजनं ( =बलं ) जीरदानुं ( =क्षिप्रदानं ) [ वीरं=पुत्रं च ] विद्याम ( =लभेमहि ) ॥

---

म्हणजे तुमची जी स्तुति लोक गातात ती.

‘ तुमचा मेघ ’ = ‘ वां मेघः.’ म्हणजे ज्याजकडून तुम्हीं उपासकांसाठीं पृथिवीवर वृष्टि करवितां तो.

९. हे अश्वी हो, मेधावी पूषा जसा तसा हविर्युक्त यजमान अग्नीला आणि उषेला स्तवून तुम्हांला स्तवीत आहे. स्तोता ज्यापेक्षां तुम्हांला भक्तीनें स्तवीत आहे त्यापेक्षां आम्हांला अन्न, बळ, [आणि] लवकर संपत्ति मिळवून देणारा पुत्र, यांची प्राप्ति होओ.

9. Like wise Pûshâ the worshipper with oblation in his hand is praising you, o As'vins, like Agni and Ushâ. In-as-much as the poet is invoking you with devotion, may we obtain food, strength, and a son that shall quickly make us rich.

---

९. ' अग्नीला आणि उषेला स्तवून लागलेंच मीं तुमचेंहि स्तवन करीत आहें, आणि यजमान अग्नीला आणि उषेला हवि अर्पण करून तुम्हांलाहि अर्पण करीत आहे त्यापेक्षां आम्हांला अन्नादिकांची प्राप्ति होओ' असें तात्पर्य.

या ऋचेंत पूषा देवाची उपमा दिली आहे ती मात्र किंचित् दुर्बोध आहे. पूषा देव पोषण करितो इत्यादिक जे त्याचे गुण, त्याविषयीं सू. १४ मं. ३ याजवरील टीप पाहा.

## सूक्तम् १८२.

अगस्त्य ऋषिः । अश्विनौ देवता । जगती छन्दः ॥

**अभूदिदं वयुनमो षु भूषता रथो वृषण्वान्मदता मनीषिणः ।**
**धियंजिन्वा धिष्ण्या विश्पलावसू दिवो नपाता सुकृते शुचिव्रता १**

अभूत् । इदम् । वयुनम् । ओ इति । सु । भूषत । रथः । वृषण्ऽवान् । मदत । मनीषिणः ।
धियम्ऽजिन्वा । धिष्ण्या । विश्पलावसू इति । दिवः । नपाता । सुऽकृते । शुचिऽव्रता ॥ १ ॥

**इन्द्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा ।**
**पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसमुप याथो अश्विना २**

इन्द्रऽतमा । हि । धिष्ण्या । मरुत्ऽतमा । दस्रा । दंसिष्ठा । रथ्या । रथिऽतमा ।
पूर्णम् । रथम् । वहेथे इति । मध्वः । आऽचितम् । तेन । दाश्वांसम् । उप । याथः । अश्विना ॥ २ ॥

---

### भाषायाम्.

१. [ हे ऋत्विजः ], इदं वयुनम् अभूत् ( =इदं प्रज्ञानम् अभवत्=प्रज्ञापकम् अश्विसंबन्धि तेजः प्रादुर्भूतमस्ति) । ओ षु भूषत (=सुष्ठु आभिमुख्येन भवत=क्षिप्रं तस्य रथस्याभिमुखं गच्छत)। [ अयं ] वृषण्वान् रथः ( =अन्तरुपविष्टवीर्यवदश्वी तयो रथ आगतोस्ति ) । हे मनीषिणः ( =मेधाविन ऋत्विजः ), मदत ( =तौ मादयत=तावश्विनौ हर्षयत ) । धियंजिन्वा ( =कर्मणां प्रीणयितारौ ) धिष्ण्या ( =स्तुत्यौ ) विश्पलावसू ( =विश्पलावन्तौ=विश्पलातारकौ ) दिवो नपाता ( =द्युदेवस्य पुत्रौ ) सुकृते शुचिव्रता ( =सुकृते शुचिव्रतौ=सुकर्मणे सुकर्माणौ ) [ अश्विनौ मादयत ] ॥

२. [ हे अश्विनौ ], युवाम् इन्द्रतमा ( =इन्द्रतमौ=इन्द्रत्वयुक्ततमौ=इन्द्रसदृशतमौ ) धिष्ण्या ( =धिष्ण्यौ=स्तुत्यर्हौ ) मरुत्तमा ( =मरुत्त्वयुक्ततमौ ) दस्रा ( =दस्रौ=पराक्रमवन्तौ ) दंसिष्ठा ( =अतिशयपराक्रमयुक्तौ ) रथ्या ( =रथ्यौ=रथवन्तौ ) रथितमा (=रथितमौ=रथिषु मध्ये श्रेष्ठौ ) [ स्थो ] हि । [ युवां ] मध्वः

## सूक्त १८२.

ऋषि–अगस्त्य. देवता–अश्वी देव. वृत्त–जगती.

१. हा प्रकाश पडत आहे. या, हा रथ अश्वी-वीरांला घेऊन आला पहा. हे मेधावी भक्तजन हो, त्यांला तुम्ही भजा. सत्कर्मांपासून आनंद पावणारे, स्तुत्य, विश्पलेचें संरक्षण करणारे, द्यूचे पुत्र आणि पुण्यवंताचें कल्याण करणारे [ असे जे अश्वी, त्यांला भजा ].

२. तुम्ही अगदी इंद्रासारिखे, तुम्ही स्तुत्य, अगदी मरुतांसारिखे, तुम्ही पराक्रमी, अत्यंत पराक्रमी, रथी, आणि उत्तम रथी [आहां]. तुम्ही मधानें भरून लादलेल्या रथांत बसून जात असतां. त्या रथाच्या योगानें हे अश्वी हो, तुम्ही उपासकांकडे या.

## HYMN 182.

To the *As'vins.* By *Agastya.* Metre—*Jagatî.*

1. This light has broken forth. Come forward. Here is the chariot with the heroes in it. Gratify them, o wise worshippers! [Gratify the As'vins, who are] delighted with pious work, praise-worthy friends of Vis'palâ, the sons of Dyaus and beneficent to the performer of good deeds.

2. You are most like Indra, worthy of praise, most like the Maruts, overpowering, most overpowering charioteers, best charioteers. You drive a chariot fully laden with honey. With that [chariot] come you, o As'vins, to the sacrificer.

---

१. मोठ्या पहांटेस अश्वींचा रथ येत आहे असें पाहून ऋषि बोलत आहे. ‘ हे गडे हो, हा पहा अश्वींचा रथ येत आहे, तर अश्वींला तुम्ही हवि इत्यादिक देऊन हर्षवा.’

‘अश्वी-वीरांला घेऊन’= ‘ वृषण्वान्.’ ह्मणजे ज्यांत अश्वी बसले आहेत असा. सू. १०० मं. १६ पहा.

‘ विश्पलेचें संरक्षण करणारे ’=‘ विश्पलावसू.’ अक्षरशः अर्थ विश्पला ज्यांची आहे ते. विश्पलेविषयीं सू. ११२ मं. १० आणि त्याजवरील टीप पहा.

‘ द्यूचे पुत्र ’ = ‘ दिवो नपाता.’ यावरून अश्वी म्हणजे सूर्यचंद्रात्मक होत असें जें यास्कादिकांचें म्हणणें आहे, तें संभवतें. सूर्याला द्यूचा पुत्र असें म्हटल्याबद्दल ऋ. १०. ३७. १ पहा.

२. अश्वी आपल्या रथांत मध भरून

**किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते ।**
**अति क्रमिष्टं जुरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे ॥ ३॥**

किम् । अत्र । दस्रा । कृणुथः । किम् । आसाथे इति । जनः । यः । कः । चित् । अहविः । महीयते ।
अति । क्रमिष्टम् । जुरतम् । पणेः । असुम् । ज्योतिः । विप्राय । कृणुतम् । वचस्यवे ॥ ३ ॥

**जम्भयतमभितो रायतः शुनो हतं मृधो विदथुस्तान्यश्विना ।**
**वाचंवाचं जरितू रत्निनीं कृतमुभा शंसं नासत्यावतं मम ॥ ४ ॥**

जम्भयतम् । अभितः । रायतः । शुनः । हतम् । मृधः । विदथुः । तानि । अश्विना ।
वाचम्ऽवाचम् । जरितुः । रत्निनीम् । कृतम् । उभा । शंसम् । नासत्या । अवतम् । मम ॥ ४ ॥

---

पूर्णम् आचितं ( =मधुना पूर्णं यथा तथा आपूरितं ) रथं वहेथे ( =नयथः )। तेन [ रथेन ] हे अश्विना ( =अश्विनौ ), दाश्वांसम् उप याथः ( =हविर्ददतम् उपासकं प्रति आगच्छतम् ) ॥

---

## भाषायाम्.

३. हे दस्रा ( =दस्रौ=शत्रूणाम् उपक्षपयितारौ=शत्रुजितौ ), यः कश्चित् जनः ( =यः कोपि जनः ) अहविर्महीयते ( =हवीरहितः सन्=हविरप्रयच्छन्नपि आत्मानं बहुमन्यते ) अत्र ( =तत्र=तस्य जनस्य गृहे ) किं कृणुथः ( =किं कुरुथः ) किम् आसाथे ( =तत्र किमर्थं तिष्ठथः ) ? [ तम् ] अति क्रमिष्टं ( =तम् अतिक्रम्य आगच्छतम् )। पणेरसुं जुरतम् ( =अदातुस्तस्य जीवं नाशयतम् )। वचस्यवे विप्राय (=युवयोरर्थं स्तोत्रं कर्तुमिच्छते स्तोत्रे ) [ मह्यं ] ज्योतिः कृणुतं ( =प्रकाशं कुरुतम् ) ॥

४. [ हे अश्विनौ ], रायतः शुनः ( =शब्दयतः श्वसदृशान् ) अभितः ( =आसमन्तात् ) जम्भयतं ( =नाशयतम् )। मृधो हतं ( =शत्रून् मारयतम् )। हे अश्विना ( =अश्विनौ ), तानि विदथुः ( =तानि शत्रुहननादीनि युवां जानीथः )। जरितुर्वाचंवाचं ( =स्तोतुस्तां तां स्तुतिं ) रत्निनीं कृतं ( =प्राप्तरत्नां कुरुतम् )। हे ना-

३. हे पराक्रमी अश्वी हो, जो जन हवि न देतां आपणाला मोठा मानितो त्याच्या घरीं तुम्हीं काय करितां, तेथें कां राहातां ? त्याला टाकून या. त्या कृपणाचा जीव हरण करा. स्तोत्र करूं इच्छिणाऱ्या [ मज ] स्तोत्याला प्रकाश प्राप्त करून द्या.

३. What do you do, why do you tarry, o mighty As′vins, with that man who, void of oblation, thinks himself great? Pass by him, take the miser's life. Show the light to the poet fond of your praises.

४. भोंकणाऱ्या कुत्र्यांला आसमंतात् नाहींसे करा. शत्रूंला मारून टाका. हे अश्वी हो, तीं सर्व तुम्ही जाणतां. स्तोत्याच्या प्रत्येक स्तवनाला रत्नसंपन्न करा. हे नासत्य हो, तुम्ही दोघेहि माझें स्तोत्र सफळ करा.

4. Destroy everywhere the barking dogs. Slay the enemies. You know [ all ] those things, o As′-vins! Reward every praise by the poet with excellent wealth. Gratify you both my desire, o Nâsatyas!

घेऊन येतात याविषयीं सू. ३४ मं. ३ आणि सू.२२ मं.३ याजवरील टीप पहा.

'रथी' = 'रथ्या.' म्हणजे युद्धांत रथ ज्यांला उत्तम हाकितां येतो ते. अर्थात् शत्रूचा पराजय करणारे, उत्तम वीर.

३. हवि न देणाऱ्या श्रीमंताच्या घरीं न जातां व तेथें न राहतां आपल्या घरीं येण्याविषयीं ऋषि अश्वींला प्रार्थीत आहे.

४. 'कुत्र्यांला.' म्हणजे निंदा करणाऱ्यांला.

'तीं' = 'तानि.' म्हणजे शत्रूंला मारणें इत्यादि जीं कामें तीं.

युवमेतं चक्रथुः सिन्धुषु प्लवमात्मन्वन्तं पक्षिणं तौग्र्याय कम् ।
येन देवत्रा मनसा निरूहथुः सुपप्तनी पेतथुः क्षोदसो महः ॥
॥ ५ ॥ २७ ॥

युवम् । एतम् । चक्रथुः । सिन्धुषु । प्लवम् । आत्मन्ऽवन्तम् । पक्षिणम् । तौग्र्याय । कम् ।

येन । देवऽत्रा । मनसा । निःऽऊहथुः । सुऽपप्तनि । पेतथुः । क्षोदसः । महः ॥ ५ ॥ २७ ॥

अवविद्धं तौग्र्यमप्स्वं१न्तरनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ॥ ६ ॥

अवऽविद्धम् । तौग्र्यम् । अप्ऽसु । अन्तः । अनारम्भणे । तमसि । प्रऽविद्धम् ।

चतस्रः । नावः । जठलस्य । जुष्टाः । उत् । अश्विऽभ्याम् । इषिताः । पारयन्ति ॥ ६ ॥

---

सत्या ( =नासत्यौ ), उभा ( =उभौ युवां ) मम शंसम् अवतं ( =मम स्तोत्रं तर्पयतं=प्राप्तफलं कुरुतम् ) ॥

---

## भाषायाम्.

५. [ हे अश्विनौ ], युवं ( =युवां ) सिन्धुषु ( =समुद्रसंबन्धिनीष्वप्सु ) तौग्र्याय ( =तुग्रपुत्राय भुज्यवे नाम राज्ञे) एतं ( =तं प्रसिद्धम् ) आत्मन्वन्तं ( =सजीवं ) पक्षिणं ( =पक्षोपेतं ) प्लवं ( =नावं ) चक्रथुः ( =कृतवन्तौ ) । येन [ प्लवेन ] सुपप्तनी ( =सुपतनौ ) [ युवां ] मनसा ( =अनुग्रहात्मिकया बुद्ध्या ) महसः क्षोदसः ( =महतः सागरात् ) [ तं तौग्र्यं ] देवत्रा निरूहथुः ( =देवेषु नीतवन्तौ ) ॥

६. जठलस्य जुष्टाः ( =जठरसदृशस्य समुद्रस्य प्रिया ) अश्विभ्याम् इषिताः ( =अश्विभ्यां प्रेरिताश् ) चतस्रो नावः अप्सु अन्तः अवविद्धम् ( =अन्तर्जलं शत्रुभिः पातितम् ) अनारम्भणे तमसि प्रविद्धं ( =निरालम्ब उदकरूपेन्धतमसि प्रकर्षेण ताडितं ) तौग्र्यं ( =भुज्युम् ) उत् पारयन्ति ( =उत्तारयन्ति ) ॥

५. [ हे अश्वी हो ], तुम्ही तुग्रपुत्रासाठीं महासागरांत ती प्रख्यात सजीव [ आणि ] पंखांनीं उडणारी नाव उत्पन्न करिते झालां. आणि उत्तम उड्डाण करणारे असे तुम्ही त्या नावेच्या योगानें प्रेमेंकरून [ त्याला ] महासमुद्रांतून उडून देवलोकीं घेऊन गेलां.

5. You made for the son of Tugra in the oceanic waters that living [and] winged ship; wherewith you benevolently flew with [him] to the gods from the great wave, you who can fly well.

६. उदकांमध्यें फेकलेला, आधाररहित, अंधारांत आपटलेला जो तुग्राचा पुत्र, त्याला समुद्रप्रिय आणि अश्वींनीं हाकारलेल्या अशा च्यार नौका पार करून नेतात.

6. The four ships, dear to the belly-like [ ocean ] and propelled by the As'vins, save the son of Tugra, [who was] thrown down into the waters, dashed into bottomless darkness.

---

५. तुग्र राजाचा पुत्र भुज्यु याला अश्वींनीं समुद्रांत बुडत असतांना सचेतन आणि सपक्ष नौका उत्पन्न करून जगविलें आणि स्वर्गीं नेलें याविषयीं सू. ११२ मं. ६,२० इत्यादि पहा.

' उत्तम उड्डाण करणारे ' = ' सुपप्तनी.' हा अर्थ सायणांनीं एका पक्षीं केला आहे, तो युक्त दिसतो. पदपाठांत ' सुपप्तनी ' असें पद नसतां ' सुपप्तनि ' असें आहे. त्यावरून पदपाठकर्त्यांस हा अर्थ संमत नाहीं. तरी तो योग्य आहे यांत संशय नाहीं.

६. भुज्यूचीच कथा यांत चालू आहे.

' समुद्रप्रिय ' = ' जठलस्य जुष्टाः.' 'जठल' शब्दाचा येथें केलेला अर्थ सायणानुसार आहे. हा शब्द पुनः ऋग्वेदांत आलेला नाहीं. 'जठलस्य जुष्टाः' या पदांचा अर्थ सायण ' समुद्रामध्ये प्राप्त झालेल्या' असा करितात. कसेंहि असलें तरी हीं दोन पदें कठिण आहेत हें खरें.

कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसो यं तौग्र्यो नाधितः पर्यषस्वजत् ।
पर्णा मृगस्य पतरोरिवारभ उदश्विना ऊहथुः श्रोमताय कम् ॥७

कः । स्वित् । वृक्षः । निःऽस्थितः । मध्ये । अर्णसः । यम् । तौग्र्यः । नाधितः । परिऽअसस्वजत् ।
पर्णा । मृगस्य । पतरोःऽइव । आऽरभे । उत् । अश्विना । ऊहथुः । श्रोमताय । कम् ॥ ७ ॥

तद्वां नरा नासत्यावनु ष्याद्यद्वां मानास उचथमवोचन् ।
अस्मादद्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुम् ॥८॥२८

तत् । वाम् । नरा । नासत्यौ । अनु । स्यात् । यत् । वाम् । मानासः । उचथम् । अवोचन् ।
अस्मात् । अद्य । सदसः । सोम्यात् । आ । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ८ ॥ २८ ॥

---

## भाषायाम्.

७. कः स्वित् वृक्षः अर्णसो मध्ये निष्ठितः (=कश्चिद् वृक्ष आगत्य समुद्रस्य मध्ये निश्चलः स्थित इव) यं [वृक्षं] नाधितः (=तारणं याचमानस्) तौग्र्यो (=भुज्युः) पर्यषस्वजत् (=परित आलिङ्गितवान्) । पतरोर्मृगस्य आरभे पर्णा इव (=पततः कस्यापि मृगस्य आलम्बनाय पर्णानि पक्षाः प्राप्ता इव) । हे अश्विनौ, श्रोमताय (=यशसे) [तं भुज्युम्] उदूहथुः (=ऊर्ध्वं प्रापयथः स्म=ऊर्ध्वं प्रापय्य यशस्विनौ भूतौ) ॥

८. हे नरा नासत्या (=नरौ नासत्यौ=शूरावश्विनौ), यद् [इदम्] उचथं (=स्तोत्रं) मानासः (=मानेर्षः पुत्रा अस्मद्रूपा) वाम् अवोचन् (=अकुर्वन्) तद् वाम् अनु स्यात् (=युवामनुकूलं भवतु=युवाभ्यां प्रियं भवतु) । आ (=अपि च) अस्मात् सोम्यात् सदसः (=सोमयुक्तादस्माद्यज्ञगृहात्=अस्मात् सोमयुक्तयज्ञाद्) [वयम्] अद्य इषम् (=अन्नं) वृजनं (=बलं) जीरदानुं (=क्षिप्रदानं) [वीरं=पुत्रं च] विद्याम (=लभेमहि) ॥

पांच ता० १ दिसेंबर पासून ता० ३१ दिसेंबर १८७९ पर्यंत.



| | | | रु. आ. पै. |
|---|---|---|---|
| रावसाहेब. बाबाजी लक्ष्मण बज्य | ... १८७८।७९ | ,, ... | ६– ६–० |
| ,, अण्णाजी व्यंकटेश ... | .... १८७९।८० | ,, ... | ५– ७–० |
| रा० राजश्री हरि महादेव पंडित | ... ... | ,, ... ... | ६– ६–० |
| ,, नेटिव लायब्ररी दापोली | ... ... | ,, ... ... | ६– ६–० |
| ,, नेटिव लायब्ररी मंडलेश्वर | ... ... | ,, ... ... | ६– ६–० |
| ,, नेटिव लायब्ररी कल्याण | ... ... | ,, ... ... | ६– ६–० |
| ,, नेटिव लायब्ररी तळेगांव | ... १८७८।७९ | ,, ... | ६– ६–० |
| ,, नेटिव लायब्ररी. तासगांव | ...१८७८।७९।८० | ,, ... | ९–१२–० |
| सुपरिन्टें० एज्युकेशन सोसायटी. मुंबई | १८७९।८०... | ... | ६– ०–० |
| रा० रा० रामभाऊ मानाजी माने. | बाकीसुद्धां १८७८।७९।८० | | ९–१२–० |
| ,, मोरेश्वर लक्ष्मणजी वकील. | बाकी ... ... | ,, ... | २४– ०–० |
| ,, बाबाजी यशवंत क्लार्क. | बाकी ... ... | ,, ... | ७– ०–६ |
| ,, सुंदरराव रघुनाथ मुंबई | ... १८७८।७९ | ,, ... | ६– ०–० |
| ,, भाई जीवनजी ... | ... ... | ,, ... ... | ६– ०–० |
| ,, वासुदेव बल्लाळ खेर | ... ... | ,, ... ... | ६– ६–० |
| डाक्तर जी० ड० लीट्नर पंजाब. | बाकी ... ... | ,, | ३८– ४–० |

Registered No. 110 of 1878.

## NOTICE.

The third Volume of the *Vedârthayatna* will end with the last hymn of the 1st Maṇḍala, i. e. with hymn 191.

Subscription is annual and commences with the beginning of any Volume.

## विशेष सूचना.

पहिल्या मंडलाचें शेवटचें सूक्त, म्हणजे ऋग्वेद संहितेचें सूक्त १९१, हें संपलें म्हणजे वेदार्थयत्नाचा तिसरा भाग संपेल.

## सूचना.

| | रु. | आ. |
|---|---|---|
| वर्षाची वर्गणी, आगाऊ | ६ | ० |
| मुंबईबाहेर राहणारांस टपाल हांशिलाबद्दल दरवर्षाचे | ० | ६ |
| फुटकळ दर प्रतीस | ० | १० |

वर्गणीदार होण्यास इच्छिणाऱ्यांनीं कोणत्याहि भागाच्या आरंभापासून वर्गणीदार व्हावें.

All communications to be addressed to the Manager Mr. Mahâdeva Nârâyan Paṇḍit, No. 29 *Moroba Popatji's Cart, Kalka Devî Road, Bombay.*

सर्व प्रकारचा पत्रव्यवहार मुंबई मोरोबा पोपटजीची वाडी घर नंबर २९, या पत्त्यावर रा. रा. महादेव नारायण पंडित "म्यानेजर वेदार्थयत्न" यांच्याशीं ठेवावा.

R.R.

THE

# VEDÂRTHAYATNA

OR

## AN ATTEMPT TO INTERPRET THE VEDAS.

The Rigveda Saṁhitâ with Marâṭhi and English translations, a paraphrase in classical Sanskrit and copious notes in Marâṭhî.

# वेदार्थयत्न.

## ऋग्वेदसंहिता

पदांसहित व

तिचें मराठी आणि इंग्रजी भाषांतर,

संस्कृत व्याख्या आणि मराठी टीका.

VOL. III. NO. 16. JANUARY 1880. MONTHLY PART 46.

पुस्तक ३. अंक १६. जानेवारी सन १८८०. मासिक भाग ४६.

मुंबईंत

"निर्णयसागर" छापखान्यांत छापिलें.

(हें सन १८६७ च्या २५ व्या आक्टाप्रमाणें नोंदलें आहे.)

मार्च ता० १ पासून ता० ३१ जानवारी सन १८८० पर्यंत.

| | | रु. आ. |
|---|---|---|
| डब्ल्यु.ए. रसेल साहेब एज्युकेशन इनस्पेक्टर बेळगांव. | बाकी. | १९- २ |
| आदित्य रामभट्टाचार्य प्रोफेसर. ... ... ... ... | | ९- २ |
| श्रीमंत आत्मानंदसरस्वती स्वामी मठ कवळें. | १८७८।७९ | ६- ० |
| रा. रा. हरिशंकर प्राणजीवन. ... ... ... | ,, | १६-११ |
| ,, शेषो रामचंद्र ओव्हरसिअर. ... ... | ,, | १९- २ |
| ,, गोविंद केशव साबदे. ... ... ... | ,, | ०- ६ |
| ,, व्यंकट वर्दी यंगार. ... ... ... | ,, | ६-१२ |
| ,, बचेटआपा तांडूर. ... ... | १८७८।७९ | ६- ६ |
| ,, असंना सायबु कंट्रयक्टर ... ... ... | ,, | ६- ० |
| ,, केशव बापूजी बाळ. ... ... ... | ,, | ६- ० |
| ,, श्रीपाद बाबाजी ठाकूर ... ... | १८७८।७९।८० | १२-१२ |
| ,, पंडित राम नारायण. ... ... | १८७८।७९ | ६- ६ |
| ,, वासुदेव बापूजी कानेटकर.... ... | १८७९।८० | ६- ० |
| ,, गोविंद कृष्ण रानडे. ... ... ... | ,, | ६- ० |
| डाक्टर सखाराम अर्जुन. ... ... ... ... | ,, | ६- ० |
| रा. रा. शामराव विठ्ठल. ... ... ... ... | ,, | ६- ० |
| ,, सखाराम रामचंद्र किरलोसकर. ... ... | ,, | ६- ० |
| ,, शंकर मोरो रानडे. ... ... ... | ,, | ६- ० |
| ,, जनार्दन रामचंद्रजी. ... ... ... | ,, | ६- ० |
| ,, नारायण विश्राम. ... ... ... | ,, | ६- ० |
| ,, जोसेफ मार्टिन. ... ... ... | ,, | ६- ० |
| ,, जव्हेरीलाल उमियाशंकर.... ... ... | ,, | ६- ० |
| ,, ठाकरसी मुलजी. ... ... ... ... | ,, | ६- ० |
| ,, घनश्याम नीलकंठ नाडकर्णी. ... ... | ,, | ६- ० |
| ,, त्र्यंबक बापूजी मायदेव. ... ... | ,, | १२- ० |

७. कोणी एक वृक्ष समुद्रामध्यें निश्चल जणूं उभा राहिला, ज्याला तारणेच्छु तुग्रपुत्र वेटाळिता झाला. पडणाऱ्या मृगाला धरावयास पंख जणुं [ मिळाले ]. हे अश्वी हो, [ तुम्ही तुग्रपुत्राला ] वर काढून कीर्ति मिळविते झालां.

८. हे शूर नासत्य हो, [ हें ] जें तुमचें स्तोत्र मानांनीं केलें तें तुम्हांला आवडो. आणि हें जें सोमयुक्त यज्ञगृह त्याच्या योगानें आज आम्हांला अन्न, बळ, [ आणि ] लवकर संपत्ति मिळवून देणारा पुत्र, यांची प्राप्ति होओ.

7. As if a certain tree stood firm in the middle of the ocean, which the distressed son of Tugra embraced. As if a falling animal obtained wings to support it. You, o As'vins, raised [ him ] and became renowned.

8. May this hymn please you, o brave Nâsatyas, which the sons of Mâna have sung unto you. And to-day through this sacrificial assembly where soma has been offered, may we obtain food, strength, [ and] a son that shall quickly make us rich.

---

७. भुज्यूला तारण्याकरितां ज्या नौका एकाएकीं अश्वींनीं प्राप्त करून दिल्या, त्यांला या मंत्रांत दोन उपमा सांगितल्या आहेत. पहिली ही कीं, भुज्यूला पाण्यांत बुडत असतां वृक्षच जणुं धरावयाला मिळाला; दुसरी ही कीं, खालीं पडणाऱ्या एकाद्या मृगाला उडून जाण्यास पंखच जणुं प्राप्त झाले. या प्रकारेंकरून अश्वींनीं भुज्यूचें संरक्षण केलें.

८. 'मानांनीं' म्हणजे मानऋषीच्या वंशजांनीं. 'मान' हें विशेषनाम आहे याविषयीं सू. ११७ मं. ११ आणि त्यावर दिलेली टीप पहा.

P 1

## सूक्तम् १८३.

अगस्त्य ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ।

**तं युञ्जाथां मनसो यो जवीयान् त्रिवन्धुरो वृषणा यस्त्रिचक्रः ।**
**येनोपयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ॥ १ ॥**

तम् । युञ्जाथाम् । मनसः । यः । जवीयान् । त्रिऽवन्धुरः । वृषणा । यः । त्रिऽचक्रः ।
येन । उपऽयाथः । सुऽकृतः । दुरोणम् । त्रिऽधातुना । पतथः । विः । न । पर्णैः ॥ १ ॥

**सुवृद्रथो वर्तते यन्नभि क्षां यत्तिष्ठथः क्रतुमन्तानु पृक्षे ।**
**वपुर्वपुष्या सचतामियं गीर्दिवो दुहित्रोषसा सचेथे ॥ २ ॥**

सुऽवृत् । रथः । वर्तते । यन् । अभि । क्षाम् । यत् । तिष्ठथः । क्रतुऽमन्ता । अनु । पृक्षे ।
वपुः । वपुष्या । सचताम् । इयम् । गीः । दिवः । दुहित्रा । उषसा । सचेथे इति ॥ २ ॥

---

### भाषायाम्.

१ हे.वृषणा (=वर्षकौ=वीर्यवन्तावश्विनौ), यो [ रथो ] मनसो जवीयान् (=मनसोपि वेगवत्तरस्) त्रिवन्धुरस् (=ईषारूपत्रिविधबन्धनकाष्ठयुक्तो ) यस्त्रिचक्रः (=चक्रत्रयोपेतः ) [ अपि च ] येन सुकृतो दुरोणं (=सुकर्मकारिणो यजमानस्य गृहम् ) उपयाथः (=गच्छथः)—[ युवां ] त्रिधातुना [ रथेन ] (=त्रिप्रकारस्थानोपेतेन रथेन) पर्णैर्विर्न (=पक्षैः पक्षीव) पतथः (=उत्पतथः)—तं [रथं] युञ्जाथां (=योजयतम्) ॥

२. यद् (=यदा ) क्रतुमन्ता (=क्रतुमन्तौ=गमनाय कृतसंकल्पौ ) पृक्षे (=हविरन्नाय=हविरन्नं प्रति गन्तुं ) [ रथम् ] अनु तिष्ठथः (=आश्रयथस् ) [ तदानीं स ] रथः अभि क्षां ( =देवयजनभूमिं प्रति ) यन् ( =गच्छन् ) सुवृत् वर्तते ( =सुचक्रभ्रमणं यथा तथा गच्छति) । इयं [मम] वपुष्या गीः (=युवयोः शरीराय हिता इयं स्तुतिरूपा वाग् ) वपुः सचतां (=युवयोः शरीरं सेवतां=युवयोः शरीरेण सह गच्छतु ) । दिवो दुहित्रा उषसा ( =द्युदेवस्य कन्यकया उषसा ) सचेथे ( =संगच्छेथे=तया सह गच्छथः=तया सह समकालत्वेन गच्छथः ) ॥

## सूक्त १८३.

ऋषि– अगस्त्य. देवता– अश्वी. वृत्त–त्रिष्टुभ्.

१. हे वीर्यवंत अश्वी हो, जो मनापेक्षांहि वेगवान्, तीन दांड्यांचा, [आणि] जो तीन चाकांचा, ज्यांत बसून तुम्हीं पुण्यवंताच्या घरीं जात असतां–पक्षांच्या योगेंकरून जसा पक्षी, तसे तुम्ही त्रिगुणित [रथाच्या योगा]नें जातां– त्या रथाला तुम्ही जोडा.

२. हे अश्वी हो, तुम्ही जेव्हां मनांत संकल्प करून हविरन्नासाठीं रथांत बसतां तेव्हां तो रथ यज्ञभूमीकडे जातेवेळीं फार सुरळीतपणें चालतो. ही सुखकारक स्तुति तुमच्या अंगाबरोबर जाओ. तुम्ही द्यूची कन्यका उषा इजबरोबर जात असतां.

## HYMN 183.

To the *As'vins.* By *Agastya.* Metre—*Trishṭubh.*

1. Put the horses to that chariot which is swifter than the mind is of a triple seat, and which has three wheels; o puissant [As'vins], in which you go to the house of the righteous— you fly with the threefold chariot as a bird with wings.

2. When resolved [to go] you mount your chariot for [receiving] the offering, easy rolls your chariot, going towards the sacrificial ground. May this praise, which is good for your person, be united with your person. With Ushas, the daughter of Dyaus, are you united.

---

१. तीन दांड्यांचा. सू.११८. मं.१,२ हे आणि त्यांजवरील टिपा पाहा.

२. तात्पर्यः ‘ हे अश्वी हो, उपासकांचें हवि घेण्याकरितां जेव्हां तुम्ही रथांत बसून जात असतां तेव्हां तुमचा रथ फार जलद चालतो. आणि तुम्ही जातां त्या वेळीं द्यूची कन्यका उषा हीहि तुम्हांबरोबरच असते. तर ही माझी स्तुतिहि तुम्हांबरोबर जाओ.’

‘ अंगाबरोबर ’ = ‘ वपुः.’ ‘ वपुष्या गीः वपुः सचतां ’ यांतील ‘ वपुः’ हा शब्द कठिण आहे. ‘वपुष्या गीः सचतां’ म्हणजे ‘सुखकारक स्तोत्र तुम्हांला सेवो ’ असा अर्थ आहे यांत संशय नाहीं. ‘वपुः’ म्हणजे ‘ शरीर ’ असा अर्थ आहे तरी तुमचें (अश्वींचें ) शरीर, असा अर्थ येथें संभवत नाहीं; पण दुसरा निर्वाह दिसत नाहीं.

आ तिष्ठतं सुवृतं यो रथो वामनु व्रतानि वर्तते हविष्मान् ।
येन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥३॥

आ । तिष्ठतम् । सुऽवृतम् । यः । रथः । वाम् । अनु । व्रतानि । वर्तते । हविष्मान् ।
येन । नरा । नासत्या । इषयध्यै । वर्तिः । याथः । तनयाय । त्मने । च ॥ ३ ॥

मा वां वृको मा वृकीरा दधर्षीन्मा परि वर्क्तमुत माति धक्तम् ।
अयं वां भागो निहित इयं गीर्दस्राविमे वां निधयो मधूनाम् ॥४॥

मा । वाम् । वृकः । मा । वृकीः । आ । दधर्षीत् । मा । परि । वर्क्तम् । उत । मा । अति । धक्तम् ।
अयम् । वाम् । भागः । निऽहितः । इयम् । गीः । दस्रौ । इमे । वाम् । निऽधयः । मधूनाम् ॥ ४ ॥

---

## भाषायाम्.

३. यो वां हविष्मान् (=हविर्भिः पूर्णो ) रथः अनु व्रतानि वर्तते (=यज्ञकर्माण्यनुलक्ष्य गच्छति ) येन [ च ] हे नरा नासत्या ( =शूरौ नासत्यौ ) इषयध्यै ( =हविरन्नं प्राप्तुं ) [ यजमानस्य ] वर्तिः (=गृहं प्रति ) तनयाय त्मने च (=पुत्राद्यपत्यकल्याणार्थं तस्य स्वात्मकल्याणार्थं च ) याथस्तं सुवृतं (=शोभनचक्रभ्रमणं रथम् ) आ तिष्ठतम् (=आरोहतम् ) ॥

४. वां वृकः (=युवयोर्हिंसकोरण्यश्वा ) अस्मान् [ मा दधर्षीत्=मा हिनस्तु ] आ (=अपि च ) वृकीः (=वृकी=अरण्यशुनी ) मा दधर्षीत् (=मा हिनस्तु ) [युवाम् अस्मान् ] मा परि वर्क्तम् ( =अस्मान् मा वर्जयतम्=अस्मान् परितो मा वर्जयतम् ) । उत (=अपि च ) मा [ अस्मान् ] अति धक्तम् (=" अस्मानतिक्रम्यान्यस्मै मा दत्तम्" ) । अयं (=पुरोदर्शी ) वां भागः (=युवयोर्हविर्भागो ) निहितः (=युवयोरर्थं प्रार्पितः ) । इयं गीः (=युवयोरर्थम् एषा स्तुतिः कृतास्ति) । हे दस्रौ (=पराक्रमिणावश्विनौ ), इमे मधूनां वां निधयः (=युवयोरर्थं मधुराणां सोमरसानां राशयः ) [ प्रार्पिता भवन्ति ] ॥

३. हे शूर नासत्य हो, हवींनीं भरलेला जो रथ कर्माकडे जात असतो त्या तुमच्या सुरळीत चालणाऱ्या रथांत तुम्ही बसा; ज्याच्या योगेंकरून तुम्ही उपासकाचें आणि त्याच्या मुलांबाळांचें कल्याण करण्याकरितां हविरन्नासाठीं त्याच्या घरीं जातां.

४. तुमचा लांडगा [आम्हांस] उपद्रव न करो, आणि लांडगीहि उपद्रव न करो. तुम्ही [आम्हांस] वगळून जाऊं नका, अथवा [आम्हांस] टाकून [दुसऱ्यावर] प्रसाद करूं नका. हा तुमचा भाग येथें ठेविला आहे, ही तुमची स्तुति केली आहे. हे पराक्रमी [अश्वी] हो, हे सोमरसांचे राशि तुम्हांस अर्पण केले आहेत.

3. Mount that easy-rolling chariot of yours which, filled with offerings, runs towards sacrifices, [and] in which you, o brave Nâsatyas repair for oblation to the sacrificer's house for his own and his children's benefit.

4 Let not your wolf hurt [us], let not your she-wolf hurt [us]. Do not avoid us, and do not favour others in preference to us. Here is your part of the offering put down for you, here is praise for you. Here are heaps of the sweet juices for you, o conquering heroes.

---

'तुम्ही सूर्याची कन्यका उषा इजवरोबर जात असतां' = 'दिवो दुहित्रा उषसा सचेथे.' म्हणजे उषःकाळीं उगवत असतां.

---

३. 'हवींनीं भरलेला' = 'हविष्मान्.' म्हणजे जो भ्रमण करतां करतां उपासकांनीं अर्पण केलेल्या हवींनीं भरिला जातो तो.

४. यांत सांगितलेला अश्वींचा लांडगा आणि अश्वींची लांडगी म्हणजे काय याविषयीं संशय आहे. अश्वींच्या संबंधानें सू. ११७ मं. १७, १८, सू. ११६ मं. १६ यांत लांडगीविषयीं सांगितलेलें आहे, पण लांडग्याविषयीं कोठें सांगितलेलें आढळत नाहीं. कदाचित् लांडगा आणि लांडगी म्हणजे सायण म्हणतात त्याप्रमाणें कोणीहि घातकरणारा आणि घात करणारी असें समजावयाचें आहे.

**युवां गोतमः पुरुमीळ्हो अत्रिर्दस्रा हवतेऽवसे हविष्मान् ।**
**दिशं न दिष्टामृजूयेव यन्ता मे हवं नासत्योप यातम् ॥ ५ ॥**

युवाम् । गोतमः । पुरुऽमीळ्हः । अत्रिः । दस्रा । हवते । अवसे । हविष्मान् ।

दिशम् । न । दिष्टाम् । ऋजुयाऽइव । यन्ता । आ । मे । हवम् । नासत्या । उप । यातम् ॥ ५ ॥

**अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।**
**एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥६॥२९॥४॥**

अतारिष्म । तमसः । पारम् । अस्य । प्रति । वाम् । स्तोमः । अश्विनौ । अधायि ।

आ । इह । यातम् । पथिऽभिः । देवऽयानैः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ६ ॥ २९ ॥ ४ ॥

## भाषायाम्.

५. हे दस्रा (=दस्रौ=पराक्रमिणौ), गोतमः, पुरुमीळ्हः, अत्रिः [इत्येषां प्रत्येको] हविष्मान् (=हविर्युक्तः सन्=हविषा) युवाम् अवसे (=रक्षणाय) हवते (=आह्वयति)। हे नासत्या (=नासत्यावश्विनौ), यन्ता दिष्टां दिशं न ऋजूयेव (=अभिमतं गन्तव्यं स्थानं रथेनाजिधावनकर्ता यथा धावति तद्वत्) मे हवम् उप आ यातं (=ममाह्वानं प्रत्यागच्छतम्) ॥

६. [वयम्] अस्य तमसः पारम् (=अस्य दुःखस्य पर्यन्तभूमिम्) अतारिष्म (=उत्तीर्णा भूताः स्मः) । हे अश्विनौ, वां प्रति [एष] स्तोमः अधायि (=युवां प्रति=युवयोः प्रीत्यर्थमेतत्स्तोत्रमकारि) । [तस्मात् कारणाद्] देवयानैः पथिभिः (=देवैर्गन्तव्यैर्मार्गैः) इह आ यातम् (=अत्रागच्छतम्) [अपि च वयम्] इषम् (=अन्नं) वृजनं (=बलं) जीरदानुं (=क्षिप्रदानं) [वीरं=पुत्रं च] विद्याम (=लभेमहि) ॥

द्वितीयाष्टके चतुर्थोऽध्यायः समाप्तः ।

५. हे पराक्रमी [अश्वी] हो, तुम्हांला गोतम, पुरुमीह्ळ, [आणि] अत्रि हे हवि अर्पण करून संरक्षणासाठीं आह्वान करीत असत. हे नासत्य हो, नेमलेल्या ठिकाणाला सरळ मार्गानें जसा रथ हाकणारा [जातो], तसे तुम्ही माझ्या हाकेप्रत या.

5. Gotama, Purumîhḷa [and] Atri invoke you, o conquering heroes, with offerings for help. As a chariot-racer [drives] to a fixed goal by a straight road, so come ye to my invocation, o Nâsatyas!

६. [आतां] आम्ही या अंधकाराच्या पार पडलों. हे अश्वी हो, हें स्तोत्र तुम्हांप्रीत्यर्थ केलें आहे. ज्या मार्गांनीं देव चालतात त्या मार्गांनीं तुम्ही इकडे या. [आणि] आम्हांस अन्न, बळ, आणि लवकर संपत्ति मिळवून देणारा पुत्र, यांची प्राप्ति होओ.

6. We have come to the end of this darkness. [This] hymn is made for you, o As'vins! Come hither along the paths by which the gods walk. [And] may we obtain food, strength, [and] a son that shall quickly make us rich.

---

५. 'गोतम,' 'पुरुमीह्ळ' आणि 'अत्रि' हे कोण होत याविषयीं सू.५१ मं. १६ आणि सू. १५१ मं. २ आणि सू. ११२ मं. ७ पहा. त्या तिघांनीं तुम्हांला हवि अर्पण करून जसें संरक्षणासाठीं पूर्वकाळीं बोलाविलें तसा मी आज तुम्हांस बोलावीत आहें, तर तुम्हीं या असें तात्पर्य आहे.

६. या मंत्रांत सांगितलेला अंधकार म्हणजे दुःखरूपी अंधकार होय असें सायण म्हणतात तसें असेल, अथवा रात्ररूप अंधार असेल, किंवा संसाररूप अंधार असेल. सूक्त ९२ मं. ६, आणि ऋ. ७.७३.१ आणि त्याजवरील टीप आणि सायणभाष्य पहा.

येथें दुसऱ्या अष्टकाचा चवथा अध्याय संपला.

## सूक्तम् १८४.

अगस्त्य ऋषिः । अश्विनौ देवता । त्रिष्टुप् छन्दः ॥

**ता वामद्य तावपरं हुवेमोच्छन्त्यामुषसि वह्निरुक्थैः ।**
**नासत्या कुह चित्सन्तावर्यो दिवो नपाता सुदास्तराय ॥ १ ॥**

ता । वाम् । अद्य । तौ । अपरम् । हुवेम । उच्छन्त्याम् । उषसि । वह्निः । उक्थैः ।
नासत्या । कुह । चित् । सन्तौ । अर्यः । दिवः । नपाता । सुदाःऽतराय ॥ १ ॥

**अस्मे ऊ षु वृषणा मादयेथामुत्पणीँर्हतमूर्म्या मदन्ता ।**
**श्रुतं मे अच्छोक्तिभिर्मतीनामेष्टा नरा निचेतारा च कर्णैः ॥ २ ॥**

अस्मे इति । ऊं इति । सु । वृषणा । मादयेथाम् । उत् । पणीन् । हतम् । ऊर्म्या । मदन्ता ।
श्रुतम् । मे । अच्छोक्तिऽभिः । मतीनाम् । एष्टा । नरा । निऽचेतारा । च । कर्णैः ॥ २ ॥

---

### भाषायाम्.

१. हे नासत्या (=नासत्यौ) कुह चित् सन्तौ (=कुत्रापि वर्तमानौ) दिवो नपाता (=द्युदेवस्य पुत्रौ) ता वाम् अद्य ता [वाम्] अपरं (=तौ प्रसिद्धौ युवामस्मिन्दिने युवां चापरस्मिन्दिने) उच्छन्त्याम् उषसि (=उषसि तमो विवासयन्त्यां सत्याम्=उषःकाले) वह्निः (=वह्नयः=हविर्वाहः=हविर्युक्ता) अर्यः (=स्तोत्रशीला) [वयम्] उक्थैः (=स्तोत्रैः) सुदास्तराय (=अत्यर्थं शोभनहविर्दात्रे यजमानाय) हुवेम (=आह्वयाम) ॥

२. हे वृषणा (=वृषणौ=वीर्यवन्तावश्विनौ), अस्मे उ सु मादयेथाम् (=अस्मास्वेव सुष्ठु तृप्यतम्) [अस्माकं च] [सोमस्य] ऊर्म्या (=सोमस्योर्मिणा=सोमस्य प्रवाहेण=अस्माभिः प्रार्पितेन सोमेन) मदन्ता (=मदन्तौ=हर्षं प्राप्नुवन्तौ) पणीन् (=अयजकान् लुब्धकान्) उत् हतम् (=उन्मूल्य नाशयतम्)। [अपि च] हे नरा (=नरौ शूरावश्विनौ), मतीनाम् अच्छोक्तिभिः (=स्तुतीनामभिवचनैर्) एष्टा (=एष्टौ=आनीतौ) कर्णैश्च निचेतारा (=निचेतारौ=श्रुतस्य संचेतारौ) [युवां] मे श्रुतं (=ममाह्वानं शृणुतम्) ॥

एष्टेति पदम् आयज् इति सोपसर्गाद्धातोः ॥

## सूक्त १८४.

ऋषि–अगस्त्य. देवता–अश्वी. वृत्त– त्रिष्टुभ्.

१. हे नासत्य हो, प्रसिद्ध जे तुम्ही त्या तुम्हां द्युपुत्रांला, तुम्ही कोठेंहि असलां तरी, उषा उगवतांच हवींनीं आणि स्तोत्रांनीं भक्तिपूर्वक होत्साते आम्ही उदार यजमानासाठीं आज आह्वान करूं, आणि उद्यां आह्वान करूं.

२. हे वीर्यवंत [ अश्वी] हो, तुम्ही आमच्याच येथें आनंद पावा. [ आमचा ] सोम पिऊन कृपण अनुपासकांला निर्मूळ करा. हे शूर [अश्वी] हो, [तुम्हां]प्रत म्हटलेलीं जीं स्तोत्रें त्यांच्या योगानें प्राप्त झालेले आणि कानांनीं संचय करणारे असे जे तुम्ही ते माझें म्हणणें ऐका.

## HYMN 184.

To *the As'vins.* By *Agastya.* Metre—*Trishṭubh.*

1. So may we invoke today, so invoke tomorrow you, o Nâsatyas, wherever you may be, you the sons of Dyaus, for the benefit of the liberal sacrificer, with oblations, hymns and devotion, at the break of Dawn

2. In our house alone be you exhilarated o puissant [As'vins ] ! and delighted with our flow [of Soma], destroy the unsacrificing misers. Brought hitherwards by the address of hymns, and observers with your ears, hear me, o brave [ones] !

---

१. यांत होता ( म्हणजे यज्ञ संपादन करणारा ) म्हणतो कीं, 'हे अश्वी हो, आम्ही तुम्हांला आज आणि आम्ही तुम्हांला उद्यां ( म्हणजे प्रतिदिनीं ) प्रातःकालीं स्तोत्रें आणि हव्यें आणि भक्ति यांच्या योगानें आमच्या यजमानार्थ आह्वान करूं, मग तुम्ही कोठेंहि असा.'

'हवींनीं '='वह्निः.' येथें 'वह्नि' हें एकवचन 'वह्नयः' या अनेकवचनाच्या जागीं योजिलें आहे. 'वह्नि' म्हणजे जो हवि घेऊन अर्पण्यासाठीं पुढें सरसावला तो.

'भक्तिपूर्वक '=' अर्यः.' 'अरि' म्हणजे 'भक्तिमान्,' 'स्तोत्र करणारा,' 'भजक' हा अर्थ वेदांत प्रसिद्ध आहे.

'उदार यजमानासाठीं '=' सुदास्त-

**श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः ।**
**वच्यन्ते वां ककुहा अप्सु जाता युगा जूर्णेव वरुणस्य भूरेः ॥३॥**

श्रिये । पूषन् । इषुकृताऽइव । देवा । नासत्या । वहतुम् । सूर्यायाः ।
वच्यन्ते । वाम् । ककुहाः । अप्ऽसु । जाताः । युगा । जूर्णाऽइव ।
वरुणस्य । भूरेः ॥ ३ ॥

---

## भाषायाम्.

३. हे पूषन् ( =?पूषणौ=पोषकौ ) नासत्या देवा ( =नासत्यौ देवौ ), [ युवाम् ] इषुकृतेव (=इषुकृताविव=बाणीकृताविव सन्तौ=बाणवच्छीघ्रीकृतौ सन्तौ ) सूर्याया वहतुं (=सूर्यानाम्न्याः सूर्यकन्याया विवाहं प्रति ) श्रिये ( =शोभायै=सशोभं यथा तथा) [अवच्यथाम्=अधावतम्] । अप्सु जाताः ( =आन्तरिक्षेषु प्रदेशेषु जाता) वां ककुहाः (=युवयोरुच्छ्रिता अश्वा ) भूरेर्वरुणस्य जूर्णा युगेव (=महतो वरुणदेवस्य पुरातनानि युगानीव=पुरातनान्यश्वयुग्मानीव ) वच्यन्ते (=धावन्ति स्म ) ॥

अत्र सायणः । सविता सूर्यो दुहितरं सूर्याख्यां प्रदातुमना देवानाहूय सामर्थ्यसमीक्षणायाजिं परिकल्प्य य इमं जेष्यति स एषां कन्यकामृक्सहस्रकृतं स्तोत्रं च लभत इत्यकल्पयत् । तमग्निः प्रथममजयत् तमन्वश्विनावपि जित्वाग्निं प्रधृष्य ऋक्सहस्रं कन्यकां चालभेताम् । तत इन्द्र उषाश्चाजयताम् । तौ च तैरग्न्यादिभिः प्रार्थितौ स्वशस्त्रस्य कंचित्कंचिद्भागं तेभ्यः परिकल्प्य सूर्यां स्वरथेऽधारयतामिति । अयमितिहासो ब्राह्मणे प्रजापतिर्वै सोमाय राज्ञ इत्यत्राम्नातोऽस्माभिः प्रथमाष्टके । १.८. २०. ५. आ वां पतित्वं सख्यायेत्यत्र प्रपञ्चितः । तत्राह । हे पूषन् पोषक सूर्य । एतच्चन्द्रस्याप्युपलक्षणं सूर्याचन्द्रमसोरेवाश्वित्वात् । सूर्याचन्द्रमसावित्येक इति यास्केनोक्तत्वात् । अतः पूषन्नित्युक्ते हे पोषकावश्विनावित्युक्तं भवति । हे पोषकौ हे नासत्या असत्यरहितौ देवा देवौ युवां श्रिये श्रेयसे शस्त्रस्य कन्यायाश्च लाभायेत्यर्थः । इषुकृतेव । इवशब्द एवार्थे । आजिधावनायेषुवच्छीघ्रमृजुगामिनौ कृतावेव सन्तौ सूर्याया एतन्नामिकायाः सवितुः पुत्र्याः ॥ कर्मणि षष्ठी ॥ सूर्यां वहतुं रथे धारयितुमाजिमुदजयतमित्यर्थः । यस्मादेवं तस्मादप्सु जाताः कर्मसु संपादिताः ककुहाः शस्त्ररूपाः स्तुतयो भूरेरविच्छिन्नप्रवाहस्य वरुणस्य फलप्रतिबन्धकपापनिवारकस्य यागस्य सिद्ध्यर्थं तत्संबन्धिन्यो वां प्रति वच्यन्ते होत्रादिभिः । युवामेव शस्त्रगतमन्त्रैर्यागकाले च स्तुवन्तीत्यर्थः । युगा जूर्णेव । जीर्णानि युगानीव । इवशब्दः संप्रत्यर्थः । पुरातना यागकाला यथा तद्वदद्यतना अपीत्यर्थः । पूर्वकाले यथा युवामेव स्तुवन्ति तद्वदिदानीमपीति तात्पर्यम् । इति ॥

३. हे पोषक [अश्वी] हो, हे नासत्य देव हो, तुम्ही सूर्येच्या विवाहाप्रत बाणासारिखे शोभत [भरधांव गेलां]. तुमचे अंतरिक्षांत जन्मलेले उंच [घोडे] महान् वरुणाच्या प्राचीन जोड्यांप्रमाणें भरधांव गेले.

3. You [ran] gracefully, o nourishing gods Nâsatyas, to the marriage of Sûryâ, as if turned into arrows. Your high steeds born in the firmament gallopped like the ancient teams of great Varuṇa.

---

राय.' म्हणजे देवांला विपुळ हव्यें देणारा जो यजमान त्याजवर अश्वी प्रसन्न व्हावे म्हणून.

वृत्तासाठीं 'उच्छन्तिआम्,' 'नासत्तिआ' आणि 'सुदआस्तराय' असें म्हणावें लागतें.

२. 'आमच्याच येथें' इ०. म्हणजे आमच्याच घरीं हवि आणि सोम भक्षण्याकरितां या, दुसऱ्याच्या घरीं जाऊं नका.

'[तुम्हां]प्रत म्हटलेलीं जीं स्तोत्रें' ='अच्छोक्तिभिः मतीनाम्.' म्हणजे अक्षरशः 'स्तोत्रांच्या अभिवचनांनीं.' अभिवचन म्हणजे कोणाला तरी संबोधून म्हटलेलें वचन.

वृत्तासाठीं, 'ऊर्मिआ' आणि 'मतीनआम्' असें म्हणावें लागतें.

---

३. 'हे नासत्य हो, तुमची स्त्री सूर्या इच्याशीं तुमचा विवाह झाला त्या प्रसंगीं तुम्ही बाणांप्रमाणें धांवलां. आणि तुमचे घोडे वरुणदेवाच्या घोड्यांप्रमाणें भरधांव गेले' असें तात्पर्य.

सूर्या ही कोण व तिच्या लग्नाच्या वेळीं अश्वी कां धांवले याविषयीं सू. ३४ मं. ५, आणि त्यावरील टीप पहा.

**अस्मे सा वां माध्वी रातिरस्तु स्तोमं हिनोतं मान्यस्य कारोः ।**
**अनु यद्वां श्रवस्या सुदानू सुवीर्याय चर्षणयो मदन्ति ॥ ४ ॥**

अस्मे इति । सा । वाम् । माध्वी इति । रातिः । अस्तु । स्तोमम् । हिनोतम् । मान्यस्य । कारोः ।
अनु । यत् । वाम् । श्रवस्या । सुदानू इति सुऽदानू । सुऽवीर्याय । चर्षणयः । मदन्ति ॥ ४ ॥

**एष वां स्तोमो अश्विनावकारि मानेभिर्मघवाना सुवृक्ति ।**
**यातं वर्तिस्तनयाय त्मने चागस्त्ये नासत्या मदन्ता ॥ ५ ॥**

एषः । वाम् । स्तोमः । अश्विनौ । अकारि । मानेभिः । मघऽवाना । सुऽवृक्ति ।
यातम् । वर्तिः । तनयाय । त्मने । च । अगस्त्ये । नासत्या । मदन्ता ५

---

## भाषायाम्.

४. हे माध्वी (=मधुपात्रयुक्तावश्विनौ), सा वां रातिः (=प्रसिद्धं युवयोर्दानम्) अस्मे अस्तु (=अस्मासु भवतु=अस्मभ्यं दत्तं भवतु)। मान्यस्य कारोः (=मान-ऋषेः पुत्रभूतस्य कवेः) स्तोमं हिनोतं (=स्तोत्रं हिनुतं=स्तोत्रं प्रीणयतम्)। यद् (=यस्मात्कारणात्) हे सुदानू (=शोभनदानोपेतावश्विनौ), चर्षणयः (=मनुष्याः) श्रवस्या (=अन्नेच्छया) सुवीर्याय (=शोभनबलाय) [च] वाम् अनु मदन्ति (=युवां सोमाद्यर्पणेन हर्षयन्ति)॥

५. हे मघवाना अश्विनौ (=हे भगवन्तावश्विनौ), एष वां स्तोमः (=एतद् युवयोः स्तोत्रं) मानेभिः (=मानस्य पुत्रैरस्मदात्मभिः) सुवृक्ति (=सुवचनं यथा तथा) अकारि। [एवं सति] हे नासत्या (=हे नासत्यावश्विनौ), तनयाय त्मने च (=अस्माकं स्वात्महितार्थं पुत्रपौत्रादीनां च हितार्थं) वर्तिर्यातम् (=अत्रायातम्)। अगस्त्ये मदन्ता (=अगस्त्ये माद्यन्तौ=अगस्त्यस्य मम गृहे हर्षं प्राप्नुवन्तौ=अगस्त्यगृहे च सोमादिभक्षणेन हर्षं प्राप्नुतम्)॥

४. हे मधुपात्रयुक्त अश्वी हो, तुमचा जो उदार प्रसाद तो आम्हांला प्राप्त होओ, तुम्ही मान्यकवीचें स्तोत्र प्रीतीनें ग्रहण करा. कारण कीं, हे महोदार अश्वी हो, जन अन्नाच्या इच्छेनें [ आणि ] चांगल्या बळासाठीं तुम्हांला हर्षवितात.

4. With us may that your bounty be, o bearers of sweetness! Love you the hymn of the poet Mânya. For people exhilarate you, o most bounteous ones, with the desire of food and for great strength.

५. हे धनसंपन्न अश्वी हो, हें स्तोत्र सुंदर रीतीनें रचून मानपुत्रांनीं तुम्हांप्रीत्यर्थ म्हटलें आहे. तुम्ही आमच्या मुलांबाळांकरितां आणि आम्हांकरितां [आमच्या] घरीं या. आणि हे नासत्य हो, अगस्त्याच्या घरीं हर्ष पावा.

5. This hymn composed with care is sung unto you, o bounteous As'vins, by the sons of Mâna. Come home unto us for our children's and for our own sake, delighting yourselves in the house of Agastya, o Nâsatyas.

---

४. 'मधुपात्रयुक्त'='माध्वी.' 'माध्वी' हा शब्द वेदांत बऱ्याच ठिकाणीं आला आहे. तो नित्य अश्वींचें विशेषण असतो. अश्वी येत असतां त्यांजवरावर मधु असतें हें प्रसिद्ध आहे त्या गोष्टीला अनुलक्षून हें विशेषण दिलें आहे.

'मान्य' याविषयीं सू. १६५ मं. १४, आणि त्याजवरील टीप पहा.

५. 'अगस्त्याच्या घरीं'='अगस्त्ये.' म्हणजे सूक्तकर्ता अगस्त्य याच्या घरीं.

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥ ६ ॥ १ ॥

अतारिष्म । तमसः । पारम् । अस्य । प्रति । वाम् । स्तोमः । अश्वि-
नौ । अधायि ।
आ । इह । यातम् । पथिऽभिः । देवऽयानैः । विद्याम । इषम् । वृ-
जनम् । जीरऽदानुम् ॥ ६ ॥ १ ॥

## भाषायाम्.

६. [वयम्] अस्य तमसः पारम् (=अस्य दुःखस्य पर्यन्तभूमिम्) अतारिष्म (=उत्तीर्णा भूताः स्मः)। हे अश्विनौ, वां प्रति [एष] स्तोमः अधायि (=युवां प्रति=युवयोः प्रीत्यर्थमेतत्स्तोत्रमकारि)। [तस्मात् कारणाद्] देवयानैः पथिभिः (=देवैर्गन्तव्यैर्मार्गैर्) इह आ यातम् (=अत्रागच्छतम्) [अपि च वयम्] इषम् (=अन्नं) वृजनं (=बलं) जीरदानुं (=क्षिप्रदानं) [वीरं=पुत्रं च] विद्याम (=लभेमहि)॥

---

## सूक्तम् १८५.

अगस्त्य ऋषिः । द्यावापृथिव्यौ देवता । त्रिष्टुप् छन्दः ।

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद ।
विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव ॥ १ ॥

कतरा । पूर्वा । कतरा । अपरा । अयोः । कथा । जाते इति । कव-
यः । कः । वि । वेद ।
विश्वम् । त्मना । बिभृतः । यत् । ह । नाम । वि । वर्तेते इति ।
अहनी इति । चक्रियाऽइव ॥ १ ॥

## भाषायाम्.

१. हे कवयः (=हे ऋषयः), अयोः (=अनयोर्द्यावापृथिव्योः) पूर्वा कतरा (=का पूर्वम् उत्पन्ना) अपरा कतरा (=का पश्चाद्भाविनी)? कथा जाते (=एते कथं जाते)?

६. [ आतां ] आम्ही या अंधकाराच्या पार पडलों. हे अश्वी हो, हें स्तोत्र तुम्हांप्रीत्यर्थ केलें आहे. ज्या मार्गांनीं देव चालतात त्या मार्गांनीं तुम्ही इकडे या. [ आणि ] आम्हांस अन्न, बळ, आणि लवकर संपत्ति मिळवून देणारा पुत्र, यांची प्राप्ति होओ.

6. We have come to the end of this darkness. [This] hymn is made for you, o As'vins ! Come hither along the paths by which the gods walk. [And] may we obtain food, strength, [and] a son that shall quickly make us rich.

६. पूर्व सूक्ताच्या शेवटील आणि हा मंत्र एकच आहेत.

---

## सूक्त १८५.

ऋषि– अगस्त्य. देवता–द्यावापृथिवी. वृत्त–त्रिष्टुभ्.

१. हे ऋषींनों, या दोघांतून पहिली कोण आणि नंतरची कोण, [ आणि ] या दोघी कशा झाल्या [ हें ] कोण जाणतो ? ज्यापेक्षां सकळ विश्वाला ह्या प्रत्येक स्वतंत्रपणें धारण करितात. [ ह्या द्यावापृथिवी ] दिवस आणि रात्र चक्रांनीं फिरल्याप्रमाणें वेगवेगळ्या फिरतात.

## Hymn 185.

To *Dyâvâ Prithivyau* i.e. *Heaven* and *Earth*. By *Agastya*. Metre–*Trishṭubh*.

1. Which of these two is the prior [and] which the posterior, how they were created—who knows, o poets? For they support the whole universe each independently. They revolve like day and night on a wheel.

१. हें सूक्त द्यावापृथिवींविषयीं आहे; म्हणजे सूर्यादिकांच्या प्रकाशानें तेजःपुंज जो पृथिवीच्या वरील अनंत अवकाशप्रदेश, कीं ज्यामध्यें सूर्यादिक अगणित प्रचंड गोल उगवून दिवस करितात तो द्यू, आणि जिजवर आपण राहतों ती पृथिवी. यावरून दिसून येईल कीं द्यावापृथिवी म्हणजे सर्व जगत्, विश्व, सर्व वस्तु ज्यांत आहेत तें सर्व स्थळ; मग तें पृथिवीसंबंधी असो, अथवा

भूरिं द्वे अचरन्ती चरन्तं पद्वन्तं गर्भमपदी दधाते ।
नित्यं न सूनुं पित्रोरुपस्थे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ २॥

भूरिम् । द्वे इति । अचरन्ती इति । चरन्तम् । पत्ऽवन्तम् । गर्भम् । अपदी इति । दधाते इति ।
नित्यम् । न । सूनुम् । पित्रोः । उपऽस्थे । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥ २ ॥

अनेहो दात्रमदितेरनर्वं हुवे स्वर्वदवधं नमस्वत् ।
तद्रोदसी जनयतं जरित्रे द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ३ ॥

अनेहः । दात्रम् । अदितेः । अनर्वम् । हुवे । स्वःऽवत् । अवधम् । नमस्वत् ।
तत् । रोदसी इति । जनयतम् । जरित्रे । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥ ३ ॥

---

[एतद्] को विवेद (=को विशेषेण जानाति)? यद् (=यस्मात्कारणाद्) विश्वं नाम (=सकलं वस्तुजातं=कृत्स्नमपि जगत्) त्मना बिभृतो ह (=आत्मनैव धारयतः=प्रत्येकम् अनन्यापेक्षया धारयतः)। [अपि च] अहनी चक्रियेव (=अहोरात्रे यथा चक्रेण तथा) वि वर्तेते (=विविधं वर्तेते=प्रत्येकम् अनन्यापेक्षया परिभ्रमतः) ॥

---

## भाषायाम्.

२. द्वे (=एते द्यावापृथिव्यौ) [स्वयम्] अचरन्ती (=अचरन्त्यौ) अपदी (=पादरहिते च सत्यौ) चरन्तं पद्वन्तं च भूरिं गर्भं (=पादयुक्तं कृत्स्नं प्राणिजातं) दधाते (=धारयतः)। पित्रोरुपस्थे नित्यं सूनुं न (=मातापित्रोरुत्सङ्गे मातापितरौ यथा स्वकीयं पुत्रं धारयतस्तथा) [ते धारयतः]। [एवं सति] हे द्यावापृथिवी (=द्यावापृथिव्यौ), नः अभ्वाद् रक्षतम् (=अस्मान् पापात्पालयतम्) ॥

३. अदितेः (=अखण्डिताया द्यावापृथिवीरूपाया निःसीमावकाशलक्षणाया देव्या) अनेहः (=अपापम्) अनर्वम् (=अक्षीणं) स्वर्वत् (=स्वर्गयुक्तम्) अवधम् (=अमरणं) नमस्वत् (=अन्नवद्) दात्रं (=दानम्=औदार्यं) हुवे (=आह्वयामि=याचे)। हे रोदसी (=द्यावापृथिव्यौ), तद् [दात्रं] जरित्रे (=स्तोत्रे=मदर्थं) जनयतम् (=उत्पादयतम्)। हे द्यावापृथिवी (=द्यावापृथिव्यौ), नः अभ्वाद् रक्षतम् (=अस्मान्पापात्पालयतम्)॥

२. ह्या दोघी जणी [स्वतः] न चालणाऱ्या [आणि] पादहीन [असतां] चालणाऱ्या [आणि] सपाद अनेक प्राण्यांला धारण करितात. आईबापांच्या मांडीवर औरस पुत्राला धरिल्याप्रमाणें [धरितात].—हे द्यावापृथिवी हो, आम्हांला दुःखापासून रक्षा.

३. मी अदितीचें निष्पाप, अक्षय, स्वर्गयुक्त, अमर, आणि अन्नादिसंपत्तियुक्त धन प्रार्थितों. हे द्यावापृथिवी हो, तें तुम्ही [मज] स्तोत्यासाठीं प्राप्त करून द्या. हे द्यावापृथिवी हो, आम्हांला दुःखापासून रक्षा.

2. They both support, even as parents their own son on their lap, many a walking and footless creature, though themselves not walking and not possessed of feet. Preserve us, o Heaven and Earth, from calamity.

3. I pray for the bounty of Aditi, which is free from sin, inexhaustible, heavenly, immortal, full of riches. Bestow that on the poet, ye Heaven and Earth. Preserve us, o Heaven and Earth, from calamity.

---

पृथिवीवरील, अथवा आसपासची जी पोकळी, तिजसंबंधी असो.

सूक्तकर्ता विचारितो कीं, 'या दोहोंतून द्यू पहिला कीं पृथिवी पहिली हें कोण सांगूं शकेल? अथवा ह्या कशा झाल्या तें कोण सांगूं शकेल?'

ह्या आपआपल्या आश्रितभूतांस एकमेकांवर अवलंबून न राहतां धारण करितात, आणि दिवस आणि रात्र जशा चक्रावर जणूं फिरतात, तशा ह्या चक्रावर फिरतात असें दिसतें.

'फिरतात'=' वर्तेते.' म्हणजे, एकादा रहाट जसा चाकावर फिरतो तसें.

---

२. 'स्वतः अपाद आणि न चालणाऱ्या असतांहि सपाद आणि चालणाऱ्या अशा असंख्य प्राण्यांला ह्या, आईबाप जसे आपल्या औरस पुत्रास मांडीवर घेतात त्याप्रमाणें, आपल्या आंगावर घेऊन रक्षितात.'

३. या ठिकाणीं जी अदिति सांगितली ती द्यावापृथिवीरूपच देवी होय. अदिति म्हणजे या विश्वांतील निरवधिक जो अवकाश, तद्रूप देवता होय, आणि द्यावापृथिवी हे दोन भाग मिळून तो अवकाश झाला आहे. यास्तव

**अतप्यमाने अवसावन्ती अनु ष्याम रोदसी देवपुत्रे ।**
**उभे देवानामुभयेभिरह्नां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ४ ॥**

अतप्यमाने इति । अवसा । अवन्ती इति । अनु । स्याम । रोदसी इति । देवपुत्रे इति देवऽपुत्रे ।
उभे इति । देवानाम् । उभयेभिः । अह्नाम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥ ४ ॥

**संगच्छमाने युवती समन्ते स्वसारा जामी पित्रोरुपस्थे ।**
**अभिजिघ्रन्ती भुवनस्य नाभिं द्यावा रक्षतं पृथिवी नो अभ्वात् ॥५॥२**

संगच्छमाने इति सम्ऽगच्छमाने । युवती इति । समन्ते इति सम्ऽअन्ते । स्वसारा । जामी इति । पित्रोः । उपऽस्थे ।
अभिजिघ्रन्ती इत्यभिऽजिघ्रन्ती । भुवनस्य । नाभिम् । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥ ५ ॥ २ ॥

---

## भाषायाम्.

४. अतप्यमाने (=स्वयम् अन्यैरपोड्यमाने अपि ) [ जनान् ] अवसा अवन्ती (=रक्षणेन रक्षन्त्यौ) देवपुत्रे (=देवाः पुत्रा ययोस्ते) रोदसी (=द्यावापृथिव्यौ ) [ वयम् ] अनु स्याम (=अनुभवेम=सेवेमहि) । उभे [युवां] देवानाम् अह्नाम् उभयेभिः (=द्योतमानैरहभी रात्रिभिश्चेत्युभयैः=द्योतमानेषु दिवसेषु च रात्रिषुच) हे द्यावापृथिवी (=द्यावापृथिव्यौ ), नः अभ्वाद् रक्षतम् (=अस्मान्पापात्पालयतम् ) ॥

५. संगच्छमाने (=परस्परं संगते ) युवती (=सदैव तरुण्यौ ) समन्ते (=समानपर्यन्ते ) स्वसारा (=स्वसारौ=परस्परं स्वसृसंबन्धयुक्ते ) जामी (=बन्धुभूते ) पित्रोरुपस्थे भुवनस्य नाभिम् अभि जिघ्रन्ती ( =स्वकीये पैतृक उत्सङ्गे भुवनस्य नाभिभूतमुदकमभिजिघ्रन्त्यौ=तस्याभिघ्राणं कुर्वत्यौ ) हे द्यावापृथिवी ( =द्यावापृथिव्यौ ), नः अभ्वाद् रक्षतम् (=अस्मान्पापात्पालयतम् ) ॥

---

अदिति म्हणजे द्यावापृथिवी असें ध्यानांत ठेवून अदितिशब्दाचा प्रयोग या मंत्रांत केला आहे.

४. [स्वतः] पीडारहित [असतांहि] रक्षणानें जनांचें पालन करणाऱ्या, [आणि] देव ज्यांचे पुत्र होत, अशा ज्या द्यावापृथिवी, त्यांचा अनुग्रह आम्हांवर होओ. तुम्ही दोघीहि देवीप्रमाणें दिवसास आणि रात्रीस हे द्यावापृथिवी हो, आम्हांला दुःखापासून रक्षा.

4. May we delight Heaven and Earth, the parents of the gods, they who themselves undistressed protect [others] with grace. May you both on both bright days and nights—may you both, o Heaven and Earth, preserve us from calamity.

५. परस्परसंबद्ध, सदातरूण, समानपर्यन्तक, परस्पर बहिणी, बंधुभूत, [आणि] भुवनाच्या नाभीला आपल्या पैतृक मांडीवर हुंगणाऱ्या अशा ज्या तुम्ही त्या हे द्यावापृथिवी हो, आम्हांला दुःखापासून रक्षा.

5. Those who are united each to the other, ever young, have common borders, are related as sisters [and] related as brothers, caress in their parental lap the navel of the universe (Rain-water), preserve us, o Heaven and Earth, from calamity.

---

४. 'द्यावापृथिवींस कोण उपद्रव करीत नाहीं, तरी दुसऱ्या कोणास उपद्रव झाला म्हणजे त्याला रक्षणारे असे जे देवांचे आईबाप ते आम्हांवर प्रसन्न होओत. हे द्यावापृथिवी हो, तुम्ही उभयतां रात्रीं आणि दिवसाला आम्हांस दुःखापासून रक्षा.'

५. 'भुवनाच्या नाभीला'='भुवनस्य नाभिम्.' म्हणजे मेघोदक असें सायण म्हणतात. 'भुवनस्य नाभिः,' अथवा 'पृथिव्या नाभिः' हे शब्द उत्तरवेदीचा मध्यभाग या अर्थी ऋग्वेदांत बरेच ठिकाणीं आलेले आहेत. (सू. १६४ मं. ३४, ३५ पहा). सू. ५९ मं. १ यांत वैश्वानर अग्नीला 'नाभिः क्षितीनाम्' असें म्हटलें आहे. तेव्हां प्रस्तुत मंत्रांतहि कदाचित् 'भुवनस्य नाभिम्' म्हणजे सूर्यरूपानें अथवा वैद्युत अग्नीच्या रूपानें विद्यमान असणारा जो अग्नि, तो घ्यावयाचा असेल.

'समानपर्यन्तक'='समन्ते.' म्हणजे दोघींच्या सीमा एकमेकांस लागलेल्या आहेत, किंवा जेथें एकीची सीमा संपते तेथें दुसरीच्या सीमेला आरंभ होतो.

उर्वी सद्मनी बृहती ऋतेन हुवे देवानामवसा जनित्री ।
दधाते ये अमृतं सुप्रतीके द्यावा रक्षतं पृथिवी नो अभ्वात् ॥६॥
उर्वी इति । सद्मनी इति । बृहती इति । ऋतेन । हुवे । देवानाम् ।
अवसा । जनित्री इति ।
दधाते इति । ये इति । अमृतम् । सुप्रतीके इति सुऽप्रतीके । द्यावा ।
रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥ ६ ॥

उर्वी पृथ्वी बहुले दूरेअन्ते उप ब्रुवे नमसा यज्ञे अस्मिन् ।
दधाते ये सुभगे सुप्रतूर्ती द्यावा रक्षतं पृथिवी नो अभ्वात् ॥७॥
उर्वी इति । पृथ्वी इति । बहुले इति । दूरेअन्ते इति दूरेऽअन्ते ।
उप । ब्रुवे । नमसा । यज्ञे । अस्मिन् ।
दधाते इति । ये इति । सुभगे इति सुऽभगे । सुप्रतूर्ती इति सुऽप्र-
तूर्ती । द्यावा । रक्षतम् । पृथिवी इति । नः । अभ्वात् ॥ ७ ॥

---

## भाषायाम्.

६. उर्वी (=उर्व्यौ=विस्तीर्णे) बृहती (=बृहत्यौ=महत्यौ) सद्मनी (=सद्मभूते) देवानां जनित्री (=देवानां जनित्र्यौ=पितरौ) ऋतेन (=यज्ञेन) अवसा (=प्रेम्णा) [च] हुवे (=आह्वयामि)। ये सुप्रतीके (=सुरूपे) [जनित्र्यौ] अमृतं दधाते (=अमृतत्वं धारयतः=मोक्षं धारयतः)। —हे द्यावापृथिवी (=द्यावापृथिव्यौ), नः अभ्वाद् रक्षतम् (=अस्मान् पापात्पालयतम्) ॥

७. उर्वी (=उर्व्यौ=विस्तीर्णे) पृथ्वी (=पृथ्व्यौ) बहुले (=महत्यौ) दूरेअन्ते (=अपारे) [द्यावापृथिव्यौ] अस्मिन् यज्ञे नमसा (=स्तोत्रेण) हुवे (=आह्वयामि)। ये सुभगे (=शोभनभाग्ये) सुप्रतूर्ती (=शोभनवितरणे=महोदारे) दधाते (=सर्वान् धारयतः)। —हे द्यावापृथिवी (=द्यावापृथिव्यौ), नः अभ्वाद् रक्षतम् (=अस्मान् पापात्पालयतम्) ॥

६. विस्तीर्ण [ आणि] महान् आधारभूत जे देवांचे आईबाप त्यांला मी यज्ञाच्या योगानें आणि प्रेमानें बोलावितों; जे रूपवान् होत्साते अमृत धारण करितात.— हे द्यावापृथिवी हो, आम्हांला दुःखापासून रक्षा.

6. I invoke with sacrifice [ and ] with devotion the parents of the gods, who are vast and extensive asylums ; the beautiful [ parents ] who contain immortality [ in them ].— Preserve us, o Heaven and Earth, from calamity.

७. विस्तीर्ण, अफाट, महान् [ आणि] अपार [अशा ज्या द्यावापृथिवी ] त्यांस मी या यज्ञांत स्तोत्रानें स्तवितों; ज्या सौभाग्यसंपन्न [ आणि ] महोदार होत्सात्या [ सर्वांस ] धारण करितात.— हे द्यावापृथिवी हो, आम्हांला दुःखापासून रक्षा.

7. I invoke with a hymn in this sacrifice the vast, broad, great [ and ] far-extending [ Heaven and Earth ]; who, blessed [ and ] bounteous, support [ all ]. Preserve us, o Heaven and Earth, from calamity.

६. ‘ आधारभूत ’=‘ सद्मनी.’ म्हणजे जेथें सर्वांस आश्रय मिळतो अशा.

‘ अमृत धारण करितात ’=‘ अमृतं दधाते.’ सायण म्हणतात कीं, येथें अमृत म्हणजे उदक होय. ‘ अमृत ’ याचा ‘ अमरत्व ’ हा अर्थ वेदांत प्रसिद्ध आहे.

**देवान्वा यच्चकृमा कच्चिदागः सखायं वा सदमिज्जास्पतिं वा ।**
**इयं धीर्भूया अवयानमेषां द्यावा रक्षतं पृथिवी नो अभ्वात् ॥ ८ ॥**

देवान् । वा । यत् । चकृम । कत् । चित् । आगः । सखायम् । वा ।
सदम् । इत् । जाःपतिम् । वा ।
इयम् । धीः । भूयाः । अवऽयानम् । एषाम् । द्यावा । रक्षतम् ।
पृथिवी इति । नः । अभ्वात् ॥ ८ ॥

**उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम् ।**
**भूरि चिदर्यः सुदास्तरायेषा मदन्त इषयेम देवाः ॥ ९ ॥**

उभा । शंसा । नर्या । माम् । अविष्टाम् । उभे इति । माम् । ऊती इति ।
अवसा । सचेताम् ।
भूरि । चित् । अर्यः । सुदाःऽतराय । इषा । मदन्तः । इषयेम । देवाः ।
॥ ९ ॥

---

## भाषायाम्.

८. यत् कच्चित् आगः (=यद्यत्किमपि आगः=यं यम् अपराधं ) देवान् [ प्रति ] चकृम (=वयं कृतवन्तः स्मः ) सखायं [ प्रति ] वा सदमित् जास्पतिं [ प्रति ] वा (=सदैव जायापतिं जामातरं प्रति वा ) [ अपराधं चकृम ] एषां (=तेषामपराधानाम् ) इयं धीः (=एषास्माभिः क्रियमाणा स्तुतिः) अवयानम् (=अपगमनं=निरसनं) भूयाः (=भूयात्=भवतु ) । हे द्यावापृथिवी (=द्यावापृथिव्यौ ), नः अभ्वाद् रक्षतम् (=अस्मान् पापात्पालयतम् ) ॥

९. शंसा (=शंसौ=शंसनीयौ ) उभा (=उभौ ) नर्या (=नर्यौ=नराणां हितौ ) [ द्यावापृथिवीरूपमातापितरौ ] माम् अविष्टाम् ( =मां रक्षताम् ) । उभे ऊती (=रक्षके=द्यावापृथिव्यौ ) अवसा मां सचेतां (=प्रीत्या मम सहाये भवताम्) । हे देवाः, अर्यः (=स्तोतारो ) [ वयं ] [ स्वयम् ] इषा मदन्तः ( =अन्नेन माद्यन्तः=युष्माभिर्दत्तयान्नसंपदा हृष्यन्तः ) सुदास्तराय भूरि चित् इषयेम (=शोभनहविरन्नदानोपेताय यजमानाय बहुलमन्नादिकं प्रापयेम ) ॥

---

८. ' जांवयाचे '='जास्पतिम्.' हा अर्थ सायणास अनुसरून केला आहे तो योग्य आहे असें आम्हांस वाटतें. कारण ' जांवई ' हा मराठी शब्द ' जास्पति '

८. आम्हीं जे देवांचे कांहीं अपराध केले असतील, अथवा मित्राचे अथवा कधीं तरी जांवयाचे [ अपराध केले असतील ] त्यांचें प्रायश्चित्त हें स्तोत्र होओ.— हे द्यावापृथिवी हो, आम्हांला दुःखापासून रक्षा.

8. Whatever sins we have committed against the gods, or against a friend or ever against a soninlaw, may this hymn be an atonement for them. Preserve us, o Heaven and Earth, from calamity.

९. स्तुत्य आणि मनुष्यांचें हित करणारे हे उभय [आईबाप] मला रक्षोत. रक्षण करणाऱ्या ह्यां उभय [ द्यावापृथिवी] मला कृपाकरून पाठबळ होओत. हे देव हो, स्तोत्र करणारे जे आम्ही ते [ स्वतः ] अन्नानें हर्ष पावणारे होत्साते सुदानशाली यजमानाला पुष्कळ [ संपत्ति ] प्राप्त करून देऊं असें करा.

9. May they, both praise-worthy [ and ] beneficent to mankind, protect me. May both the protectors be with me graciously. Praying may we, ourselves delighted with food, obtain o gods, much for the bounteous sacrificer.

---

या शब्दापासून निघाला आहे असें म्हणण्यास कांहीं अडचण नाहीं. आणि हें जर खरें असेल तर जांवई या शब्दाचा मराठींत जो अर्थ आहे, तोच जास्पतीचा मूळ अर्थ संस्कृतांत असावा. जास्पति हा शब्द ऋग्वेदांत आणखी एकच वेळ (ऋ.७.३८.६ ) यांत आला आहे, पण तेथें सायणाचार्यांनीं त्याचा 'प्रजानां पालकः' असा अर्थ केला आहे. 'जास्पत्य' असा एक शब्द ऋग्वेदांत दोन ठिकाणीं आढळतो. (ऋ.५.२८.३ आणि ऋ. १०.८५.२३). यांत जामात याचा संबंध असा न करितां जाया आणि पति यांचा संबंध किंवा 'दांपत्य' असा केला आहे; तथापि 'जांवई' याचें मूळ 'जास्पति' हें नसतां दुसऱ्या कोणत्या तरी शब्दांत आहे असें जोंपर्यंत सिद्ध झालें नाहीं, तोंपर्यंत 'जास्पति' म्हणजे 'जामात' आणि 'जास्पत्य' म्हणजे जामातृसंबंध असें मानणें योग्य आहे.

९. 'द्यावापृथिवी माझें रक्षण करोत. त्या मज स्तोत्याला विपुळ अन्नादिक धन देओत. आणि मजवर प्रसन्न होऊन माझ्या द्वारें या माझ्या यजमा-

नालाहि पुष्कळ धन देओत' अशी स्तोत्र रचणाऱ्या कवीची प्रार्थना या ऋचेंत आहे.

'देवे' म्हणून जे मंत्रपुष्पाच्या वेळीं वगैरे म्हणतात त्यांत हा मंत्र म्हणण्याची चाल आहे. आणि त्याचें कारण इतकेंच कीं, यांत 'देवाः' हें पद आलें आहे. हे 'देवे' तीस आहेत, म्हणजे ज्याच्या शेवटीं 'देवाः' हें पद आलें आहे असे तीस मंत्र ऋग्वेदसंहितेंतून जिकडून तिकडून घेऊन देवे म्हणत असतात. ते मंत्र येणेंप्रमाणें:—

१. नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नम आशिनेभ्यः। यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा वृक्षि देवाः॥ ऋ. १. २७. १३.

२. ममत्तु नः परिज्मा वसर्हा ममत्तु वातो अपां वृषण्वान्। शिशीतमिन्द्रापर्वता युवं नस्तन्नो विश्वे वरिवस्यन्तु देवाः॥ ऋ. १. १२२. ३.

३. कथा ते अग्ने शुचयन्त आयोर्ददाशुर्वाजेभिराशुषाणाः। उभे यत्तोके तनये दधाना ऋतस्य सामन्रणयन्त देवाः ऋ. १. १४७. १.

४. यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ऋ. १.१६४.५०. १०.९०.१६.

५. परा शुभ्रा अयासो यव्या साधारण्येव मरुतो मिमिक्षुः। न रोदसी अप नुदन्त घोरा जुषन्त वृधं सख्याय देवाः ऋ. १. १६७.४.

६. त्वे राय इन्द्र तोशतमाः प्रणेतारः कस्य चिदृतायोः। ते षु णो मरुतो मृळयन्तु ये स्मा पुरा गातूयन्तीव देवाः॥ १. १६९.५.

७. उभा शंसा नर्या मामविष्टामुभे मामूती अवसा सचेताम्। भूरि चिदर्यः सुदास्तरायेषा मदन्त इषयेम देवाः॥ १.१८५.९.

८. उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु। पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः॥ १. १८६.८.

९. तव साम पुरुवीरस्य शर्मन्नुरुशंसस्य वरुण प्रणेतः। यूयं नः पुत्रा अदितेरदब्धा अभि क्षमध्वं युज्याय देवाः ऋ. २. २८. ३

१०. दिवश्चिदा ते रुचयन्त रोका उषो विभातीरनु भासि पूर्वीः। अपो यदग्न उशधग्वनेषु होतुर्मन्द्रस्य पनयन्त देवाः॥ ऋ. ३. ६. ७

११. शंसा महामिन्द्रं यस्मिन्विश्वा आ कृष्टयः सोमपाः काममव्यन्। यं सुक्रतुं धिषणे विभ्वतष्टं घनं वृत्राणां जनयन्त देवाः॥ ३. ४९.१.

१२. त्रिरुत्तमा दूणशा रोचनानि त्रयो राजन्त्यसुरस्य वीराः। ऋतावान इषिरा दूळभासस्त्रिरा दिवो विदथे सन्तु देवाः॥ ३. ५६.८.

१३. नापाभूत न वोऽतीतृषामानिःशस्ता ऋभवो यज्ञे अस्मिन्। समिन्द्रेण मदथ सं मरुद्भिः सं राजभी रत्नधेयाय देवाः॥ ऋ. ४. ३४. ११.

१४. को वंस्त्राता वंसवः को वंरूता द्यावांभूमी अदिते त्रासींथां नः । सहींयसो वरुण मित्र मर्तात्को वोंऽध्वरे वरिंवो धाति देवाः ४. ५५. १.

१५. अप्रंतीतो जयति सं धनांनि प्रतिंजन्यान्युत या सजंन्या । अवस्यवे यो वरिंवः कृणोतिं ब्रह्मणे राजा तमंवन्ति देवाः ॥ ४. ५०. ९.

१६. त्वमपो यदंवे तुर्वशायारमयः सुदुघाः पार इन्द्र । उग्र मंयातमवंहो ह कुत्सं सं ह यद्वामुशनारंन्त देवाः ॥ ५. ३१.८

१७. मूर्द्धानं दिवो अंरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् । कविं सम्राजमतिंथिं जनांनामासन्ना पात्रं जनयन्त देवाः ॥ ६. ७. १.

१८. नाभिं यज्ञानां सदंनं रयीणां महामांहावमभि सं नंवन्त । वैश्वानरं रथ्यंमध्वराणां यज्ञस्यं केतुं जंनयन्त देवाः ॥ ६. ७. २.

१९. ते नों रायो द्युमतो वाजंवतो दातारों भूत नृवतः पुरुक्षोः । दशस्यन्तों दिव्याः पार्थिवासो गोजांता अप्यां मृळतां च देवाः ६. ५०. ११.

२०. ये के च ज्मा महिनो अहिंमाया दिवो जंज्ञिरे अपां सधस्थें । ते अस्मभ्यंमिषये विश्वमायुः क्षपं उस्रा वरिवस्यन्तु देवाः ॥ ६. ५२. १५.

२१. अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरंहूतौ सजोषाः । यः शंसंते स्तुवते धायिं पज्र इन्द्रंज्येष्ठा अस्माँ अंवन्तु देवाः॥ ८. ६३. १२.

२२. परि प्र धन्वेन्द्रांय सोम स्वादुर्मित्राय पूष्णे भगाय ॥ १॥ इन्द्रंस्ते सोम सुतस्यं पेयाः क्रत्वे दक्षाय विश्वे च देवाः ९. १०९, १.२.

२३. प्रयाजान्मे अनुयाजांश्च केवंलानूर्जस्वन्तं हविषो दत्त भागम् । घृतं चापां पुरुषं चौषधीनामग्नेश्च दीर्घमायुरस्तु देवाः १०. ५१. ८.

२४. ऐभिंर्ददे वृष्ण्या पौंस्यांनि येभिरौक्षंद्वृत्रहत्यांय वज्री । ये कर्मणः क्रियमाणस्य मह्न ऋतेकर्ममुदजांयन्त देवाः॥ १०. ५५. ७.

२५. अनृक्षरा ऋजवंः सन्तु पन्था येभिः सखांयो यन्ति नो वरेयम् । समर्यमा सं भगो नो निनीयात्सं जांस्पत्यं सुयमंमस्तु देवाः ॥ १०. ८५. २३.

२६. गृभ्णामिं ते सौभगत्वाय हस्तं मया पत्यां जरदंष्टिर्यथासः । भगो अर्यमा संविता पुरंधिर्मह्यं त्वादुर्गार्हंपत्याय देवाः ॥ १०. ८५. ३६.

२७. समंस्मिञ्जायंमान आसत ग्ना उतेमंवर्धन्नद्यः स्वगूर्ताः । महे यत्त्वां पुरूरवो रणायावंर्धयन्दस्युहत्यांय देवाः ॥ १०. ९५. ७

२८. ब्रह्मचारी चंरति वेविषद्विषः स देवानां भवत्येकमङ्गम् । तेनं जायामन्वविन्दद्बृहस्पतिः सोमेन नीतां जुह्वं १ न देवाः ॥ १०. १०९. ५.

२९. सद्यो जातो व्यंमिमीत यज्ञमग्निर्देवानांमभवत्पुरोगाः । अस्य होतुः प्रदिश्यृतस्यं वाचि स्वाहांकृतं हविरंदन्तु देवाः ॥ १०. ११०. ११.

**ऋतं दिवे तदवोचं पृथिव्या अभिश्रावार्य प्रथमं सुमेधाः ।**
**पातामवद्याद्दुरितादभीके पिता माता च रक्षतामवोभिः ॥ १० ॥**

ऋतम् । दिवे । तत् । अवोचम् । पृथिव्यै । अभिऽश्रावार्य । प्रथमम् । सुऽमेधाः ।
पाताम् । अवद्यात् । दुःऽइतात् । अभीके । पिता । माता । च । रक्षताम् । अवःऽभिः ॥ १० ॥

**इदं द्यावापृथिवी सत्यमस्तु पितर्मातर्यदिहोपब्रुवे वाम् ।**
**भूतं देवानामवमे अवोभिर्विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥३॥**

इदम् । द्यावापृथिवी इति । सत्यम् । अस्तु । पितः । मातः । यत् । इह । उपऽब्रुवे । वाम् ।
भूतम् । देवानाम् । अवमे इति । अवःऽभिः । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ११ ॥ ३ ॥

---

## भाषायाम्.

१०. तत् (=तस्मै हेतवे) सुमेधाः (=सुमेधावी कविरहं) दिवे पृथिव्यै (=द्यावापृथिवीभ्यां=तत्प्रीत्यर्थम्) ऋतं (=स्तोत्रम्) अभिश्रावाय (=अभिश्रवणाय=ते मामभ्यागत्य यथा शृणुयातां तथा) प्रथमं (=सर्वेभ्यो देवेभ्योपि पूर्वम्) अवोचम् (=अगायम्)। [ते] अवद्याद् (=दोषात्) [तथैव] दुरिताद् अभीके (=पापसकाशात्) पातां (=रक्षताम्)। माता पिता च (=मातापितृभूते द्यावापृथिव्यौ) अवोभिः (=संरक्षणै) रक्षतां (=पालयताम्) ॥

११. हे द्यावापृथिवी (=द्यावापृथिव्यौ), हे पितः, हे मातः, यद् इह वाम् उपब्रुवे (=वामुपेत्य युवयोः स्तोत्रमगायं) [तद्] इदं [स्तोत्रं] सत्यम् अस्तु (=सफलं भवतु)। अवोभिः (=संरक्षणैर्) देवानाम् अवमे भूतं (=सर्वेभ्योपि देवेभ्यः समीपतरे भवतम्)। [अपि च] वयम् इषम् (=अन्नं) वृजनं (=बलं) जीरदानुं (=क्षिप्रदानं) [वीरं पुत्रं च] विद्याम (=लभेमहि) ॥

१०. यास्तव द्यूनें आणि पृथिवीनें ऐकून घ्यावें म्हणून मी सुमेधावीनें त्यांजप्रीत्यर्थ प्रथम स्तोत्र गाइलें आहे. दोषापासून आणि पापापासून ते रक्षोत. पिता आणि माता प्रसादांनीं संभाळोत.

10. Therefore I the sage have first sung a hymn to Heaven and to Earth that they may hear [me]. May they save [us] from reproach, [save us] from sin. May the Father and the Mother preserve [us] with [their] favours.

११. हे पित्या द्यू, हे माते पृथिवी, हें जें स्तोत्र मी तुमची उपासना करून येथें म्हटलें आहे, तें सफळ होओ. तुम्ही [आपल्या] प्रसादांनीं [सर्व] देवांपेक्षां [आम्हांला] अत्यंत जवळच्या व्हा. [आणि] आम्हांला अन्न, बळ, [आणि] लवकर संपत्ति मिळवून देणारा [पुत्र], यांची प्राप्ति होओ.

11. o Heaven and Earth, may this [prayer] be fulfilled which, o Father, o Mother, I have addressed here unto you. Be you most accessible [to us] with [your] favours, of all the gods. May we obtain food, strength, [and] [a son] that shall quickly make us rich.

---

३०. इदं ते पात्रं सनवित्तमिन्द्र पिबा सोममेना शतक्रतो। पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्यन्ति देवाः॥ १०. ११२. ६.

वृत्तासाठीं तिसऱ्या पादांत 'सुदआस्तराय' असें म्हटलें पाहिजे.

---

१०. 'पापापासून'='दुरिताद् अभीकेः' सू. १२१ मं. १४ आणि टीप पहा.

## सूक्तम् १८६.

अगस्त्य ऋषिः । विश्वे देवा देवता । त्रिष्टुप् छन्दः ॥

**आ न इळाभिर्विदथे सुशस्ति विश्वानरः सविता देव एतु ।**
**अपि यथा युवानो मत्सथा नो विश्वं जगदभिपित्वे मनीषा ॥ १॥**

आ । नः । इळाभिः । विदथे । सुऽशस्ति । विश्वानरः । सविता । देवः । एतु ।
अपि । यथा । युवानः । मत्सथ । नः । विश्वम् । जगत् । अभिऽपित्वे । मनीषा ॥ १ ॥

**आ नो विश्व आस्क्रा गमन्तु देवा मित्रो अर्यमा वरुणः सजोषाः ।**
**भुवन्यथा नो विश्वे वृधासः करन्त्सुषाहा विथुरं न शवः ॥ २ ॥**

आ । नः । विश्वे । आस्क्राः । गमन्तु । देवाः । मित्रः । अर्यमा । वरुणः । सऽजोषाः ।
भुवन् । यथा । नः । विश्वे । वृधासः । करन् । सुऽसहा । विथुरम् । न । शवः ॥ २ ॥

---

## भाषायाम्.

१. विश्वानरः (=सर्वप्राणिहितकारी) देवः (=द्योतमानः) सविता सुशस्ति (=सुशस्ती=सुशस्त्या=शोभनस्तोत्रेण) इळाभिः (=अन्नैः सह=अस्मदर्थमन्नानि गृहीत्वा) नो विदथे (=अस्माकं यज्ञे) आ एतु (=आगच्छतु)। यथा (=येन प्रकारेण) हे युवानः (=सदातरुणा देवाः), [युष्माकम्] अभिपित्वे (=अभिगमने सति) मनीषा (=मनीषया=कृपया) नः विश्वं जगच्च मत्सथ (=मादयथ=हर्षयथ)॥ अत्रेदमुक्तं भवति। हे सवित्रादयो देवाः यूयमस्माकं स्तोत्रं श्रुत्वा अस्मदर्थमन्नानि गृहीत्वा नो यज्ञ आगच्छत। आगतेषु हि युष्मासु युष्मत्कृपया सर्वे जनास्तथा वयमपि हृष्टा भविष्याम इति ॥

२. मित्रः अर्यमा वरुणश् [चेति] सजोषाः (=संगता) आस्क्राः (=शत्रूणामास्कन्दयितारः=पराक्रमिणो) देवा नः आ गमन्तु (=अस्मान् आगच्छन्तु)। यथा (=येन प्रकारेण) विश्वे (=सर्वेपि ते) नो वृधासः (=अस्माकं वर्धयितारो) भुवन्

## सूक्त १८६.

ऋषि– अगस्त्य. देवता–विश्वे देव. वृत्त–त्रिष्टुभ्.

१. सर्वांचें कल्याण करणारा देदीप्यमान सविता चांगल्या स्तोत्राच्या योगानें आमच्या यज्ञांत अन्नें घेऊन येओ; कीं जेणेंकरून, हे अजर हो, तुम्ही येतांच आपल्या कृपेनें आम्हांला [आणि] सर्व जगताला हर्षवाल.

२. पराक्रमण करणारे सर्व देव–मित्र, अर्यमा, वरुण हे मिळून–आम्हांप्रत येओत; कीं जेणेंकरून ते सर्व आमचे उत्कर्षक होतील [आणि] आमचें बळ सर्वजण मिळून क्षीण होऊं देणार नाहींत.

## Hymn 186.

To *Vis've Devas* (*All the gods* taken collectively). By *Agastya.* Metre—*Trishṭubh.*

1. May resplendent Savitâ, the benefactor of all men, come to our sacrifice through the good hymn bringing food [ for us ] ; so that you may, o ever youthful [ gods ], so soon as you arrive, gladden us, [gladden] the whole world, by [ your ] kindness.

2. May all the victorious gods come unto us—Mitra, Aryamâ and Varuṇa, all joined; so that they may all be our promoters, and may not together render our power frail.

---

१. ' हे सवित्या, तूं आणि इतर देव मिळून आमचें स्तोत्र ऐकून आम्हांसाठीं सर्व प्रकारचीं अन्नें घेऊन आमच्या यज्ञांत या; कारण तुम्ही आलां म्हणजे तुम्ही आम्हांवर कृपा केली म्हणून आम्हांस आणि सर्व जगतास आनंद होईल.'

' अन्नें घेऊन '=' इळाभिः.' सू. ४८ मं. १६ आणि त्याजवरील टिपा पहा.

' अजर '=' युवानः.' प्राचीन आर्य लोकांचे देव म्हटले म्हणजे बहुतकरून सूर्यादिक जीं तेजें तद्रूप असत. आणि हे देव नित्य उगवून मनुष्यांच्या दृष्टीस पडून जातात, व पुनः येतात; असा क्रम नित्य चालला असतांहि ते कधींच म्हातारे होत नाहींत. म्हणून त्यांस अजर अथवा म्हातारे न होणारे आणि ते कधींहि मरत नाहींत म्हणून त्यांस अमर असें म्हणत असत. अजरत्वाचें आणि अमरत्वाचें जें येथें कारण सांगितलें तें, प्राचीन आर्यांचे देव म्हणजे सूर्यादिक नित्य तेजें होत, असें संस्कृतावरून समजतें म्हणून उघड होतें. ग्रीक, रोमन इत्यादिक लोकांचे जे प्राचीन देव तेहि जरी अजर आणि अमर असत, तरी त्यांच्या अजरत्वाची आणि अमरत्वाची उपपत्ति त्या लोकांस सांगतां आली नसती.

**प्रेष्ठं वो अतिथिं गृणीषेऽग्निं शस्तिभिस्तुर्वणिः सजोषाः ।**
**असद्यथा नो वरुणः सुकीर्तिरिषश्च पर्षदरिगूर्तः सूरिः ॥ ३ ॥**

प्रेष्ठम् । वः । अतिथिम् । गृणीषे । अग्निम् । शस्तिऽभिः । तुर्वणिः । सऽजोषाः ।
असत् । यथा । नः । वरुणः । सुऽकीर्तिः । इषः । च । पर्षत् । अरिऽगूर्तः । सूरिः ॥ ३ ॥

**उप व एषे नमसा जिगीषोषासानक्ता सुदुघेव धेनुः ।**
**समाने अहन्विमिमानो अर्कं विषुरूपे पयसि सस्मिन्नूधन् ॥४॥**

उप । वः । आ । ईषे । नमसा । जिगीषा । उषसानक्ता । सुदुघाऽइव । धेनुः ।
समाने । अहन् । विऽमिमानः । अर्कम् । विषुऽरूपे । पयसि । सस्मिन् । ऊधन् ॥ ४ ॥

---

(=भवेयुः) [ यथा च ] सुसहा (=सुष्ठु यथा तथा सममेव) [अस्माकं] शवः (=बलं) विथुरं न करन् ( =विहीनं न कुर्युः ) ॥

यथास्माकं बलं वर्धयेयुर्न तु तद्विहीनं कुर्युस्तथा सर्वेपि देवा मित्रार्यमवरुणादयः संगता भूत्वास्मान् प्रति आगच्छन्त्वित्यर्थः ॥

---

## भाषायाम्.

३. [ हे ऋत्विजः ], [ योग्निस् ] तुर्वणिः (=शत्रुजित् ) [ तथा ] शस्तिभिः सजोषाः (=स्तोत्रैर्युक्तो ) [ भवति तं ] वः (=युष्माकं ) प्रेष्ठम् (=अतिशयेन प्रियम् ) अतिथिम् अग्निं गृणीषे (=स्तौमि ) । यथा सुकीर्तिः (=सुश्लोको ) वरुणो नः (=अस्मदीयः ) असत् (=भवेत् ) च (=अपि च ) सूरिः (=प्रज्ञावान्) अरिगूर्तः (=स्तोतृभिः स्तुतः ) [ सन् ] इषः पर्षत् ( =अन्नान्यापूरयेत्=बहून्यन्नानि प्रयच्छेत् ) ॥

एतदुक्तं भवति । अहम् अग्निं वरुणं च स्तौमि यथा तौ अस्मान् प्रत्यागत्य अस्मदनुकूलौ भूत्वा बहून्यन्नानि प्रयच्छताम् ॥

४. [ये] उषासानक्ता (=उषा रात्रिश्च) धेनुरिव सुदुघा (=सुखेन दोग्धुं शक्या) [ ते ] वः (=युवां प्रति ) नमसा जिगीषा (=स्तोत्रेण धनजिगीषया च सह) उप आ ईषे ( =अभ्यागच्छामि ) । सस्मिन् ऊधन् ( =एकस्मिन्नेवोधसि ) विषुरूपे पयसि ( =नानारूपे दुग्धे सति ) समाने अहनि ( =एकस्मिन्नेव दिने ) अर्कं विमिमानः (=स्तोत्रं निर्मिमाण ) [ उप आ ईषे ] ॥

३. तुमचा अत्यंत प्रिय पाहुणा, विजयशाली [ आणि ] स्तोत्रांनीं युक्त असा जो अग्नि, त्याला मी स्तवितों; कीं जेणेंकरून सुश्लोक आणि प्रज्ञावान् वरुण आमचा होईल आणि स्तोत्यांनीं स्तविलेला होत्साता पुष्कळ अन्नसंपत्ति देईल.

3. I praise your dearest guest Agni, [who is] victorious, [ and ] is honoured with hymns; so that well-praised Varuṇa may be ours, and he, the wise and praised of the pious, may bestow abundance of food.

४. जी उषा आणि जी रात्र दुभत्या गाईप्रमाणें होत त्या तुम्हांप्रत मी स्तोत्रासहित आणि धन जिंकण्याच्या इच्छेनें येतों. मी एकाच कासेंत अनेक प्रकारचें दूध असतां एकाच दिवशीं निरनिराळीं स्तोत्रें करीत [तुम्हांप्रत येतों].

4. To you, o Ushas and night who are easy to milk like a milchcow, I come with a song and a desire to win; composing a hymn the same day when milk of various kinds is in the same udder.

---

२. 'मित्र,' 'अर्यमा,' आणि 'वरुण' हे कोण आहेत याविषयीं सू. २ मं. ७ आणि सू. २६ मं. ४ आणि त्यांजवरील टिपा पहा.

---

३. 'हे मित्र हो, मी अग्नि आणि वरुण यांस स्तवितों, कीं जेणेंकरून वरुण येऊन आमचाच जणुं होईल, आणि आम्हांस पुष्कळ अन्नसंपत्ति देईल.'

या मंत्राच्या पूर्वार्धांत वरुणाचें आणि उत्तरार्धांत अग्नीचें नांव नाहीं तरी अग्नि आणि वरुण यांस मी बोलावितों आणि ते दोघेहि येऊन आम्हांस अन्नसंपत्ति देओत, असें विवक्षित आहे. कोठून तरी अग्नीचें आणि वरुणाचें नांव मंत्रांत आणावें इतकेंच तात्पर्य आहे; आणि पहिल्या ऋचेंत तरी 'सविता' आणि सर्व अजर देव यांविषयींहि असेंच समजलें पाहिजे.

४. या ऋचेंत 'उषासानक्ता' (म्हणजे उषा आणि रात्र) या दोन देवोंविषयीं सांगितलें आहे. आणि पूर्वीप्रमाणें येथें तरी त्यांचें नांव कसेंतरी मंत्रांत यावें याहून दुसरा उद्देश कवीचा नाहीं; म्हणजे त्यांचें नांव ऋचेंत गोवणें या उद्देशाहून त्यांजविषयीं काय म्हणावयाचें ही गोष्ट कमी महत्त्वाची मान-

उत नोऽहिर्बुध्न्यो३ मयस्कः शिशुं न पिप्युषीव वेति सिन्धुः ।
येन नपातमपां जुनाम मनोजुवो वृषणो यं वहन्ति ॥ ५ ॥ ४ ॥

उत । नः । अहिः । बुध्न्यः । मयः । करिति कः । शिशुम् । न । पिप्युषीऽइव । वेति । सिन्धुः ।
येन । नपातम् । अपाम् । जुनाम । मनःऽजुवः । वृषणः । यम् । वहन्ति ॥ ५ ॥ ४ ॥

---

समाने इत्यादि दुर्बोधम् । सायण एवं व्याचष्टे । किं कुर्वन् । सस्मिन् समाने ऊधन् ऊधस्युत्पन्ने विषुरूपे नानारूपे पयसि क्षीरघृतादिकेऽकेमर्चनीयमन्नं चरुपुरोडाशादिकं विमिमानः । विविधं मिमानः । कस्मिन्काले । समानेऽहन् । षष्ठेऽहनि एकस्मिन्नेवाहनि सर्वदैव वेत्यर्थः । एकस्मिन्नेवाहनि समान ऊधस्युत्पन्ने नानारूपे पयसि त्वदर्थं हविर्मिमान उपगच्छामीत्यर्थः । यद्वा सस्मिन् सर्वस्मिन्नूधसि फलाख्यक्षीरोत्पादके यज्ञे निमित्तभूते सति विषुरूपे पयसे नानारूपे सोमलक्षणोदकेऽकेमन्त्रसाधनं स्तोत्रं विमिमानोऽहं युष्मानभि गच्छामि । इति ॥

---

## भाषायाम्.

५. उत (=अपि च) अहिर्बुध्न्यः (=एतन्नामको देवो) नो मयस्कः (=अस्मभ्यं सुखं करोतु)। पिप्युषी [धेनुः] शिशुम् इव (=पयसा वर्धयित्री गौर्यथा वत्समेति तथा) सिन्धुर्वेति (=सिन्ध्वभिमानिनी देवी अस्मान् प्रति आगच्छति=आगच्छतु)। येन [अहिर्बुध्न्यस्य सिन्धोश्चागमनेन] अपां नपातम् (=उदकानां पुत्रमग्निं) जुनाम (=अस्मान् प्रति प्रापयेम=आगमयेम) यम् [अग्निं] मनोजुवो वृषणः (=मनोवद्वेगवन्तो बलवन्तश्चाश्वा) वहन्ति ॥

अहिर्बुध्न्यो देवः सिन्धुश्चेत्येतावागच्छताम् । तयोरागतयोर्हि अग्निरप्यागमिष्यतीति भावः ॥

अहिरन्तरिक्षगाम्यहन्ता वाहीनो वाहन्यमानो वैतन्नामको देवः। स एव बुध्न्यः। बुध्नं बन्धकमन्तरिक्षम् । तदर्हतीति बुध्न्योऽन्तरिक्षचार्येतन्नामको देवः । इति सायणः ॥

---

लेली आहे. त्यामुळें 'उषासानक्ता' यांचें नांव ऋचेंत आलें आहे हें उघड दिसतें, पण त्याजविषयीं जें कांहीं सांगितलें आहे तें उत्तरार्धात तरी निदान स्पष्ट समजत नाहीं; कारण 'एकाच कासेंत इ०' हा भाग दुर्बोध आहे. अक्षरशः भाषांतर केलें आहे.

५. आणि अहिर्बुध्न्य आमचें कल्याण करो. दूध पाजणारी गाय वत्साप्रत येते त्याप्रमाणें सिन्धु आम्हांप्रत येओ; कीं जेणेंकरून आम्हीं उदकांच्या पुत्राला इकडे आणूं, ज्याला मनासारिखे वेगवन्त जवान घोडे वाहत असतात.

5. And may Ahir-Budhnya grant us happiness, [and] may Sindhu come to us even as a fattening cow [comes] to her calf; so that we may hasten hither the son of the waters, who is carried on young horses swift as the mind.

---

५. यांत इतकेंच सांगितलें आहे कीं, 'अहिर्बुध्न्य,' 'सिन्धु,' आणि 'वैद्युत अग्नि' हे देव येओत.

'अहिर्बुध्न्य.' हा एक देव वेदांत बराच प्रसिद्ध आहे. 'अहिर्बुध्न्य' या नांवाचा अर्थ सायण 'अंतरिक्षांतील अहि या नांवाचा देव' असा करितात. ऋ. २. ३१. ६ हेंहि सूक्त विश्वेदेवांविषयींच आहे त्यांत त्याचें आह्वान 'अज एकपाद्,' 'सविता,' 'अपां नपात्' या देवांबरोबर केलें आहे. ऋ. ५. ४१ हेंहि सूक्त विश्वेदेवांविषयीं आहे, त्याच्या १६व्या मंत्रांत अहिर्बुध्न्याचें आह्वान मरुतांबरोबर केलें आहे, आणि तो आम्हांस शत्रूच्या स्वाधीन न करो अशी ऋषीनें प्रार्थना केली आहे. ऋ. ६. ४९या वैश्वदेवसूक्ताच्या १४व्या मंत्रांत 'पर्वत,' 'सविता,' 'भग' यांजबरोबर त्याची स्तुति केली आहे. ऋ. ६. ५० हेंहि वैश्वदेव सूक्त आहे. त्याच्या १४व्या मंत्रांत 'अज एकपाद्,' 'पृथिवी,' 'समुद्र,' 'विश्वेदेव' यांजबरोबर त्याची प्रार्थना केली आहे. ऋ. ७. ३४ हेंहि सूक्त वैश्वदेव आहे. त्यांतील १७व्या मंत्रांत 'अहिर्बुध्न्य' आम्हांस शत्रूच्या स्वाधीन न करो अशी प्रार्थना आहे. ऋ. ७. ३५ हेंहि वैश्वदेव आहे. त्याच्या १३वे मंत्रांत 'अज एकपाद्,' 'समुद्र,' 'अपां नपात्,' 'पृश्नि' यांजबरोबर त्याची प्रार्थना आहे. ऋ. ७. ३८ कितीएक देवांविषयीं आहे. त्याच्या ५व्या मंत्रांत वरूत्री देवीसहित त्याची प्रार्थना आहे. ऋ. १०. ६४ हेंहि सूक्त वैश्वदेव आहे. त्यांतील ४थ्या मंत्रांत त्याची प्रार्थना 'बृहस्पति,' 'अज एकपाद्' यांच्या बरोबर केली आहे. ऋ. १०. ६६ हेंहि वैश्वदेव होय. त्यांतील ११ व्या मंत्रांत 'समुद्र,' 'सिन्धु,' 'अन्तरिक्ष,' 'अज एकपाद्' आणि 'तनयित्नु' (=मेघ) यांजबरोबर प्रार्थना केली आहे. ऋ. १०. ९२ हेंहि वैश्वदेव आहे. त्यांतील १२व्या मंत्रांत 'सूर्य,' 'चंद्र,' 'पृथिवी' आणि 'द्युदेव' यांजबरोबर 'त्याची' प्रार्थना केली आहे.

उत नं ईं त्वष्टा गन्त्वच्छा स्मत्सूरिभिरभिपित्वे सजोषाः ।
आ वृत्रहेन्द्रश्चर्षणिप्रास्तुविष्टमो नरां न इह गम्याः ॥ ६ ॥

उत । नः । ईम् । त्वष्टा । आ । गन्तु । अच्छ । स्मत् । सूरिऽभिः । अभिऽपित्वे । सऽजोषाः ।
आ । वृत्रऽहा । इन्द्रः । चर्षणिऽप्राः । तुविःऽतमः । नराम् । नः । इह । गम्याः ॥ ६ ॥

## भाषायाम्.

६. उत (=अपि च) त्वष्टा (=एतन्नामको देवोपि) नः ईम् अच्छ आ गन्तु (=तान् अस्मान् उपागच्छतु) [अपि च] अभिपित्वे (=अभ्यागमने=आगमने=आगमनकाले) स्मत् सूरिभिः सजोषाः (=प्रज्ञावद्भिर्देवैः सहितः सन्) [आगच्छतु]। [तथैव] वृत्रहा (=वृत्रहननकारी) चर्षणिप्राः (=मनुष्याणां मनोरथस्य पूरको) नरां तुविष्टमः (=सर्वेषु शूरेषु मध्ये बलवत्तम) इन्द्रो नः इह आ गम्याः (=इन्द्रोप्यत्रास्मानागच्छतु)॥

स्मत् सहार्थे। सायणस्तु स्मत्सहार्थे प्राशस्त्ये वा वर्तते। अत्र प्रशंसायाम्। प्रशस्तं यथा तथेति॥

त्याच्या पुढचें ९३वें सूक्त वैश्वदेवच आहे; त्यांतील ५व्या मंत्रांत 'सूर्य' आणि 'चंद्र' यांजबरोबर प्रार्थना केली आहे. ऋ.४. ५५ हेंहि विश्वेदेवांविषयींच आहे. त्यांतील ६व्या मंत्रांत 'द्यावापृथिवी' यांजबरोबर त्याची प्रार्थना केलेली आहे.

याशिवाय दुसऱ्या ठिकाणीं ऋग्वेदांत 'अहिर्बुध्न्य' आलेला नाहीं. वर सांगितलें आहे त्यावरून उघड होतें कीं, 'अहिर्बुध्न्य' याजविषयीं स्वतंत्र सूक्त नाहीं; आणि त्याचें नांव जेथें जेथें आलें आहे, तीं सर्व सूक्तें 'विश्वेदेव' यांजविषयीं आहेत; आणि त्याची प्रार्थना येते ती 'अज एकपाद्' इत्यादिक महत्त्वाच्या पण अप्रसिद्ध देवांबरोबर येते; आणि त्याजविषयीं कथा, इतिहास वगैरे इतर देवांच्या सारिखा कांहीं नाहीं.

'अहिर्बुध्न्य' याची व्युत्पत्ति सांगून सायणांनीं कोठकोठें अंतरिक्षांत झालेला अग्नि असा त्याचा पर्यवसित अर्थ केला आहे. (उदाहरणार्थः– ऋ. ७.३८.५ याजवर 'उत अपि च अहिर्बुध्न्यः बुध्ने अन्तरिक्षे भवः बुध्न्यः एतीत्यहिः। एतत्पदद्वयाभिधः मध्यमस्थानः अग्निः अहिर्बुध्न्य इत्युच्यते.')

'सिन्धु' म्हणजे सिन्धुरूप देवता.

६. आणि त्वष्टाहि आम्हांप्रत येओ, आणि येतांना प्रज्ञावंत [देवां]सहित [येओ]. वृत्राला मारणारा, मनुष्यांचे मनोरथ पूर्ण करणारा [ आणि ] शूरांमध्यें अत्यंत पराक्रमी इन्द्र येथें आम्हांप्रत येओ.

6. And may Tvashtâ come unto us, and when coming may he come accompanied by the wise [ gods ]. May Indra, the killer of Vṛitra, the gratifier of men's wishes and the most mighty of [ all ] heroes, come here unto us.

---

आतां सिन्धु म्हणजे येथें सिन्धुनदी समजावयाची, किंवा समुद्र समजावयाचा याविषयीं संशय आहे. कारण वेदांत सिन्धुनदीरूप देवतेचा निर्देश जसा सिन्धुशब्दानें झालेला आहे तसाच समुद्ररूप देवतेचाहि निर्देश 'सिन्धु' शब्दानें झालेला आढळतो. उदाहरणार्थ, सू. ९४ मं. १६ यांत समुद्राभिमानी देव 'सिन्धु' शब्दानें घ्यावयाचा आहे. ऋ. १०.७५.२,४,६ यांत 'सिन्धु' शब्दानें सिन्धुनदीरूप जी देवी तिचा निर्देश आहे. सू. १२२ मं. ६ आणि त्याजवरील टीप हींहि पहा.

'उदकांच्या पुत्राला'=' अपां नपातम्.' सू. १२२ मं. ४ आणि टीप पहा.

---

६. 'त्वष्टा इतर देवांस घेऊन येओ, आणि इंद्रहि येओ,' असा भावार्थ.

'त्वष्टा' सू. १४२ मं. १० आणि टीप पहा.

वृत्रासाठीं 'ईइं' असें 'ई' बद्दल, आणि 'गन्त्वच्छा' बद्दल 'गन्तु अच्छा,' आणि 'आ वृत्रहा इन्दरश्चर्षणिप्रा' असें म्हणावें.

**उत नं ईं मतयोऽश्वयोगाः शिशुं न गावस्तरुणं रिहन्ति ।**
**तमीं गिरो जनयो न पत्नीः सुरभिष्टमं नरां नसन्त ॥ ७ ॥**

उत । नः । ईम् । मतयः । अश्वऽयोगाः । शिशुम् । न । गावः । तरुणम् । रिहन्ति ।

तम् । ईम् । गिरः । जनयः । न । पत्नीः । सुरभिःऽतमम् । नराम् । नसन्त ॥ ७ ॥

**उत न ईं मरुतो वृद्धसेनाः स्मद्रोदसी समनसः सदन्तु ।**
**पृषदश्वासोऽवनयो न रथा रिशादसो मित्रयुजो न देवाः ॥८॥**

उत । नः । ईम् । मरुतः । वृद्धऽसेनाः । स्मत् । रोदसी इति । सऽमनसः । सदन्तु ।

पृषत्ऽअश्वासः । अवनयः । न । रथाः । रिशादसः । मित्रऽयुजः । न । देवाः ॥ ८ ॥

---

## भाषायाम्.

७. उत (=अपि च) अश्वयोगाः ( =अश्वानामिव योगोन्योन्ययोजनं यासां ताः =अश्वा इव संयुक्ता) मतयः (=सुमतयः=इन्द्रस्यानुग्रहात्मिका बुद्धयो ) न ईम् (=अस्मानिमान्=पूर्वोक्तान् अस्मान् ) तरुणं शिशुं गावो न (=अल्पं वत्सं गावो यथा लिहन्ति तद्वत् ) रिहन्ति (=लिहन्ति=लिहन्तु ) । तम् ईं (=तमेनं=तमिन्द्रं च) नरां सुरभिष्टमं (=नृणां शूराणां मध्येतिशयेन सुरभिं काम्यं ) गिरः ( =अस्माभिः कृताः स्तुतयः) पत्नीर्जनयो न (=पतिमत्यः स्त्रिय इव=भार्याः पतिमिव ) नसन्त (= संगच्छन्ते=संगच्छन्तां=व्याप्नुयुः=तेन सह संश्लिष्टा भवन्तु ) ॥

इन्द्रस्य कृपा गौर्वत्समिवास्मान् लेढु । अस्माकं स्तुतिश्चेन्द्रं भार्या पतिमिव संगच्छतामिति भावः ॥

८. उत ( =अपि च) वृद्धसेनाः ( =प्रवृद्धबला ) मरुतः स्मत् रोदसी ( =द्यावापृथिव्यौ च ) समनसः ( =समानमनस्काः=एकमनसः ) [ सन्तो ] न ईम् ( =अस्मान् इमान्=पूर्वोक्तान् अस्मान् ) [ आगम्य ] सदन्तु ( =निषीदन्तु ) । [ ते ] पृषदश्वासः ( =पृषदश्वाः =पृषत्य एव अश्वा येषां ते ) [ भवन्ति ] । [ तेषां ] रथा

७. आणि घोड्यांप्रमाणें एकमेकांस जोडिलेल्या ज्या इन्द्राच्या कृपा, त्या लहान वत्साला जशा गाई चाटितात तशा आम्हांला चाटोत. आणि सकळ वीरांमध्यें अत्यंत प्रिय असा जो तो [इन्द्र] त्याला, स्त्रियांनीं पतीला आलिंगिल्याप्रमाणें, आमच्या स्तुति आलिंगोत.

८. आणि ज्यांचें बळ मोठें आहे ते मरुत् एक मनानें, द्यावापृथिवींसहित, येऊन आम्हांजवळ बसोत. [त्यांच्या] रथास टिपक्याटिपक्यांच्या हरिणी जोडिल्या [असतात]. [त्यांचे] रथ प्रवाहांप्रमाणें धांवणारे [असतात]. [हे] देव शत्रूंला खाऊन टाकणारे [आणि] मित्रांला जणुं जोडिलेले [होत].

7. And may [his] blessings harnessed together like horses come and fondly lick us, even as cows lick [their] newborn calf. And may our hymns embrace him, the most beloved of heroes, even as wives [embrace their husbands].

8. And may the Maruts, whose troops are large, as also Heaven and Earth, being all of one mind, come and sit for us. They have variegated deer for horses. [Their] chariots [are] like running streams. [Those] gods are, as it were, eaters of [their] enemies [and] yoked to [their] friends.

---

७. 'गाई जशा आपल्या लहान वासराला प्रीतीनें चाटितात तशा इन्द्राच्या कृपा आम्हांला चाटोत आणि आम्हीं केलेली इन्द्राविषयींची स्तुति, स्त्री पतीला आलिंगिते तशी, जाऊन इन्द्राला आलिंगो.'

'घोड्यांप्रमाणें एकमेकांस जोडिलेल्या' ='अश्वयोगाः.' म्हणजे रथास जसे घोडे एकत्र जोडिलेले असतात, तशा एकत्र जोडल्या जाऊन जणुं येणाऱ्या.

८. सू. १८५ मं. ९ याजवरील टीपेंत जे 'देवे' सांगितले त्यांपैकीं हा मंत्र होय. शेवटीं 'देवाः' हा शब्द येतो म्हणून 'देवे'!

ह्या मंत्राची रचना सरळ नाहीं.

**प्र नु यदेषां महिना चिकित्रे प्र युञ्जते प्रयुजस्ते सुवृक्ति ।**
**अध यदेषां सुदिने न शरुर्विश्वमेरिणं प्रुषायन्त सेनाः ॥ ९ ॥**

प्र । नु । यत् । एषाम् । महिना । चिकित्रे । प्र । युञ्जते । प्रऽयुजः । ते । सुऽवृक्ति ।
अध । यत् । एषाम् । सुऽदिने । न । शरुः । विश्वम् । आ । इरिणम् । प्रुषायन्त । सेनाः ॥ ९ ॥

**प्रो अश्विनाववसे कृणुध्वं प्र पूषणं स्वतवसो हि सन्ति ।**
**अद्वेषो विष्णुर्वात ऋभुक्षा अच्छा सुम्नाय ववृतीय देवान् ॥१०॥**

प्रो इति । अश्विना । अवसे । कृणुध्वम् । प्र । पूषणम् । स्वऽतवसः । हि । सन्ति ।
अद्वेषः । विष्णुः । वातः । ऋभुक्षाः । अच्छ । सुम्नाय । ववृतीय । देवान् ॥ १० ॥

---

अवनयो न ( =नद्यादीनां प्रवाहा इव ) [ निम्नगाः सन्ति ] [ ते मरुतो ] देवा रिशादसो मित्रयुजो न ( =शत्रूणाम् अत्तारो मित्रैश्च संयुक्ता इव ) [ भवन्ति ] ॥

---

## भाषायाम्.

९. यद् (=यदा) सुवृक्ति ( =सुवृत्तया=उपासकैः शोभने स्तोत्रे कृते सति ) ते (=मरुतः) प्रयुजः प्र युञ्जते (=अश्वान् रथे योजयन्ति=अश्वान् रथे योजयित्वा गच्छन्ति ) अध यत् (=अपि च यदा ) सुदिने न (=निरभ्रे दिवसेपि ) एषां शरुः सेनाश् [च] (= तेषां वज्रो गणाश्च ) विश्वम् इरिणं (= सर्वं तटाकम् ) आ प्रुषायन्त (= आपूरयन्ति मेघवृष्ट्या ) [ तत्=तदा ] एषां महिना [एते] प्र चिकित्रे (=एते मरुतः स्वकीयेन महिम्ना प्रज्ञायन्ते=तदा तेषां महिमा प्रतीयते ) ॥

इदमुक्तं भवति । यदा भक्तैः स्तुता मरुतः स्वकीयेन वज्रेण सर्वाणि तटाकादीनि मेघोदकैः पूरयन्ति तदा तेषां महिमा जनैः प्रतीयत इति ॥

प्र नु यत् इत्यत्रस्थो यच्छब्दो युञ्जते इत्यनेन योजनीयः । चिकित्रे इत्यस्य च निघातत्वम् अपेक्षितं युञ्जते इत्यस्य च नापेक्षितम् । एवं सत्यपि वर्तमानं चिकित्रे इत्यस्य अनिघातत्वम् युञ्जते इत्यस्य च निघातत्वं व्यत्ययमूलकम् इति कृत्वा सहनीयम् ॥

१०. [ हे ऋत्विजः ], अश्विनो अवसे (=रक्षणाय ) प्र कृणुध्वं (=प्रसादयत) ।

९. ते चांगल्या स्तोत्रामुळें जेव्हां [ आपले ] घोडे रथाला जोडितात आणि निरभ्र दिवशींहि त्यांचें वज्र [ आणि ] त्यांचे गण प्रत्येक तळ्याला भरून टाकितात, तेव्हां त्यांच्या महिम्यानें ते विराजतात.

9. They distinguish themselves then by their greatness when through an excellent hymn they yoke their teams, and when their thunderbolt and their troops fill all the ponds even on a cloudless day.

१०. [ हे ऋत्विजांनो ], रक्षणासाठीं अश्वींला प्रसन्न करा, पूषा याला प्रसन्न करा. कारण ते स्वाधीनबल होत. द्वेषहीन विष्णु, वायु [ आणि ] महान् [ इन्द्र ] [ स्वाधीनबल होत ]. [ या ] देवांला सुखासाठीं मी येथें आणीन असें होओ.

10. Propitiate the As'vins for protection, propitiate Pûshâ. For they are of independent power. Benevolent Vishṇu, Vâta [ and ] the great [ Indra ] [are of independent power]. May I turn the gods hitherwards for [our] happiness.

---

९. 'मरुतांचा महिमा किती मोठा आहे, तो उपासकांच्या स्तोत्रांनीं प्रसन्न होऊन जेव्हां मरुत् रथास घोडे जोडून त्यांत बसून येतात, आणि येतां येतां आपल्या वज्राच्या योगानें निरभ्र आकाश असतांहि एकाएकीं पाऊस पाडून सर्व तळीं भरून टाकितात तेव्हां, लोकांच्या प्रत्ययास येतो.'

हा मंत्र दुर्बोध आहे. याची शब्दरचना आणि अन्वय फार क्लिष्ट आणि आयाससाध्य आहेत.

'त्यांचें वज्र'='एषां शरुः.' 'शरु' म्हणजे मरुत् धारण करितात तो भाला किंवा वज्र. सू. १७२ मं. २ आणि त्याजवरील पहिली टीप पहा.

१०. 'पूषा' सू. १४ मं. ३ याजवरील टीप पहा.

'स्वाधीन'='स्वतवसः.' म्हणजे त्यांचें बळ दुसऱ्यापासून आलेलें नाहीं, तर त्यांचें स्वताहाचें, त्यांच्याच आंगचें आहे. ते अमुक देवाचे अमुक होत म्हणून बलवान् असें नव्हे, तर ज्यांचें बळ स्वतंत्र आणि स्वयंभु आहे.

**इयं सा वो अस्मे दीधितिर्यजत्रा अपिप्राणी च सदनी च भूयाः।**
**नि या देवेषु यतते वसूयुर्विद्यामेषं वृजनं जीरदानुम् ॥ ११ ॥५॥**

इयम् । सा । वः । अस्मे इति । दीधितिः । यजत्राः । अपिऽप्राणी ।
च । सदनी । च । भूयाः ।
नि । या । देवेषु । यतते । वसुऽयुः । विद्याम । इषम् । वृजनम् ।
जीरऽदानुम् ॥ ११ ॥ ९ ॥

---

पूषणं प्र [ कृणुध्वं ] (= प्रसादयत ) । हि (= यस्मात् कारणात् ) [ ते ] स्वतवसः (= स्वायत्तबलाः ) सन्ति । अद्वेषः (= द्वेषरहितो ) विष्णुः वातः (= वायुः) ऋभुक्षाः (= महान्=इन्द्रः) [ इत्येते स्वतवसः सन्ति ] । देवान् सुम्नाय (= सुखाय ) अच्छ ववृतीय (= अस्मान् प्रति आवर्तयेयम् ) ॥

अद्वेषो द्वेषरहितो विष्णुर्व्याप्त एतन्नामको देवः । प्रथममनाहूतोपि न कुप्यतीति वक्तुमद्वेष इत्युक्तम् । इति सायणः ॥

---

## भाषायाम्.

११. हे यजत्राः (= यजनीया देवाः ), इयं सा (= सेयं ) वः (=युष्मद्विषया ) अस्मे दीधितिः (= अस्माकं दीधितिर्यज्ञरूपा क्रिया ) अपिप्राणी च सदनी च भूयाः (= अपिप्राणनवती चेष्टावती यूयं यत्र प्राणिथ तादृशी निवासवती च यूयं यत्र निवसथ तादृशी च भूयात् भवतु ) । या वसूयुः (= धनमिच्छन्ती ) [ दीधितिर् ] देवेषु नि यतते (= देवेषु प्रापणाय नितरां प्रयत्नं करोति ) । [एवं सति] [वयम्] इषम् (= अन्नं ) वृजनं (= बलं ) जीरदानुं (= क्षिप्रदानं ) [ वीरं=पुत्रं च ] विद्याम (= लभेमहि ) ॥

---

११. हे पूज्य [ देव ]हो, ही जी तुमची उपासना आम्हीं केली आहे, ती तुम्ही सचेतन करा आणि तिच्या ठायीं तुम्ही वास करा. जी उपासना धनाची वांछा करणारी होत्साती देवांप्रत पोंहचण्याविषयीं प्रयत्न करीत आहे. [ तर ] आम्हांला अन्न, बळ, [ आणि ] लवकर संपत्ति मिळवून देणारा [पुत्र] यांची प्राप्ति होओ.

11. May this our devotion offered unto you, O worshipful [ gods ], be one in which you may breathe and in which you may dwell; devotion, which soliciting wealth, strives towards the gods. May we [ therefore ] obtain food, strength, [ and a son] that shall quickly make us rich.

११. 'सचेतन करा' म्हणजे तिच्या आंगीं जीव उत्पन्न करा, निर्जीव आहे ती सजीव जणुं करा.

## सूक्तम् १८७.

अगस्त्य ऋषिः । पितुर्देवता । आद्यानुष्टुब्गर्भोष्णिक् । तृतीया पञ्चमी षष्ठी सप्तम्येकादशी चेति पञ्चानुष्टुभः । शिष्टा गायत्र्यः ॥

**पितुं नु स्तोषं महो धर्माणं तविषीम् ।**
**यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥ १ ॥**

पितुम् । नु । स्तोषम् । महः । धर्माणम् । तविषीम् ।
यस्य । त्रितः । वि । ओजसा । वृत्रम् । विऽपर्वम् । अर्दयत् ॥ १ ॥

**स्वादो पितो मधो पितो वयं त्वा ववृमहे ।**
**अस्माकमविता भव ॥ २ ॥**

स्वादो इति । पितो इति । मधो इति । पितो इति । वयम् । त्वा । ववृमहे ।
अस्माकम् । अविता । भव ॥ २ ॥

---

### भाषायाम्.

१. नु (=इदानीं) महो धर्माणं तविषीं (=महतस्त्रितादेर्धारकं बलात्मकं च) पितुं (=सोमलक्षणमन्नं) स्तोषं (=स्तवानि) । यस्य [पितोर्] ओजसा (=बलेन) त्रितः (=एतन्नामको देवो) वृत्रं विपर्वं (=विच्छिन्नसंधिकं यथा तथा) वि अर्दयत् (=विविधं हतवान्) ॥

त्रितो विस्तीर्णतमः प्रख्यातकीर्तिस्त्रिषु क्षित्यादिस्थानेषु तायमानोपीन्द्र इति सायणः । कश्चिदतिपुरातनकालप्रख्यातो देव इत्यपरे सम्यक् ॥

२. हे स्वादो (=आस्वादनीय) पितो (=पेय), हे मधो (मधुर) पितो, वयं त्वा (=त्वां) ववृमहे (=सेवामहे) । [अतस्त्वम्] अस्माकम् अविता (=रक्षिता) भव ॥

## सूक्त १८७.

**ऋषि—अगस्त्य. देवता— पितु** ("अन्न," असें म्हणण्याचा संप्रदाय आहे. 'पितु,' म्हणजे सोमरसरूपी जें पेय तें ). वृत्त—१ली **अनुष्टुब्गर्भा उष्णिक्**; ३री, ५वी, ६वी, ७वी, आणि ११वी ह्या **अनुष्टुभ्**; उरलेल्या **गायत्री.**

१. मी आतां मोठ्याला धारण करणारा, [ आणि मोठ्याचें] बळ असा जो पितु, त्याची स्तुति करीन. ज्या [ पितू]च्या पराक्रमेंकरून त्रित वृत्राला मारून त्याचे तुकडे करिता झाला.

२. हे रुचिकर पितू, हे मधुर पितू, आम्ही तुला सेवितों. [तर] तूं आमचा रक्षणकर्ता हो.

## HYMN. 187.

To *Pitu* or *Drink* (i.e. the Soma-juice). By *Agastya.* metre—the first verse is *Anushṭubgarbhâ Ushṇik;* verses 3,5,6, 7, and 11 are *Anushṭubhs;* the rest are *Gâyatrîs.*

1. Let me now sing of Drink the sustainer [and] the strength of the great; by the power whereof Trita destroyed Vṛitra, dismembering his limbs.

2. O sweet Pitu, O delicious Pitu, we wait upon thee. Be thou our protector.

---

१. हें सूक्त 'पितु' विषयीं आहे. 'पितु' म्हणजे अक्षरशः 'पेय' असा अर्थ आहे. सोमरूप जें पेय ( अथवा अन्न ) तो 'पितु' आहे. 'पितु' असें सोमरसाचें नांव आहे, परंतु शाकभाजी इत्यादिक जें अन्न तेंहि 'पितु' शब्दानें घ्यावयाचें असें आठव्या मंत्रावरून दिसून येतें. 'पितु' हा सचेतन आहे असें क्षणभर मानून त्याची स्तुति केली आहे.

'मोठ्याला,' म्हणजे त्रितादिक जे महान् महान् देव त्यांला.

'त्रित' हा कोण देव आहे याविषयीं सू. ५२ मं. ५ आणि त्याजवरील टीप पहा. मात्र त्या टिपेंत त्रितानें वृत्राला मारिल्याविषयीं वेदांत उल्लेख आढळत नाहीं असें सांगितलें आहे, त्याची शुद्धि या मंत्राच्या संबंधानें करणें अवश्य आहे.

या सर्व सूक्ताचा पाठ शांतिसूक्त, श्राद्धसूक्त आणि पितृसूक्त यांत म्हणत असतात. तो असा कीं, अन्न वाढीत असतांना पात्राला तूप लाविल्यानंतर हें

उप॑ नः पितव॒ा च॑र शि॒वः शि॒वाभि॑रू॒तिभिः॑ ।
म॒यो॒भुर॑द्विषे॒ण्यः सखा॑ सु॒शेवो॒ अद्व॑याः ॥ ३ ॥
उप॑ । न॒ः । पि॒तो इति॑ । आ । च॒र । शि॒वः । शि॒वाभिः॑ । ऊ॒तिऽभिः॑ ।
म॒यः॒ऽभुः । अ॒द्वि॒षे॒ण्यः । सखा॑ । सु॒ऽशेवः॑ । अद्व॑याः ॥ ३ ॥
तव॒ त्ये पि॑तो॒ रसा॒ रजां॒स्यनु॒ विष्ठि॑ताः ।
दि॒वि वाता॑ इव श्रि॒ताः ॥ ४ ॥
तव॑ । त्ये । पि॒तो इति॑ । रसाः॑ । रजां॑सि । अनु॑ । वि॒ऽस्थि॑ताः ।
दि॒वि । वाताः॑ऽइव । श्रि॒ताः ॥ ४ ॥

## भाषायाम्.

३. हे पितो, शिवः (= मङ्गलस्) [ त्वं ] शिवाभिरूतिभिः (= मङ्गलै रक्षणैः सह ) उप नः आ चर ( =अस्मान् प्रति आगच्छ ) । मयोभुः ( =कल्याणकारी ) अद्विषेण्यः ( =प्रियः) सुशेवः ( =सुखकारी ) अद्वयाः (=निष्कपटः) सखा ( =मित्रभूतस् ) [ त्वमा चर ] ॥

४. हे पितो, तव त्ये ( =ये प्रख्यातास्ते ) रसाः ( =स्वाद्वम्लादिषड्रसा ) दिवि श्रिता वाता इव ( =द्युलोके व्याप्ता वायव इव ) रजांसि अनु विष्ठिताः ( =आन्तरिक्षादिषु लोकेषु विविधं व्याप्ता ) [ भवन्ति ] ॥

सर्व सूक्त म्हणतात. उद्देश उघड दिसतो कीं, जें अन्न वाढलें जात आहे तें मधुर आहे, व उत्तम आहे. इत्यादि त्याची प्रशंसा व्हावी. शिवाय शांतिसूक्तांतहि याचा पाठ म्हणतात.

शौनक असें म्हणतात कीं, नित्य हें सूक्त म्हणून अन्नाची स्तुति आणि पूजा करावी, आणि नंतर तें अन्न भक्षण करावें, त्याची निंदा करूं नये. असें करील त्याला अन्नापासून उत्पन्न होणाऱ्या (अजीर्णादिक ) रोगांचा उपद्रव होणार नाहीं. त्यांत विष असलें तरी त्याचें अमृत होईल. विष पिऊन हें सूक्त म्हटलें तर विषाचा नाश होईल. मात्र भोजन करितेवेळीं मौन धारण करावें आणि शुचिर्भूत असलें पाहिजे. तेव्हां तें अन्न दुसऱ्यास द्यावें, त्याची पूजा करावी, त्याची आहुति द्यावी. तसें करणाऱ्यास भुकेपासून त्रास होणार नाहीं आणि अन्नापासून व्याधि उत्पन्न होणार नाहीं !

३. हे पितू, कल्याणकारक असा जो तूं तो कल्याणकारक रक्षणांसहित आम्हांप्रत ये. सुखकारक, प्रिय, बरें करणारा, निष्कपट मित्र [असा तूं आम्हांप्रत ये].

४. हे पितू, तुझे जे रस ते, द्युलोकांत वायु पसरले आहेत त्यांप्रमाणें सर्वत्र लोकीं पसरलेले आहेत.

3. Come thou unto us, O Pitu, thou the auspicious, with auspicious helps: thou the beneficent, the kind, the propitious [and] the sincere friend.

4. Thy various flavours pervade all regions, O Pitu, even as the winds pervade the firmament.

---

२. 'रुचिकर' आणि 'मधुर' ('स्वादु,' 'मधु') हीं जीं येथें विशेषणें दिलीं आहेत, तींच पवमानाच्या आरंभींची ऋचा (ऋ. ९.१.१) यांत सोमाला 'स्वादिष्ठ' आणि 'मदिष्ठ' ह्या रूपानें दिलीं आहेत तीं पहा (स्वादिष्ठया मदिष्ठया पवस्व सोम धारया).

३. 'रक्षणांसहित ये'='ऊतिभिः आ चर.' म्हणजे, 'तूं ये आणि आमचें रक्षण करण्याचे अनेक उपाय आम्हांला शिकीव.' सविता, वरुण यांची जशी स्तुति आणि प्रार्थना करावी तशी पितूची येथें केली आहे, कारण पितु हा सचेतन देवस्वरूपभाक् होय असें मानून त्याचें हें सूक्त आहे.

४. 'सर्व रस, म्हणजे गोड, आंबट, तिखट इत्यादि जे रस ते पितूच्या म्हणजे सोमाच्या अंगीं आहेत, व ते वातावरणाप्रमाणें सर्वत्र पसरले आहेत' असें ऋषि म्हणतो.

**तव त्ये पितो ददतस्तव स्वादिष्ठ ते पितो ।**
**प्र स्वाद्मानो रसानां तुविग्रीवा इवेरते ॥ ५ ॥ ६ ॥**

तव । त्ये । पितो इति । ददतः । तव । स्वादिष्ठ । ते । पितो इति ।
प्र । स्वाद्मानः । रसानाम् । तुविग्रीवाःऽइव । ईरते ॥ ५ ॥ ६ ॥

**त्वे पितो महानां देवानां मनो हितम् ।**
**अकारि चारु केतुना तवाहिमवसावधीत् ॥ ६ ॥**

त्वे इति । पितो इति । महानाम् । देवानाम् । मनः । हितम् ।
अकारि । चारु । केतुना । तव । अहिम् । अवसा । अवधीत् ॥ ६ ॥

**यददो पितो अजगन्विवस्व पर्वतानाम् ।**
**अत्रा चिन्नो मधो पितोऽरं भक्षाय गम्याः ॥ ७ ॥**

यत् । अदः । पितो इति । अजगन् । विवस्व । पर्वतानाम् ।
अत्र । चित् । नः । मधो इति । पितो इति । अरम् । भक्षाय । गम्याः ॥७॥

## भाषायाम्.

५. हे पितो, ददतस्तव (=दानशीलस्य तव, हे स्वादिष्ठ पितो, तव) रसानां त्ये-ते (=ते प्रख्याताः) स्वाद्मानः (=स्वादयितारस्) तुविग्रीवा इव (=प्रवृद्धग्रीवा इव) प्र ईरते (=संचरन्ति) ॥

ये ये तव रसान् आस्वादयन्ति ते ते प्रवृद्धबलाः सन्तः संचरन्तीति भावः ॥

६. हे पितो, महानां देवानां (=महतां देवानां) मनस्त्वे (=त्वयि) हितं (=निहितमस्ति=त्वत्पानमनसस्ते भवन्ति.) । [अपि च] [तव] केतुना [तत्] चारु अकारि (=कमनीयं क्रियते) । तवावसा (=तव साहाय्येन) [इन्द्रः] अहिम् अवधीत् (=वृत्ररूपं सर्पं हतवान्) ॥

७. हे पितो, यद् अदः (=यत्र) पर्वतानां विवस्व (=? मेघानां द्योतमानम् उदकम्) अजगन् (=आगच्छेत्) अत्र चेत् (=तत्र) हे मधो पितो (=हे मधुरपेय), नो भक्षाय (=अस्माकं भक्षणाय) अरं (=पर्याप्तं यथा तथा) गम्याः (=आगच्छ) ॥

यदा मेघेभ्यो वृष्टिर्भवति तदा पर्याप्तपानार्थं यदुदकं लभ्यते तदेव पितोरागमनमित्यर्थः ॥

विवस्वेति दुर्बोधं पदम् ॥

५. हे पितू, तुज उदाराच्या रसांचे, हे अत्यंत रुचिकर पितू, तुझ्या रसांचे जे जे भोक्ते ते ते पुष्टग्रीव जणुं होत्साते फिरत असतात.

६. हे पितू, महान् देवांचें मन तुझ्या ठायीं ठेविलेलें आहे. तें तुझ्या चातुर्येंकरून काम्य होत असतें. तुझ्या साहाय्यानें [ इन्द्र ] अहीला मारिता झाला.

७. हे पितू, जेथें पर्वतांचें उदक येतें तेथें, हे मधुर पितू, तूं आमच्या भक्षणासाठीं पुरशील इतका ये.

5. Those, O Pitu, those, O most delicious Pitu, who relish the flavours of thee the bounteous one, go forth stout-necked.

6. In thee, O Pitu, is placed the mind of the great gods. By [ thy ] wisdom it is made lovely. By thy helps did he [ Indra ] slay the snake.

7. Where, O Pitu, the water of the mountains comes, there come thou, O sweet Pitu, sufficient for us to drink.

---

५. 'जे जे पितूच्या रसांचा स्वाद घेतात ते ते प्रबळ होऊन फिरत असतात.'

६. पितूच्या ठायीं देवांचें मन ठेविलेलें आहे म्हणजे, देवांचें मन पितूच्या आंत चिकटून राहतें, म्हणजे तें सोम पिण्याविषयीं तत्पर असतें.

सोमाच्या साहाय्यानें इंद्र वृत्राला मारिता झाला याविषयीं पूर्वीं पुष्कळ वेळ उल्लेख आले आहेत.

७. 'मेघरूप पर्वतांपासून जेव्हां वृष्टि होते तेव्हां जें पुष्कळ पाणी प्यावयाला मिळतें तें पितूच्या योगानें ( अथवा पितु येतो म्हणूनच ) मिळतें.' हें उघडच आहे, कारण मेघवृष्टि झाली म्हणजे पेय मिळतें.

'पर्वतांचें उदक'='पर्वतानां विवस्व.' मेघाला पर्वत असें नांव वेदांत आहे. कारण मेघांचा आकार पर्वतांच्या आकारासारिखा असतो. 'विवस्व' शब्द कठिण आहे.

यदपामोषधीनां परिंशमारिशामहे ।
वातापे पीव इद्भव ॥ ८ ॥

यत् । अपाम् । ओषधीनाम् । परिंशम् । आऽरिशामहे ।
वातापे । पीवः । इत् । भव ॥ ८ ॥

यत्ते सोम गवाशिरो यवाशिरो भजामहे ।
वातापे पीव इद्भव ॥ ९ ॥

यत् । ते । सोम । गोऽआशिरः । यवऽआशिरः । भजामहे ।
वातापे । पीवः । इत् । भव ॥ ९ ॥

करम्भ ओषधे भव पीवो वृक्क उदारथिः ।
वातापे पीव इद्भव ॥ १० ॥

करम्भः । ओषधे । भव । पीवः । वृक्कः । उदारथिः ।
वातापे । पीवः । इत् । भव ॥ १० ॥

---

## भाषायाम्.

८. यद् अपाम् ओषधीनां परिंशं (=यम् उदकानामोषधीनां च परिलेशं) [वयम्] आरिशामहे (=भक्षयामस्) [तद्रूपस्त्वं] हे वातापे (=?"वातवत्सर्वव्यापक") [पितो], पीव इत् भव (=प्रवृद्धिकरो रस एव भव) ॥

वयं यदुदकानामोषधीनां चांशं भक्षयामस्तद्रूपः पितुः पुष्टिकरो रसो भवतीत्यर्थः॥

९. हे सोम, यद् गवाशिरस्ते [यच्च] यवाशिरस् [ते] (=क्षीरादिभिर्गोरसैः संस्कृतस्य तव तथा यवविकारैः संस्कृतस्य तवांशं) भजामहे (=सेवामहे) [तद्रूपस्त्वं] हे वातापे (=वातवत्सर्वव्यापक) [पितो], पीव इद्भव (=प्रवृद्धिकरो रस एव भव) ॥

१०. हे ओषधे (=ओषधिरूप पितो), त्वं करम्भो भव (=दधिमिश्रसक्तुपिण्डो भव)। [त्वं] पीवः (=वर्धको रसो) [भव]। [त्वम्] उदारथिर्वृक्कः (=उद्दीपको "व्याधेर्वर्जयिता") [भव]। हे वातापे (=वातवत्सर्वव्यापक) [पितो], पीव इद् भव (=प्रवृद्धिकरो रस एव भव) ॥

वृक्को व्याधेर्वर्जयितेति सायणः ।

उदारथिरूर्ध्वगम इन्द्रियाणामुद्दीपयितेति च सः ॥

८. आम्ही जो उदकांचा [आणि] ओषधींचा लेश भक्षितों त्याचा, हे सर्वव्यापी [ पितू ], तूं रसच हो.

९. हे सोमा, जो गोरसयुक्ताचा आणि जो तुज धान्ययुक्ताचा अंश आम्ही सेवन करितों त्याचा, हे सर्वव्यापी [पितू ], तूं रसच हो.

१०. हे ओषधी, तूं पिण्ड हो. रस आणि उद्दीपक व्याधिवर्जक हो. हे सर्वव्यापी [ पितू ], तूं रसच हो.

8. What little of the waters [ and ] of the vegetables we consume, turn that into fat, O pervader!

9. What [ little ], O Soma, of thee when mixed with milk, of thee when mixed with corn, we consume, turn that into fat, O pervader!

10. O plant, be thou the barley-dish. Be thou, fat, the exciting destroyer of disease. Turn that into fat, O pervader!

---

८. 'आम्ही जें थोडें पाणी पितों अथवा थोडी भाजी खातों त्यांत पितु शिरतो आणि त्याचा तो उत्तम रस करितो.' या मंत्रावरून 'पितु' हा केवळ सोमादिक पेयाचाच अभिमानी देव नव्हे, तर शाकभाजी इत्यादिक अन्नाचाहि आहे असें होतें.

९. 'गोरसयुक्ताचा आणि धान्ययुक्ताचा '=' गवाशिरः यवाशिरः.' सोमांत दूध घालून तो थोडा ऊन करीत असत; त्याला गवाश्रित असें नांव असे. आणि त्याप्रमाणेंच त्यांत यव किंवा जव अथवा सातु या धान्याचें पीठ घालून तयार केलेले जे सोम त्यांचें नांव 'यवाशिर्' होय.

१०. 'पिण्ड'='करम्भः.' सातूचें पीठ दह्यांत कालवून त्याचा केलेला जो पिंड तो 'करम्भ.' तो सातूचा केलेला असतो म्हणून पितूला येथें 'ओषधि' असें म्हटलें आहे.

'उद्दीपक व्याधिवर्धक '=' वृक्कः उदारथिः'. हे दोनहि शब्द कठिण आहेत, आणि दुसऱ्या ठिकाणीं ऋग्वेदांत कोठें आलेले आढळत नाहींत. 'वृक्क' म्हणजे शरीरांतील कांहीं मांसभाग असावा असें कोणी म्हणतात.

P 4

तं त्वा वयं पितो वचोभिर्गावो न हव्या सुषूदिम ।
देवेभ्यस्त्वा सधमादमस्मभ्यं त्वा सधमादम् ॥ ११ ॥ ७ ॥

तम् । त्वा । वयम् । पितो इति । वचःऽभिः । गावः । न । हव्या । सुसूदिम ।
देवेभ्यः । त्वा । सधऽमादम् । अस्मभ्यम् । त्वा । सधऽमादम् ॥ ११ ॥ ७

## भाषायाम्.

११. हे पितो, तं त्वा ( =एवं स्तुतं त्वां ) वयं वचोभिः ( =स्तुतिभिर् ) गावो न ( =गावो यथा हव्यानि दुग्धरूपाणि क्षरन्ति तथा ) हव्या सुषूदिम ( =हव्यानि क्षरयामः =हव्यरसान् त्वत्सकाशान्निष्काशयामः) । देवेभ्यः ( =देवार्थं ) त्वा सधमादं ( =तेषां सह मादयितारं ) [ तथैव ] त्वा ( =त्वाम् ) अस्मभ्यं सधमादं ( =सह मादयितारं ) [ सुषूदिम =हव्यरसान् क्षारयामः ] ॥

---

## सूक्तम् १८८.

अगस्त्य ऋषिः । आप्रीसूक्तमिदम् । प्रथमायाः सुसमिद्धोग्निः । द्वितीयायास्तनूनपात् । तृतीयाया इड्नामकोग्निः । चतुर्थ्या बर्हिः । पञ्चम्या द्वारः । षष्ठ्या उषासानक्तौ । सप्तम्या दैव्यौ होतारौ । अष्टम्या भारतीळासरस्वत्यो देव्यः । नवम्यास्त्वष्टा । दशम्या यूपरूपो वनस्पतिः । एकादश्याः स्वाहा ॥ गायत्री छन्दः ॥

समिद्धो अद्य राजसि देवो देवैः सहस्रजित् ।
दूतो हव्या कविर्वह ॥ १ ॥

सम्ऽइद्धः । अद्य । राजसि । देवः । देवैः । सहस्रऽजित् ।
दूतः । हव्या । कविः । वह ॥ १ ॥

## भाषायाम्.

१. हे सहस्रजित् ( =सहस्रदेवैः=द्योतमानैर्ऋत्विग्भिः) समिद्धः ( =सुसमिद्धः= सम्यग्दीप्तः एतन्नामको ) देवः ( =द्योतमानस् ) [ त्वमग्निः] अद्य राजसि ( =अस्मिन्दिने ईशिषे )। कविर्दूतः ( =मेधावी दूतः सन् ) हव्या वह ( =हव्यानि देवान्प्रति नय ) ॥

११. हे पितो, या प्रकारेंकरून तुजपासून आम्हीं, गाई हव्यें दुभतात त्याप्रमाणें, स्तोत्रांनीं हव्यें दोहिलीं आहेत. देवांकारणें हर्षकारक सौंगडा [ आणि ] आम्हांकारणें हर्षकारक सौंगडा असा जो तूं, त्या तुला [आम्हीं दोहिलें आहे].

11. Thus have we with hymns made thee, O Pitu, yield oblations even as cows [yield oblations]–thee the agreeable associate for the gods, thee the agreeable associate for us.

११. 'या प्रकारेंकरून तुला दोहून आम्हीं रस काढिले आहेत, आणि देवांला आणि आम्हांला आनंद उत्पन्न करणारा असा एक मित्र सिद्ध केला आहे.'

---

## सूक्त १८८.

ऋषि—अगस्त्य. देवता—१ समिद्ध अग्नि, २ तनूनपात् अग्नि, ३ इड् अग्नि, ४ बर्हि ( दर्भ ), ५ द्वारें, ६ उषा आणि रात्र ( दिवस आणि रात्र ), ७ दोन दिव्य होते, ८ तिघीजणी देवी (भारती, इळा, सरस्वती ), ९ त्वष्टा, १० वनस्पति ( यूप ), ११ स्वाहा.

## Hymn 188.

To 1 *Samiddha* ( well-lighted ) *Agni*, 2 *Tanûnapât Agni*, 3 *Agni* called *Iḍ*, 4 *Barhis* ( the sacrificial *grass*:), 5 the *Doors*, 6 *Ushas* and *Night* ( the *Dawn* or *Day* and *Night* ) 7 the two *Divine Invokers*, 8 the three *Goddesses* ( *Bhâratî*, *Iḷâ* and *Saraswatî* ), 9 *Trashṭâ*, 10 the *wooden Post*, 11 *Svâhâ*.

१. हे सहस्र जिंकणाऱ्या [ अग्नी ], तेजस्वी [ ऋत्विजां]नीं चांगला पेटविलेला तेजस्वी असा जो तूं, तो आज राजा आहेस. विद्वान् दूत असा जो तूं तो हव्यें घेऊन जा.

1. [ O Agni ], *well-kindled* by the illustrious priests thou, the illustrious conqueror of thousands, rulest to-day. Do thou, the wise messenger, carry the oblations.

तनूनपादृतं यते मध्वा यज्ञः समंज्यते ।
दधत्सहस्रिणीरिषः ॥ २ ॥

तनूऽनपात् । ऋतम् । यते । मध्वा । यज्ञः । सम् । अज्यते ।
दधत् । सहस्रिणीः । इषः ॥ २ ॥

आजुह्वानो न ईड्यो देवाँ आ वक्षि यज्ञियान् ।
अग्ने सहस्रसा असि ॥ ३ ॥

आऽजुह्वानः । नः । ईड्यः । देवान् । आ । वक्षि । यज्ञियान् ।
अग्ने । सहस्रऽसाः । असि ॥ ३ ॥

---

## भाषायाम्.

२. यज्ञः ( =यज्ञियः =यजनार्हः ) ऋतं यते ( =यज्ञं गच्छते =हविर्ददते यजमानाय यजमानार्थं ) सहस्रिणीः इषः (=सहस्रसंख्याकान्यन्नानि ) दधत् (=धारयन्=प्रयच्छन् ) तनूनपात् ( =एतन्नामकोऽग्निर् ) मध्वा सम् अज्यते (=मधुरेणाज्यसोमादिद्रव्येण सम्यग्व्यक्तः क्रियते =तर्प्यते ) ॥

३. आजुह्वानः ( =आहूयमान ) ईड्यः ( =स्तुत्यः =“इड्नामकस्” ) [ त्वं ] यज्ञियान् ( =यज्ञार्हान् ) देवान् नः ( =अस्मान् प्रति ) आ वक्षि ( =आवह ) । हे अग्ने, [ त्वं ] सहस्रसाः (=सहस्रसंख्याकानां धनानां दाता ) असि ॥

---

१. हें एक आप्रीसूक्त आहे. सू.१३ मं. १ याजवरील टीप पहा.

‘ सहस्र जिंकणाऱ्या ’=‘ सहस्रजित्.’ हजारो शत्रूंस अथवा धनांला जिंकणारा.

‘ चांगला पेटविलेला ’ = ‘[सु]समिद्धः’. ‘ सुसमिद्ध ’ हें येथें अग्नीच्या विभूतिविशेषाचें नांव. ती या मंत्राची देवता आहे. सू. १३ मं. १ आणि सू. १४१ मं. १ पहा.

‘ दूत ’=‘ दूतः.’ सू. ४४ मं.२ आणि टीप पहा.

२. यज्ञ करणाऱ्या यजमाना-कारणें हजारो अन्नसंपत्ति देणारा असा जो पूज्य **तनूनपात्**, त्याला मधुर आहुतीनें स्निग्ध केला आहे.

३. [ आम्हीं ] बोलाविलेला असा जो **स्तुत्य** तूं तो पूज्य देवांला आम्हांकडे आण. हे अग्नी, तूं हजारो [संपत्ति] देणारा आहेस.

2. *Tanûnapât,* who deserves to be honoured [and] who bestows thousands of foods on the sacrificer, is anointed with the sweet oblation.

3. Invoked [ by us ] do thou the *Praiseworthy* one bring the adorable gods to us. Thou art a giver of thousands [ of riches ], O Agni !

---

२. 'तनूनपात्' याविषयीं सू. १३ मं. २ आणि टीप पहा.

'पूज्य'='यज्ञः'. हा सायणांनीं केलेला अर्थ बरोबर आहे असें आम्हांस वाटतें. सू. १०५ मं. ४ आणि त्याजवरील भाषा पहा.

३. 'स्तुत्य'='ईड्यः.' ही ऋचा 'इड्' नांवाच्या अग्नीविषयीं आहे असें 'ईड्य' या शब्दावरून समजावयाचें. 'ईड्य' यामधील 'ई' दीर्घ आहे तरी चिंता नाहीं. सू. १३ आणि सू. १४२ यांतील तिसरा मंत्र 'नराशंस' अग्नीविषयीं आहे. तेव्हां 'इड्' नांवाचा अग्नि आणि 'नराशंस' हे एकच समजले पाहिजेत. 'ईड्य' म्हणजे 'स्तुत्य' असा अर्थ उघड आहे, त्यापेक्षां 'नराशंस' शब्दाचा जो 'नरांनीं स्तवावयाचा' असा अर्थ करितात तो खरा आहे असें होतें.

प्राचीनं बर्हिरोजसा सहस्रवीरमस्तृणन् ।
यत्रादित्या विराजथ ॥ ४ ॥

प्राचीनम् । बर्हिः । ओजसा । सहस्रऽवीरम् । अस्तृणन् ।
यत्र । आदित्याः । विऽराजथ ॥ ४ ॥

विराट् सम्राड्विभ्वीः प्रभ्वीर्बह्वीश्च भूयसीश्च याः ।
दुरो घृतान्यक्षरन् ॥ ५ ॥ ८ ॥

विऽराट् । सम्ऽराट् । विऽभ्वीः । प्रऽभ्वीः । बह्वीः । च । भूयसीः ।
च । याः ।
दुरः । घृतानि । अक्षरन् ॥ ५ ॥ ८ ॥

सुरुक्मे हि सुपेशसाधि श्रिया विराजतः ।
उषासावेह सीदताम् ॥ ६ ॥

सुरुक्मे इति सुऽरुक्मे । हि । सुऽपेशसा । अधि । श्रिया । विऽराजतः ।
उषसौ । आ । इह । सीदताम् ॥ ६ ॥

---

## भाषायाम्.

४. ओजसा ( =बलेन ) सहस्रवीरं ( =सहस्रवीरोपेतं =सहस्रवीराणां यावद्बलं तावता बलेन युक्तं ) बर्हिः (=कुशासनं ) प्राचीनं (=प्रागग्रं यथा तथा) [ऋत्विजः] अस्तृणन् । यत्र [ बर्हिषि ] हे आदित्याः ( =अदितेः पुत्राः ), [ =यूयं ] विराजथ ( =विविधं राजध्वे ) ॥

५. या दुरः ( =या द्वारो ) विराट् ( =विराजः=विशेषेण राजमानाः ) सम्राट् ( =सम्राजः =संम्यग्राजमाना) विभ्वीः (=विभ्व्यः =विशेषेण बलेन सह वर्तमानाः) प्रभ्वीः ( =प्रभ्व्यः =प्रकर्षेण बलेन वर्तमाना ) बह्वीश्च ( =बह्व्यश्च=अनेकाश्च ) भूयसीश्च ( =भूयस्यश्च=असंख्याताश्च ) [ भवन्ति ता ] [ दुरो ] घृतान्यक्षरन् ( =घृतवद्रसवन्तराणि मेघोदकादीनि द्रव्याणि क्षरन्ति=वर्षन्ति ) ॥

६. सुरुक्मे ( =शोभनदीप्ताभरणे ), सुपेशसा ( =सुपेशसौ=शोभनरूपे ) [उषासानक्ता] श्रिया अधि विराजतः ( =सौन्दर्येण अधिकं शोभेते ) [ ते ] उषासौ (=उषासानक्ता=अहोरात्रे देव्यौ ) इह आ[गम्य] सीदतां ( =निषीदताम् ) ॥

४. बळानें सहस्रवीर असे दर्भ पूर्वेकडे टोकें करून आंथरले आहेत; कीं ज्यांवर हे आदित्य हो, तुम्ही विराजत आहां.

4. They have spread, points eastward, the *kus'a-grass* which in power is [as though] possessed of a thousand heroes. And on it you, O sons of Aditi, are shining.

५. विशेषेंकरून राज्य करणारीं, साम्राज्य करणारीं, विभायुक्त, प्रभावयुक्त, अनेक आणि असंख्य अशीं जीं द्वारें तीं घृतस्राव करितात.

5. The *Doors* which are illustrious, paramount, excellent, supreme, numerous and innumerable, are pouring out nourishments.

६. सुंदर अलंकार घातलेल्या आणि रूपवती अशा ज्या [ **उषा आणि रात्र** ] त्या सौंदर्यानें फार शोभतात. **उषा** आणि **रात्र** येऊन येथें बसोत.

6. Well-adorned and of beautiful shape the *Dawn* and the *Night* shine exceedingly with beauty. May the *Dawn* and the *Night* come and sit.

---

४. ही ऋचा कुशांविषयीं आहे. सू. १३ मं. ५ पहा.

'आदित्य' = 'आदित्याः'. म्हणजे अदितीचे पुत्र. अर्थात् सविता, इंद्र, वरुण इत्यादिक देव. 'आदित्य' या नांवाविषयीं पूर्वीं पुष्कळ ठिकाणीं निर्देश आलाच आहे.

५. सू. १३ मं.६ आणि सू. १४२ मं. ६ आणि टिपा पहा.

'घृतस्राव करितात' याचा अर्थ सायण 'मेघोदकें' वर्षितात असा करितात.

६. सू. १३ मं. ७ आणि टीप पहा.

'उषा आणि रात्र'='उषासौ.' येथें उषाशब्दानें केवळ प्रभातकालाभिमानिनी देवी घ्यावयाची नाहीं, तर दिवस ( दिवसाभिमानिनी देवता ) असें सायणांस अनुसरून समजणें योग्य आहे.

**प्रथमा हि सुवाचसा होतारा दैव्या कवी ।**
**यज्ञं नो यक्षतामिमम् ॥ ७ ॥**

प्रथमा । हि । सुऽवाचसा । होतारा । दैव्या । कवी इति ।
यज्ञम् । नः । यक्षताम् । इमम् ॥ ७ ॥

**भारतीळे सरस्वति या वः सर्वा उपब्रुवे ।**
**ता नश्चोदयत श्रिये ॥ ८ ॥**

भारति । इळे । सरस्वति । याः । वः । सर्वाः । उपऽब्रुवे ।
ताः । नः । चोदयत । श्रिये ॥ ८ ॥

**त्वष्टा रूपाणि हि प्रभुः पशून्विश्वान्त्समानजे ।**
**तेषां नः स्फातिमा यज ॥ ९ ॥**

त्वष्टा । रूपाणि । हि । प्रऽभुः । पशून् । विश्वान् । सम्ऽआनजे ।
तेषाम् । नः । स्फातिम् । आ । यज ॥ ९ ॥

---

## भाषायाम्.

७. प्रथमा (=प्रथमौ=आद्यौ=मनुष्यहोतुः पूर्वभवौ) सुवाचसा (=सुवाचसौ=प्रियवचनौ) दैव्या (=देवानां संबन्धिनौ) कवी (=मेधाविनौ) होतारा (=होतारौ=पुरोहितौ) नः (=अस्माकम्) इमं यज्ञं यक्षतां (=यजताम्) ॥

८. हे भारति, हे इळे, हे सरस्वति, या वः सर्वा उपब्रुवे (=उपेत्य स्तौमि) ता [यूयं] नः (=अस्मान्) श्रिये चोदयत (=संपदे प्रेरयत)।

भरत आदित्यः। तस्य संबन्धिनी भारती । द्युलोकदेवता । इळा भूदेवी । सरो वागुदकं वा । तद्वती अन्तरिक्षदेवता इत्यभिप्रायः सायणस्य ॥

९. रूपाणि प्रभुः (=रूपाणि प्रभविता=रूपाणां शरीराणां प्रादुर्भावयिता=उत्पादयिता) त्वष्टा (=एतन्नामको देवो) विश्वान् पशून् समानजे (=सर्वान् गवादीन् पशून् व्यक्तीकरोति = करोति)। [हे त्वष्टः], तेषां [पशूनां] स्फातिं (=वृद्धिं) नः (=अस्मदर्थम्) आ यज (=आनय) ॥

त्वष्टा यज्ञसाधनपात्राभिमानी देवो रूपाणि योनौ सृष्टानि रेतांसि रूपाणि कर्तुं प्रभुर्हि । हिशब्दः श्रुत्यन्तरप्रसिद्धिद्योतनार्थः । रेतसः सिक्तस्य त्वष्टा रूपाणि विकरोतीति श्रुतेः । इति सायणः ॥

७. प्रियवचन [आणि] बुद्धिमान् असे जे दोघे **दिव्य** आदि **होते** ते ह्या आमच्या यज्ञाला संपादोत.

८. हे **भारती**, हे **इळे**, हे **सरस्वती**, ज्या तुम्हां सर्वांस मी स्तवितों, त्या तुम्ही सर्वे आम्हांला संपत्तीप्रत न्या.

९. [सकळ] शरीरें [निर्माण करण्याला] समर्थ असा **त्वष्टा** सर्व पशूंला उपजवितो.—[तो तूं हे **त्वष्टया**], आम्हांकरितां त्यांची वृद्धि कर.

7. May the primeval sages, the two *Divine invokers* perform this our sacrifice.

8. O *Bhârati*, O *Iḷa*, O *Saraswatî*, do you, all of whom I approach and praise, hasten us to wealth.

9. *Tvashṭâ* who makes the bodies has brought into existence all animals.—Do thou, [O *Tvashṭâ*], bring these fat unto us.

---

७. सू. १३ मं. ८ आणि टीप पहा. 'संपादोत'='यक्षताम्.' म्हणजे मानवी होत्यांप्रमाणें येऊन आमच्या यज्ञाची संपादणी करोत.

८. सू. १३ मं. ९ आणि टीप पहा. या मंत्रावरील भाष्यांत सायण म्हणतात कीं, भारती म्हणजे द्युलोकरूप देवता, 'इळा' म्हणजे भूलोकरूप देवता, आणि सरस्वती म्हणजे अंतरिक्षरूप देवता.

९. सू. १३ मं. १० पहा.
'त्यांची'='तेषाम्.' पशूंची.

उप त्मन्या वनस्पते पाथो देवेभ्यः सृज ।
अग्निर्हव्यानि सिष्वदत् ॥ १० ॥

उप । त्मन्या । वनस्पते । पाथः । देवेभ्यः । सृज ।
अग्निः । हव्यानि । सिस्वदत् ॥ १० ॥

पुरोगा अग्निर्देवानां गायत्रेण समज्यते ।
स्वाहाकृतीषु रोचते ॥ ११ ॥ ९ ॥

पुरःऽगाः । अग्निः । देवानाम् । गायत्रेण । सम् । अज्यते ।
स्वाहाऽकृतीषु । रोचते ॥ ११ ॥ ९ ॥

---

## भाषायाम्.

१०. हे वनस्पते (=यूपाभिमानिन् देव ), [ त्वं ] त्मन्या ( =आत्मनैव ) देवेभ्यः (=देवानामर्थं ) पाथः उप सृज (=पशुरूपमन्नम् उत्पादय ) । [ तस्योत्पत्तेरनन्तरम् ] अग्निः हव्यानि ( =हवींषि ) सिष्वदत् ( =स्वदुयतु=स्वादूकरोतु ) ॥

११. देवानां पुरोगाः ( =पुरोगामी=मुख्यः ) अग्निः गायत्रेण सम् अज्यते (=व्यक्तीक्रियते=पूज्यते ), स्वाहाकृतीषु ( =स्वाहाकारयुक्तेषु हविर्दानेषु सत्सु ) [ स ] रोचते ( =अत्यर्थं दीप्यते ) ॥

एताः प्रयाजदेवता यज्ञावयवाभिमानिन्यः । तद्द्वारा यज्ञ एव स्तूयत इति केषांचिन्मतम् । अग्नेरेव नामान्तरमित्यन्ये । इति सायणः ॥

१०. हे **वनस्पती**, तूं देवांकारणें स्वतः अन्न उत्पन्न कर. अग्नि हव्यांला गोड करील.

११. देवांचा पुढारी अग्नि स्तोत्रानें अलंकृत केला आहे. **स्वाहाकार** होतांच तो अत्यंत प्रकाशतो.

10. Yield thou, O *Vanaspati*, of thy own accord the food for the gods. Agni shall then sweeten the offerings.

11. Agni, the foremost of the gods is honoured with a hymn. He shines when oblations are given with *Svâhâ*.

---

१०. सू. १३ मं. ११ पहा.

देवांला अर्पावयाचें जें मांसरूप अन्न तें, यूपाला बांधलेल्या पशूपासून मिळावयाचें; याकरितां ऋषि यूपालाच म्हणतो कीं, तें मांसरूपी अन्न तूं उत्पन्न कर. आणि यूपापासून हिरवें मांस मिळाल्यावर तें मग अग्नि शिजवून रुचिकर करील.

११. सू. १३ मं. १२ पहा.

हा मंत्र 'स्वाहा' हा जो उद्गारदर्शक शब्द त्याच्या अभिमानी देवतेविषयीं असल्यामुळें 'स्वाहा' हा शब्द यांत आणिला आहे. वस्तुतः पाहिलें तर यांत स्तुति अग्नीचीच आहे.

'स्वाहाकार होतांच' =' स्वाहाकृतीषु.' म्हणजे 'स्वाहा'! 'स्वाहा'! असा मोठ्यानें उच्चार करून घृतादिकांच्या आहुति अग्नीमध्यें टाकितांच.

## सूक्तम् १८९.

अगस्त्य ऋषिः । अग्निर्देवता । त्रिष्टुप् छन्दः ।

**अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १ ॥**

अग्ने । नय । सुऽपथा । राये । अस्मान् । विश्वानि । देव । वयुनानि । विद्वान् ।
युयोधि । अस्मत् । जुहुराणम् । एनः । भूयिष्ठाम् । ते । नमःऽउक्तिम् । विधेम ॥ १ ॥

**अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि विश्वा ।**
**पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शं योः ॥ २ ॥**

अग्ने । त्वम् । पारय । नव्यः । अस्मान् । स्वस्तिऽभिः । अति । दुःऽगानि । विश्वा ।
पूः । च । पृथ्वी । बहुला । नः । उर्वी । भव । तोकाय । तनयाय । शम् । योः ॥ २ ॥

---

### भाषायाम्.

१. हे देव (=द्योतमान) अग्ने, विश्वानि वयुनानि विद्वान् (=सर्वाणि यजनकर्माणि=सर्वान् उपासनाप्रकारान् जानन्) [त्वं] सुपथा (=शोभनेन मार्गेण) अस्मान् राये नय (=स्वर्गादिधनं प्रति प्रापय)। जुहुराणम् एनः (=हिंसकं पापम्) अस्मत् युयोधि (=अस्मत्तः पृथक् कुरु=तस्मादस्मान् विमोचय)। ते (=तव) भूयिष्ठां नमउक्तिम् (=अतिप्रवृद्धां नमस्कारोक्तिं=स्तुतिं) विधेम (=परिचरेम)॥

उत्पथप्रतिपन्नो यो भ्रष्टो वापि पथः क्वचित् । पन्थानं प्रतिपद्येत कृत्वा वा कर्म गर्हितम् । अग्ने नयेति सूक्तेन प्रत्यृचं जुहुयाद् घृतम् । जपेच्च प्रयतो नित्यम् उपतिष्ठेत वानलम् । इति शौनकः ऋग्विधाने ॥

२. हे अग्ने, नव्यः (=स्तवनार्हस्) त्वम् अस्मान् स्वस्तिभिः (=शोभनैरुपायैः) विश्वा दुर्गाणि (=सर्वाणि पापानि) अति पारय (=तेषां पारं नय)। च (=अपि च) नः (=अस्मदर्थं) पृथ्वी (=पृथुतरा) बहुला (=विस्तीर्णा) उर्वी (=दीर्घा)

## सूक्त १८९.

ऋषि–अगस्त्य. देवता–अग्नि. वृत्त–त्रिष्टुभ्.

१. हे देदीप्यमान अग्नी, सकल उपासनांतें जाणणारा असा जो तूं, तो आम्हांला चांगल्या मार्गानें संपत्तीप्रत ने. नाशक पापाला आम्हांपासून दूर कर. तुझी आम्ही अत्यंत स्तुति करूं.

२. हे अग्नी, स्तुत्य असा जो तूं तो आम्हांला कल्याणकारक उपायांनीं सकळ पापांच्या पार ने. तूं आम्हांला विस्तीर्ण, मोठा आणि अफाट असा प्राकार हो. तूं आमच्या मुलांस आणि पुत्रांस कल्याण आणि सुख देणारा हो.

## HYMN 189.

To *Agni*. By *Agastya*. Metre —*Trishṭubh*.

1. Knowing all modes of worship do thou, O brilliant Agni, lead us to wealth by a good road. Separate from us destructive sin. We will offer exceeding praise to thee.

2. O Agni, do thou, who deservest to be praised, take us safely across all dangers by auspicious means. Be thou to us a great, long and extensive fortress, [ and ] a source of happiness and prosperity to our children and our sons.

---

१. 'सकल उपासनांतें जाणणारा'= 'विश्वानि वयुनानि विद्वान्.' म्हणजे उपासना करण्याचे जे निरनिराळे प्रकार, ते ज्याला ठाऊक आहेत असा.

'संपत्तीप्रत'=' राये.'

'हें सूक्त अति प्राचीन काळापासून फार प्रसिद्ध आहे. 'ऋग्विधान' या नांवाच्या ग्रंथांत शौनक म्हणतात कीं, वाईट मार्गास लागलेला, अथवा मार्गापासून भ्रष्ट झालेला, अथवा ज्याणें निंद्य कर्म केलें असेल असा कोणी 'अग्ने नय' हें सूक्त म्हणून प्रत्येक ऋचेला तुपाची आहुति देईल, आणि नित्य नियमानें जपेल अथवा अग्नीची उपासना करील, तो पुनः मार्गाप्रत पोंहचेल.' शिवाय पहिल्या पांच ऋचा श्रावणींत म्हणतात, आणि पहिली आणि दुसरी ह्या ऋचा अष्टमीश्राद्धांत म्हणण्याची चाल आहे.

'प्राकार हो' = 'पूर्भव.' म्हणजे किल्ला हो, तट हो.

तुळाभार करितात त्यांत या मंत्राचा पाठ म्हणतात.

वृत्तासाठीं 'पुरुथ' असें म्हणावें.

अग्ने त्वमस्मद्युयोध्यमीवा अनग्नित्रा अभ्यमन्त कृष्टीः ।
पुनरस्मभ्यं सुवितायं देव क्षां विश्वेभिरमृतेभिर्यजत्र ॥ ३ ॥

अग्ने । त्वम् । अस्मत् । युयोधि । अमीवाः । अनग्निऽत्राः । अभि । अमन्त । कृष्टीः ।
पुनः । अस्मभ्यम् । सुवितायं । देव । क्षाम् । विश्वेभिः । अमृतेभिः । यजत्र ॥ ३ ॥

---

पूः (=प्राकारः=संरक्षणसाधनं) भव । तोकाय तनयाय [च] (=अपत्येभ्यः पुत्रेभ्यश्च) शं योः (=सुखं कल्याणं च) [भव] ॥

पूश्च पृथ्वी बहुला न उर्वीत्यत्र अधा मही न आयस्यनाधृष्टो नृपीतये पूर्भवा शतभुजिः (ऋ. ७.१५.१४) तस्य च अधाधुना हे अग्ने अनाधृष्टोऽप्रतिधर्षणीयस्त्वं नोऽस्माकं नृपीतये नृणां रक्षणार्थं मही महत्यायसा निर्मिता शतभुजिरत्यन्तं विस्तृता शतगुणा पूः पुरी । तद्रक्षासाधनभूतप्राकारादिर्वा पूरुच्यते । भव । यथायसा निर्मिता पुरी तद्रक्षासाधनभूतप्राकारादिर्वा शत्रुभ्यो भीतान्रक्षति तद्वद्राक्षसेभ्यो भीतानस्मान् पाहीत्यर्थः । इति भाष्यमनुसंधेयम् ॥

---

## भाषायाम्.

३. हे अग्ने, त्वम् अस्मत् (=अस्मत्तः) अमीवाः (=व्याधीन्) युयोधि (=पृथक्कुरु) । [ता अमीवा] अनग्नित्राः कृष्टीः (=अग्निनापालयिताः प्रजाः=अनग्निपालितान् जनान्) अभिअमन्त (=अभिभवन्तु=अभिभवितुमर्हन्ति) । पुनः (=अपि तु) हे देव (=द्योतमान) यजत्र (=यजनीय) [अग्ने], विश्वेभिः (=सर्वैः) अमृतेभिः (=अमृतैः=अमरैर्देवैः सह) अस्मभ्यं सुविताय (=अस्मदर्थं शोभनफलाय =अस्माकं कल्याणाय) क्षां (=भूमिं प्रति) [आगच्छ] ॥

३. हे अग्नी, तूं आम्हांपासून व्याधींला काढून टाक. ज्यांचें रक्षण अग्नि करीत नाहीं त्या लोकांस [ व्याधींनीं ] पीडावें. तर आमचें कल्याण व्हावें म्हणून, हे पूजनीय [ आणि ] देदीप्यमान [ अग्नी ], तूं सकळ अमरांला घेऊन भूमीवर [ ये ].

3. Remove from us, O Agni, [all] diseases. They should distress those men who are not protected by Agni. On the contrary [come thou] to the earth with all the immortals for our welfare.

---

३. 'ज्यांचें रक्षण' इ०. म्हणजे तूं आमचें रक्षण करितोस अशी प्रसिद्धि आहे त्यापेक्षां तुझे आश्रित जे आम्ही त्या आम्हांस रोगाचा उपद्रव होऊं नये. अग्नीचे जे अनाश्रित त्यांस व्हावा.

पाहि नो अग्ने पायुभिरजस्रैरुत प्रिये सदन आ शुशुक्वान् ।
मा ते भयं जरितारं यविष्ठ नूनं विदन्मापरं सहस्वः ॥ ४ ॥
पाहि । नः । अग्ने । पायुऽभिः । अजस्रैः । उत । प्रिये । सदने । आ । शुशुक्वान् ।
मा । ते । भयम् । जरितारम् । यविष्ठ । नूनम् । विदत् । मा । अपरम् । सहस्वः ॥ ४ ॥

मा नो अग्नेऽव सृजो अघायाविष्यवे रिपवे दुच्छुनायै ।
मा दत्वते दशते मादते नो मा रीषते सहसावन्परा दाः॥५॥१०
मा । नः । अग्ने । अव । सृजः । अघाय । अविष्यवे । रिपवे । दुच्छुनायै ।
मा । दत्वते । दशते । मा । अदते । नः । मा । रिषते । सहसाऽवन् । परा । दाः ॥ ५ ॥ १० ॥

---

### भाषायाम्.

४. हे अग्ने, नः (=अस्मान्) अजस्रैः पायुभिः (=अविच्छिन्नैः संरक्षणप्रकारैः) पाहि (=पालय) उत (=अपि च) शुशुक्वान् (=अतिशयेन दीप्तिमान्) [सन्] प्रिये सदने (=तव प्रियभूते यागगृहे) आ[सीद=आगत्य निषीद] । हे यविष्ठ (=अतिशयेन तरुण), ते जरितारं (=स्तोतारं) भयं (=भीतिर्) नूनं मा विदत् (=अद्य मा प्राप्नोतु) [तथैव] हे सहस्वः (=सहस्वन्=बलवन्), अपरं मा [विदत्] (=अपरस्मिन् दिने श्वोपि मा प्राप्नोतु) ॥

५. हे अग्ने, नः (=अस्मान्) अघाय (=हिंसकाय) मा अव सृजः (=मा-त्याक्षीः) अविष्यवे (=भक्षयितुम् इच्छते) रिपवे (=शत्रवे) दुच्छुनायै (=द्विषे) [च] [माव सृजः] । दत्वते (=दन्तवते) दशते (=खादते सर्पादये) [च] मा [परा दाः] अदते (=अदन्तकाय=शृङ्गादिभिर्घातिने) नो मा [परा दाः] [अपि च] हे सहसावन् (=सहस्विन् बलवन्नग्ने), रिषते (=हिंसकाय तस्कर राक्षसादये) मा परा दाः (=पराभूतं मा देहि=मा तेस्मान् पराभिभवन्तु) ॥

| | | | |
|---|---|---|---|
| | | | रु. आ. |
| रा. रा. नारायण विष्णु बापट. | ... ... ... | ,, | ६— ० |
| ,, गोविंद रामचंद्र खांडेकर. | ... ... | ,, | ६— ० |
| ,, सोराबजी शापूरजी. | ... ... ... | ,, | ६— ० |
| ,, नागेश रामचंद्र तांबे. | ... ... ... | ,, | ६— ६ |
| ने. सी. लायब्ररी उमरावती. | ... ... ... | ,, | ६— ६ |
| ने. ज. लायब्ररी वेंगुर्लें. | ... ... ... | ,, | ६— ६ |
| श्रीमंत गायकवाड सरकार. | ... ... ... | ,, | १५९— ६ |
| डाक्टर आत्माराम पांडुरंग. | ... ... ... | ,, | ६— ० |

---

Registered No. 110 of 1878.

## NOTICE.

The third Volume of the *Vedârthayatna* will end with the last hymn of the 1st Maṇḍala, i. e. with hymn 191.

Subscription is annual and commences with the beginning of any Volume.

## विशेष सूचना.

पहिल्या मंडलाचें शेवटचें सूक्त, म्हणजे ऋग्वेद संहितेचें सूक्त १९१, हें संपलें म्हणजे वेदार्थयत्नाचा तिसरा भाग संपेल.

## सूचना.

| | रु. | आ. |
|---|---|---|
| वर्षाची वर्गणी, आगाऊ | ६ | ० |
| मुंबईबाहेर राहणारांस टपाल हांशिलाबद्दल दरवर्षाचे | ० | ६ |
| फुटकळ दर प्रतीस | ० | १० |

वर्गणीदार होण्यास इच्छिणाऱ्यानीं कोणत्याहि भागाच्या आरंभापासून वर्गणीदार व्हावें.

All communications to be addressed to the Manager Mr. Mahâdeva Nârâyan Paṇḍit, No. 29 *Moroba Popatji's Oart, Kalka Devî Road, Bombay.*

सर्व प्रकारचा पत्रव्यवहार मुंबई मोरोबा पोपटजीची वाडी घर नंबर २९, या पत्त्यावर रा. रा. महादेव नारायण पंडित "म्यानेजर वेदार्थयत्न" यांच्याशीं ठेवावा.

THE

# VEDÂRTHAYATNA

OR

## AN ATTEMPT TO INTERPRET THE VEDAS.

The Rigveda Saṁhitâ with Marâṭhî and English translations, a paraphrase in classical Sanskrit and copious notes in Marâṭhî.

# वेदार्थयत्न.

## ऋग्वेदसंहिता

पदांसहित व

तिचें मराठी आणि इंग्रजी भाषांतर,

संस्कृत व्याख्या आणि मराठी टीका.

VOL. III. NO. 17. FEBRUARY 1880. MONTHLY PART 47.

पुस्तक ३. अंक १७. फेब्रुवारी सन १८८०. मासिक भाग ४७.

मुंबईत

"निर्णयसागर" छापखान्यांत छापिलें.

पांच ता० ३ पासून ता० २८ फब्रुवारी सन १८८० पर्यंत.

| | | रु. आ. |
|---|---|---|
| रा. रा. गोविंद विनायक खामाटे बाकी. ... ... ... | | १९— २ |
| ,, गणेश महादेव भांडारकर ,, ... ... ... | | ६— ६ |
| ,, गणेश जनार्दन आगासे. ,, ... ... ... | | ७— ० |
| ,, माणिकलाल लहाभाई ,, ... ... ... | | ९— ५ |
| रावबहादूर. खंडेराव विश्वनाथ रास्ते ,, ... ... ... | | २५— ८ |
| ,, कृष्णाजी लक्ष्मण नूलकर. ,, ... ... ... | | ६— ६ |
| ठाकूर साहेब मोरवी. ,, ... ... ... | | १२७— ८ |
| डाक्तर नारायण अनंत पंढरपूर. ,, ... ... ... | | १२—१२ |
| रा. रा. मणिभाई जसभाई दिवाण ... ... | १८७९।८० | १२—१२ |
| डाक्तर भाऊ शिरके ... ... ... | १८७९।८० | ६— ६ |
| रा. रा. शिवराव गोविंद धारकर ... ... | १८७९।८० | ६— ० |
| पोलिटिकल सावंतवाडी ... ... ... | ,, | १९— २ |
| रावबहादूर. अनंदराव भास्करजी ... ... | ,, | ६— ६ |
| पाद्री. जानस्माल पुणें. ... ... ... | ,, | ६— ६ |
| सर. रिचर्ड. मिड. साहेब, हैदराबाद. ... | ,, | १२—१२ |
| रा. रा. आनंदराव सखाराम बरवे ... ... | ,, | ६— ६ |
| गव्हरनर सिलोन ... ... ... ... | ,, | ७६— ८ |
| चिफ् कमेशनर मैसूर ... ... ... | ,, | ६३—१२ |
| डाक्तर लेट्नर पंजाब ... ... ... | ,, | १२—१२ |
| जे. ए. व्हयानूस. गवी ... ... ... | ,, | ६— ६ |
| कलकत्ता एसियाटीक सोसायटी ... ... | ,, | ६— ६ |
| रेव्हरंड. के. एम. बानरजी ... ... ... | ,, | ६— ६ |
| डाक्तर. ए. बरनेल. तांजोर.... ... ... | ,, | ६— ६ |
| एफ्. एस्. ग्रोस साहेब ... ... ... | ,, | ६— ६ |
| रा. रा. बालकृष्ण एल्. बापट... ... ... | ,, | ६— ६ |
| ,, लक्ष्मण विठ्ठल कारभारी ... ... | ,, | ६— ६ |
| ,, नेटीव. लायब्रेरी नडीयाद ... ... | ,, | ६— ६ |

४. हे अग्नी, तूं आम्हांस अविच्छिन्न पालनांनीं संभाळ, आणि देदीप्यमान होत्साता प्रिय घरांत [बैस]. हे अत्यंत तरुण [अग्नी], तुझ्या स्तोत्याला आज भीति प्राप्त न होओ, [आणि] हे बळवान [अग्नी] उद्यांहि [ प्राप्त ] न [ होओ ].

५. हे अग्नी, तूं आम्हांला हिंसकाच्या स्वाधीन, खाऊन टाकणाऱ्याच्या स्वाधीन, शत्रूच्या स्वाधीन [ अथवा ] द्वेष्टयाच्या स्वाधीन करूं नको. आम्हांला दांत असणाऱ्याच्या, आणि दंश करणाऱ्याच्या हातीं देऊं नको. दांत नसणाऱ्याच्या हातीं देऊं नको, हे बलवान् [ अग्नी ], नाशकाच्या हातीं देऊं नको.

4. Protect us, O Agni, with uninterrupted protections, and do thou the most brilliant one [ sit down ] in [ thy ] dear home. May terror never touch thy singer to-day, O most youthful [ Agni ], nor [ touch him ] tomorrow, O mighty one !

5. Do not, O Agni, abandon us to the noxious, to him who consumes, to the enemy, to the hater. Do not give us away to him who has teeth, to him who stings nor to him who has no teeth, nor O mighty Agni, to him who injures.

---

४. 'अविच्छिन्न पालनांनीं'=' अजस्रैः पायुभिः': म्हणजे ज्यांचा नाश कधीं कोणीहि करूं शकत नाहीं अशा रक्षणप्रकारांनीं.

'प्रिय घरांत '=' प्रिये सदने.' जेथें यज्ञ करितात त्या मंडपांत.

'अत्यंत तरुण '=' यविष्ठ.' सू. २२ मं. १० आणि टीप पहा.

५. 'दांत नसणाऱ्याच्या हातीं'= 'अदते.' म्हणजे दांतांनीं नव्हे, तर शिंगांनीं मारणारे जे प्राणी त्यांच्या स्वाधीन.

वि घ त्वावाँ ऋतजात यंसद्गृणानो अग्ने तन्वे वरूथम् ।
विश्वाद्रिरिक्षोरुत वा निनित्सोरभिह्रुतामसि हि देव विष्पट् ॥६॥
वि । घ । त्वाऽवान् । ऋतऽजात । यंसत् । गृणानः । अग्ने । तन्वे । वरूथम् ।
विश्वात् । रिरिक्षोः । उत । वा । निनित्सोः । अभिऽह्रुताम् । असि । हि । देव । विष्पट् ॥ ६ ॥
त्वं ताँ अग्न उभयान्वि विद्वान्वेषि प्रपित्वे मनुषो यजत्र ।
अभिपित्वे मनवे शास्यो भूर्मर्मृजेन्य उशिग्भिर्नाक्रः ॥ ७ ॥
त्वम् । तान् । अग्ने । उभयान् । वि । विद्वान् । वेषि । प्रऽपित्वे । मनुषः । यजत्र ।
अभिऽपित्वे । मनवे । शास्यः । भूः । मर्मृजेन्यः । उशिक्ऽभिः । न । अक्रः ॥ ७ ॥

---

## भाषायाम्.

६. हे ऋतजात (=यज्ञाय जात ) अग्ने, त्वावान् (=त्वया तद्वान्=त्वद्भक्तो ) गृणानः (=स्तुतिं कुर्वन्=तव स्तोत्रं कृत्वा ) तन्वे (=आत्मने=स्वात्महितार्थं ) विश्वाद् (=सर्वस्मात् ) रिरिक्षोः ( =हिंसितुमिच्छोः ) उत वा (=अथवा) निनित्सोः (=निन्दितुमिच्छतो ) वरूथं (=रक्षकं कवचं ) वि च यंसत् (=वियच्छेत् खलु=प्रयच्छेत् खलु=प्रयन्तुं समर्थो भवति ) ; हि (=यस्मात् कारणात् ) हे देव (=द्योतमान), [ त्वम्] अभिह्रुतां ( =कुटिलं कुर्वतां द्विषां) विष्पट् असि (=विशेषेण द्रष्टा= विशेषेण बाधकोसि ) ॥

७. हे यजत्र अग्ने (=हे यजनीय अग्ने ), तान् उभयान् विद्वान् (=देवान् मनुष्यांश्चेत्युभयजनान् जानन् ) प्रपित्वे (=प्रातःकाले ) मनुषः ( =मनुष्यान्) वि वेषि (=विविधं गच्छसि=भिन्नभिन्नमनुष्यान् प्रति गच्छसि ) । अभिपित्वे (=सायंकाले ) अक्रः (=शत्रूणामाक्रमिता ) [ त्वं ] मनवे शास्यः (=यजमानाय स्तुत्यः ) उशिग्भिः मर्मृजेन्यो न (=ऋत्विग्भिश्च परिचरणीयो ) भूः (=भवसि ) ॥

६. हे यज्ञासाठीं निर्माण झालेल्या अग्नी, तुझा भक्त तुझी स्तुति करून आपणासाठीं प्रत्येक घातेच्छू आणि निंदेच्छूपासून रक्षण करणारें कवच मिळविण्याला समर्थ होय. कारण कीं हे द्योतमान [ अग्नी ], तूं दुष्ट जनांचा संहार करणारा आहेस.

७. हे पूजनीय अग्नी, तूं [ देव आणि मनुष्य ] या दोन्ही लोकांस जाणणारा होत्साता प्रात:काळीं मनुष्यांप्रत येत असतोस. पराक्रमी तूं संध्याकाळीं ऋत्विजांनीं जसा उपास्य असतोस तसा यजमानाला स्तवनीय असतोस.

6. O Agni born for [ promoting ] sacrifice, thy servant praises [ thee ] and is able to obtain for himself protection from every evil-minded [ and every ] evil-tongued person. For thou, O brilliant [ Agni ], art the destroyer of the wicked.

7. Knowing both the races (gods and men ) thou comest, O adorable Agni, to men in the morning. In the evening thou, the victor, becomest the object of praise to the sacrificer as thou [ art ] the object of worship to the priests.

---

६. ' हे अग्नी, तुझा भक्त जो असेल त्याणें तुझी स्तुति केली म्हणजे सर्व नाशकांपासून आणि सर्व निंदकांपासून रक्षण करणारें कवच जणुं त्याणें घातल्याप्रमाणें त्याचें रक्षण होत असतें.'

वृत्तासाठीं ' तुआवान् ' व ' तनुए ' असें म्हणावें.

७. ' देवांस आणि मनुष्यांस जाणणारा असा जो अग्नि तो सकाळीं सर्व मनुष्यांचे घरीं येतो, आणि संध्याकाळींहि तो येतो; आणि त्याचें स्तोत्र यजमान करितो आणि ऋत्विज त्याची सेवा करितात.' असा भाषांतराचा भावार्थ. तथापि ' तान् उभयान् विद्वान् ' आणि ' मर्मृजेन्यः उशिग्भिः न अक्रः' इतके शब्द कठिण आहेत.

**अवोचाम निवचनान्यस्मिन्मानस्य सूनुः सहसाने अग्नौ ।**
**वयं सहस्रमृषिभिः सनेम विद्यामेषं वृजनं जीरदानुम् ॥८॥११॥**

अवोचाम । निऽवचनानि । अस्मिन् । मानस्य । सूनुः । सहसाने । अग्नौ ।
वयम् । सहस्रम् । ऋषिऽभिः । सनेम । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ८ ॥ ११ ॥

## भाषायाम्.

८. [ अनेन प्रकारेण ] मानस्य सूनुः ( =माननामकस्योपासकस्य पुत्रः ) [अहम्] अस्मिन् सहसाने ( =शत्रूणामभिभवितरि ) अग्नौ ( =तस्यार्थे ) निवचनानि (=एतानि स्तोत्राणि ) अवोचाम ( =प्रावादिष्म=प्रावदम् ) । वयम् ऋषिभिः ( =सूक्तकर्तृभिर्द्वारा ) सहस्रं [ धनं ] सनेम ( =संभजेमहि ) । [ वयम् ] इषम् ( =अन्नं) वृजनं ( =बलं ) जीरदानुं ( =क्षिप्रधनं ) [ वीरं=पुत्रं च ] विद्याम ( =लभेमहि )॥

---

## सूक्तम् १९०.

अगस्त्य ऋषिः । बृहस्पतिर्देवता । त्रिष्टुप् छन्दः ॥

**अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः ।**
**गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः ॥१॥**

अनर्वाणम् । वृषभम् । मन्द्रऽजिह्वम् । बृहस्पतिम् । वर्धय । नव्यम् । अर्कैः ।
गाथान्यः । सुऽरुचः । यस्य । देवाः । आऽशृण्वन्ति । नवमानस्य । मर्ताः ॥ १ ॥

## भाषायाम्.

१. अनर्वाणम् ( =अप्रत्यृतं=केनापि प्रतिकूलेनाप्राप्तं ) वृषभं ( =वृषणं=नित्ययुवानं ) मन्द्रजिह्वं ( =मादकवचनं=मधुरवाचं ) नव्यं ( =स्तुत्यर्हं ) बृहस्पतिं ( =मन्त्रस्य पालयितारमेतन्नामकं देवम् ) अर्कैर्वर्धय ( =स्तोत्रैः संतोषय ) । गाथान्यः ( =स्तोत्रनायकस्य ) सुरुचः ( =शोभनदीप्तिमतो ) यस्य नवमानस्य ( =स्तुवानस्य=

८. [या प्रकारेंकरून] या पराक्रमी अग्नीप्रीत्यर्थ मी मानाच्या पुत्रानें स्तोत्रें म्हटलीं आहेत. आम्हांला ऋषींच्या योगेंकरून सहस्र [धनांचा] लाभ होओ. आंम्हांला अन्न, बळ, [आणि] लवकर संपत्ति मिळवून देणारा पुत्र, यांची प्राप्ति होओ.

8. [Thus] have I the son of Mâna sung these hymns in honour of this victorious Agni. May we attain to thousand-fold [wealth] through the sages. May we obtain food, strength, [and] a son that shall quickly make us rich.

८. 'मानाच्या पुत्रानें' = 'मानस्य सूनुः.' म्हणजे मानऋषीचा वंशज जो या सूक्ताचा कर्ता त्याणें. सू. ११७मं. ११आणि सू. १६९मं. ८ आणि त्याजवरील टीप पहा.

'ऋषीच्या योगेंकरून' = 'ऋषिभिः.' म्हणजे जे ऋषि (अथवा कवि) हें सूक्त आम्हांबरोबर म्हणावयास लागले आहेत त्यांच्या योगेंकरून. 'मंत्रांच्या योगेंकरून' असा सायण अर्थ करितात त्याला प्रमाण दिसत नाहीं.

## सूक्त १९०.

ऋषि–अगस्त्य. देवता– बृहस्पति. वृत्त–त्रिष्टुभ्.

१. [हे होत्या], अजिंक्य, अजर, सुवचन,[आणि] स्तुत्य असा जो बृहस्पति त्याला तूं स्तोत्रांनीं संतुष्ट कर. जो स्तोत्रनायक, सुदीप्तिमान् [बृहस्पति] स्तवन करूं लागला म्हणजे देव [आणि] मर्त्य हे स्तब्ध होऊन ऐकितात.

## Hymn 190.

To *Brihaspati* (the presiding deity of Prayer). By *Agastya*. Metre—*Trishtubh*.

1. Delight with hymns Brihaspati, who is irresistible, ever young, sweet-tongued, [and] worthy of being praised; whom the gods [and] the mortals hear when he, the leader of hymns, and bright in appearance, sings the praises.

१. 'बृहस्पति' म्हणजे स्तोत्राची देवता, अथवा स्तोत्ररूपच देवता. सू. १४ मं. ३ आणि सू. १०५ मं. १७ आणि त्यावरील टीप पहा.

**तमृत्विया उप वाचः सचन्ते सर्गो न यो देवयतामसर्जि ।**
**बृहस्पतिः स ह्यञ्जो वरांसि विभ्वाभवत्समृते मातरिश्वा ॥ २ ॥**

तम् । ऋत्वियाः । उप । वाचः । सचन्ते । सर्गः । न । यः । देवऽयताम् । असर्जि ।
बृहस्पतिः । सः । हि । अञ्जः । वरांसि । विऽभ्वा । अभवत् । सम् । ऋते । मातरिश्वा ॥ २ ॥

---

स्तोत्राणि गायतो ) [ बृहस्पतेः=बृहस्पातें =बृहस्पतेर्वचनानि ) देवा मर्ताः ( =देवाश्च मर्त्याश्च ) आशृण्वन्ति ( =सादरं शृण्वन्ति ) ॥

---

## भाषायाम्.

२. तम् ऋत्वियाः ( =ऋतुसंबन्धिन्यः =कालेकाले जाता ) वाचः ( =स्तुतय ) उप सचन्ते ( =उपेत्य सेवन्ते ) । यो [ बृहस्पतिर् ] देवयतां सर्गो न असर्जि (=देवान् इच्छतां जनानां=स्तोतॄणां सार इव सृज्यते=जातोस्ति) । वरांसि अञ्जः (=? तेजांसि प्रादुर्भावयन् ) स विभ्वा (=महान् ) मातरिश्वा बृहस्पतिः ऋते (=यज्ञे ) सम् अभवत् ( =संभूतः ) ॥

यः स्तोतॄणां सारभूतोजायत यश्च वृत्रहननेन तेजांसि प्रादुर्भावयति यश्च यज्ञे मन्त्ररूपेण संभूतः स बृहस्पतिः सर्वैः कालेकाले स्तोत्रेण स्तूयत इति भावः ॥

एषा भृशमेव दुःखेन बुध्यते । तथा सायणेनापि कथंकथमपि व्याख्याता । तदेवम् । तं बृहस्पतिमृत्विया वर्षर्तुसंबन्धिन्यो वाचो माध्यमिका उप सचन्ते । समीपे सेवन्ते । यः सर्गो न । उदकस्य स्रष्टापि ॥ न शब्दोप्यर्थे ॥ देवयतां देवानिच्छतां यजमानानामसर्जि फलम् । यद्वा देवत्वमिच्छतां मनुष्याणामसर्जि सृष्टवान्वृष्ट्युदकम् । यद्वा ऋत्वियाः प्राप्तकालीना वाचो होत्रादिप्रेरिता वाच उप सचन्ते तं यः सर्गो न उदकसृष्टिरिव सः स एव बृहस्पतिरञ्जो हि । व्यञ्जकः खलु । तस्मिन्वर्षति सर्वे भवन्ति । अत एव विभ्वा विभुर्व्याप्तो मातरिश्वा वृष्टिनिर्मातर्यन्तरिक्षे चेष्टमानो वायुसदृशो वा वरांसि वरणीयानि वृष्ट्यादिफलानि संपादयन् ऋत उदके निमित्तभूते सति समभवत् । संभूता । अथवा अञ्जो यज्ञियानां व्यञ्जको मातरिश्वा फलस्य निर्मातरि यज्ञे श्वसिता वर्तमानः स बृहस्पतिर्ऋते यज्ञे निमित्तभूते सति वरांसि वरणीयानि हवींषीच्छन् विभ्वा विभुः समभवत् । इति ॥

२. त्याला नियमित वेळीं होणाऱ्या स्तुति सेवितात. जो देवभक्तांचा सार जणुं जन्मला. तो महान् मातरिश्वा बृहस्पति तेजांला प्रगट करणारा होत्साता यज्ञांत उत्पन्न झाला.

2. Upon Him wait praises offered at regular times, who was born as it were the quintessence of devout men. That vast Mâtaris'vâ Brihaspati, who manifests all the lights, was born in worship.

---

२. भावार्थः 'जो बृहस्पति म्हणजे केवळ स्तोते जनांचें सार होय, जो वृत्रादिकांला मारून सूर्यादिकांचीं तेजें प्रगट करितो, आणि जो मन्त्ररूपानें यज्ञांत जन्मला, त्या बृहस्पतीची सेवा स्तुतिरूप वाणी नेमलेल्या वेळीं नित्य करितात.'

'देवभक्तांचा सार जणुं जन्मला'= 'सर्गो न यो देवयताम् असर्जि.' म्हणजे जो स्तोत्यांचें (ऋषींचें) जीवनच जणुं, प्राणच जणुं, तत्त्वच कीं काय, असा होय. बृहस्पति ज्यापेक्षां स्तोत्ररूप देवता होय, त्यापेक्षां तो स्तोत्यांचें सार होय असें म्हणणें स्वाभाविक आहे. बृहस्पति उत्तम स्तोता अशी प्रसिद्धि आहेच.

'मातरिश्वा बृहस्पति.' मातरिश्वा हें जसें अग्नीचें विशेषण तसेंच बृहस्पति अथवा ब्रह्मणस्पति याचेंहि आहे. सू.९६ मं. ४ आणि त्याजवरील टीप पहा.

'तेजांला प्रगट करणारा'='अज्ञो वरांसि.' हे शब्द कठिण आहेत. 'अज्ञ' म्हणजे 'व्यञ्जक' अथवा प्रादुर्भाव करणारा असा जो अर्थ तो सायणानुसार केला आहे. पण त्याला दुसरें प्रमाण पाहिजे. शिवाय 'वरांसि' ही द्वितीया षष्ठ्यर्थीं घ्यावी लागते ही तरी मोठी अडचण नाहीं, तरी कांहींशी अडचण खरीच. आतां बृहस्पति तेजांला वृत्रादिकांपासून मुक्त करितो याविषयीं सू.६२ मं. ३ आणि त्याजवरील टीप पहा.

'यज्ञांत उत्पन्न झाला'='ऋते सम् अभवत्.' हें उघडच आहे, कारण यज्ञ जर नाहीं, तर मंत्र नाहीं आणि मंत्र नाहीं तर मंत्राभिमानी बृहस्पति देवहि नाहींच.

उप॑स्तुतिं॒ नम॑स उ॒द्यतिं॑ च॒ श्लोकं॑ यंसत्सवि॒तेव॒ प्र बा॒हू ।
अ॒स्य क्रत्वा॑ह॒न्यो॒३॒॑ यो अस्ति॑ मृ॒गो न भी॒मो अ॑र॒क्षस॒स्तुवि॑ष्मान् ॥ ३

उप॑ऽस्तुतिम् । नम॑सः । उत्ऽय॑तिम् । च॒ । श्लोक॑म् । यं॒स॒त् । स॒वि॒ताऽइ॑व । प्र । बा॒हू इति॑ ।

अ॒स्य । क्रत्वा॑ । अ॒ह॒न्यः॑ । यः । अस्ति॑ । मृ॒गः । न । भी॒मः । अ॒र॒क्षसः॑ । तुवि॑ष्मान् ॥ ३ ॥

अ॒स्य श्लोको॑ दि॒वीय॑ते पृथि॒व्यामत्यो॒ न यं॑सद्य॒क्षभृ॒द्विचे॑ताः ।
मृ॒गाणां॒ न हे॒तयो॒ यन्ति॑ चे॒मा बृह॒स्पते॒रहि॑माया॒ँ अ॒भि द्यून् ॥४॥

अ॒स्य । श्लोकः॑ । दि॒वि । ईय॑ते । पृ॒थि॒व्याम् । अत्यः॑ । न । यं॒स॒त् । य॒क्षऽभृ॑त् । विऽचे॑ताः ।

मृ॒गाणा॑म् । न । हे॒तयः॑ । यन्ति॑ । च॒ । इ॒माः । बृह॒स्पतेः॑ । अहि॑ऽमायान् । अ॒भि । द्यून् ॥ ४ ॥

---

## भाषायाम्.

३. सवितेव बाहू (=सविता यथा स्वकीयान् किरणरूपान् बाहून् प्रयच्छति तथा) [बृहस्पतिः] उपस्तुतिं (=स्तोत्रं) नमस उद्यतिं श्लोकं च (=नमस्कारस्य उद्धरणं प्रदानं मन्त्रं च) प्र यंसत् (=प्रयच्छतु=प्रेरयतु)। अहन्यो योस्ति (=दिवससंबन्धी सूर्यरूपोश्वो योस्ति) [सः] अरक्षसः (=भद्रस्य) अस्य [बृहस्पतेः] क्रत्वा (=क्रतुना=सामर्थ्येन) मृगो न भीमः (=सिंह इव भयानकः) सन् तुविष्मान् (=प्रबलो) [भवति] ॥

४. अस्य [बृहस्पतेः] श्लोकः (=बृहस्पतिना कृतं स्तोत्रं) दिवि पृथिव्यां (=द्यावापृथिव्योर्मध्ये) ईयते (=त्वरया गच्छति)। यक्षभृत् (=हविरादिकं दधानो) विचेताः (=विशिष्टप्रज्ञायुक्तः) [स श्लोकः] अत्यो न (=अश्व इव) यंसत् (=प्रयन्तुं प्रकर्षेण गन्तुं समर्थो भवति)। मृगाणां हेतयो न (=? मृगेषु प्रेरिता हेतयः अस्त्राणीव) इमाश्च बृहस्पतेः (=बृहस्पतेरिमाः स्तुतिरूपा हेतयोपि) अहिमायान् द्यून् अभि (=महाप्रज्ञान् द्युप्रदेशान् प्रति) यन्ति (=गच्छन्ति) ॥

सर्वस्तोतॄणां सारभूतेन बृहस्पतिना कृतं स्तोत्रं तेनैव दत्तं हविरादिकं गृहीत्वा वेगवानश्व इव अथवा मृगेषु प्रेरिता व्याधादीनां हेतय इव द्युलोकस्थितान् महाप्रज्ञान् देवान्प्रति गच्छतीत्यभिप्रायः ॥

३. सविता जसा आपले बाहु [ प्रेरितो ] तसा [ बृहस्पति ] स्तुति, आणि नमस्काराची आहुति आणि स्तवन हीं प्रेरो. दिनसंबंधी जो [ अश्व ] आहे तो या कल्याणकारक [ बृहस्पती]च्या पराक्रमेंकरून भयंकर मृगाप्रमाणें बलवान् होतो.

3. May he send forth the praise, the offering of obeisance and the hymn even as Savitâ [ sends forth ] his arms. By the power of this beneficent one the Diurnal [ Horse ], which is formidable like the lion, is mighty.

४. ह्याचा गीत द्युलोकीं [आणि ] पृथिवीवर धांवतो. हवि धारण करणारा [ आणि ] अति बुद्धिमान् असा याचा गीत घोड्याप्रमाणें धांवूं शकतो. मृगांच्या अस्त्रांप्रमाणें बृहस्पतीचींहि अस्त्रें, महाप्रज्ञ द्युप्रदेशांप्रत जात असतात.

4. His hymn runs through heaven, through earth. Like a swift steed it can stretch, carrying oblation, and pious. Like shafts of wild beasts, these of Brihaspati run towards the celestial regions of great wisdom.

---

३. याचा भावार्थ असा दिसतो कीं, 'सूर्य जसा आपले किरण अत्यंत दूर अंतरावर एका क्षणांत पोंहचवितो, त्याप्रमाणें बृहस्पति उपासकांनीं देवांप्रीत्यर्थ केलेली स्तुति, उपासना आणि गुणवर्णना हीं देवांप्रत एकदम पाठवून देओ. त्याचा पराक्रम लहान नाहीं, तर आकाशामध्यें सूर्य जो एकाद्या महा सिंहाप्रमाणें पूर्वेकडून पश्चिमेकडे उडी मारितो तो याच्याच पराक्रमानें मारीत असतो.'

'दिनसंबंधी अश्व '=' अहन्यः'. सू. १६८ मं. ५ आणि त्यावरील टीप पहा.

४. 'बृहस्पतीनें केलेलें देवांचें स्तोत्र त्याणें अर्पिलेलें हवि घेऊन एकाद्या वेगवान वारूप्रमाणें पृथिवी आणि स्वर्ग यांवर चढतें; तें एकाद्या व्याधानें श्वापदांवर फेंकिलेल्या बाणांप्रमाणें स्वर्गीं असणाऱ्या महाप्रज्ञ देवांप्रत धांवतें.'

'मृगांच्या शस्त्रांप्रमाणें ' = ' मृगाणां न हेतयः'. ही षष्ठी किंचित् विलक्षण आहे, पण दुसरा चांगला निर्वाह दिसत नाहीं.

' महाप्रज्ञ '=' अहिमायान्.' ' अहिमाय ' शब्द कठिण आहे. सायणांनीं निरनिराळ्या ठिकाणीं निरनिराळा अर्थ

ये त्वा देवोस्त्रिकं मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः ।
न दूढ्ये३ अनु ददासि वामं बृहस्पते चयस इत्पियारुम् ॥५॥१२॥

ये । त्वा । देव । उस्त्रिकम् । मन्यमानाः । पापाः । भद्रम् । उपऽजीवन्ति । पज्राः ।
न । दुःऽध्यै । अनु । ददासि । वामम् । बृहस्पते । चयसे । इत् । पियारुम् ॥ ५ ॥ १२ ॥

सुप्रैतुः सूयवसो न पन्था दुर्नियन्तुः परिप्रीतो न मित्रः ।
अनर्वाणो अभि ये चक्षते नोऽपीवृता अपोर्णुवन्तो अस्थुः ॥ ६ ॥

सुऽप्रैतुः । सुऽयवसः । न । पन्थाः । दुःऽनियन्तुः । परिऽप्रीतः । न । मित्रः ।
अनर्वाणः । अभि । ये । चक्षते । नः । अपिऽवृताः । अपऽऊर्णुवन्तः । अस्थुः ॥ ६ ॥

---

## भाषायाम्.

५. हे देव [ बृहस्पते ], ये पज्राः ( =बलवन्तः ) पापाः ( =पापबुद्धयः ) [पुरुषा ] भद्रं ( =कल्याणं ) त्वा ( =त्वाम् ) उस्त्रिकं ( =कुत्सितमनड्वाहं ) मन्यमाना उपजीवन्ति ( =प्राणन्ति=आयुर्व्ययं कुर्वन्ति ) [ तस्मै ] दुर्ध्ये ( =तस्मै दुर्बुद्धये जनाय=तेभ्यो दुर्बुद्धिभ्यो जनेभ्यो ) न वामम् अनुददासि ( =सुखं न प्रयच्छसि ) । हे बृहस्पते, पियारुं चयसे इत् ( =हिंसकं त्वं हंस्येव ) ॥

६. [ हे बृहस्पते, त्वं ] सुप्रैतुः सूयवसो न पन्थाः [ भवसि ] ( =सुष्ठुगमनवान् सुष्ठुतृणवान्मार्ग इवासि ) [ अपि च ] दुर्नियन्तुः परिप्रीतो मित्रो न [ भवसि ] ( =दुर्निवार्यः अत्यन्तसंतुष्टः सखेवासि ) । अनर्वाणः ( =केनापि प्रतिकूलेनाप्रतिगता) ये [ ? जना ] नः अभि चक्षते (=अस्मान् आभिमुख्येन सहृदयं पश्यन्ति) [ ते ] अपीवृताः ( =शत्रुभिः स्वयम् आवृता अपि ) अपोर्णुवन्तः ( =अपगतावरणवन्तः =आवरणस्यापाकर्तारः ) [ सन्तः ] अस्थुः ( =भवन्ति ) ॥

उत्तरार्धस्य संदिग्धोर्थः । येऽनर्वाणः इत्यनेन बुभुत्सितानां दुर्ज्ञेयत्वात् ।

५. हे देवा, जे बळवान् पापी [मनुष्य] तुज कल्याणकराला निःसत्त्व मानून आयुष्य घालवितात, त्या दुष्ट [जना]चें तूं कल्याण होऊं देत नसतोस. हे बृहस्पती, तूं पापी मनुष्याला शिक्षा केल्याशिवाय राहत नाहींस.

५. Those sinful [and] strong people, O god [Brihaspati], who think thee a mean bull, thee who art beneficent, and pass their lives, to such wicked men thou givest no weal. Thou certainly dost punish, O Brihaspati, the sinful man.

६. [हे बृहस्पती], [तूं] सुगम्य [आणि] समृद्ध तृणमार्गाप्रमाणें [आहेस]. [तूं] अनिवार्य [आणि] परम संतुष्ट मित्राप्रमाणें [आहेस]. जे अजिक्य [जन] आम्हांवर कृपावलोकन करितात ते आच्छादित असतांहि आच्छादन काढून टाकणारे असे उभे राहतात.

6. [Thou art, O Brihaspati] as a road along which it is pleasant to go and along which there is good grass; like a friend difficult to restrain [and] much pleased. Those who, irresistible, look upon us [with pleasure], stand as rescuers [though] covered all over.

---

केला आहे. आणि व्युत्पत्तिहि सांगितलेली ग्राह्य दिसत नाहीं; तरीहि आम्हीं दिलेला अर्थ त्यांच्या भावार्थास अनुसरूनच आहे.

---

५. 'निःसत्त्व'='उस्रिकम्.' अक्षरशः 'दुबळं बैल.' ज्याच्या आंगांतून बळ सर्व निघून गेलें आहे असा बैल, ज्याच्या हातून कांहीं काम होण्यासारिखें नाहीं असा, निरूपयोगी.

६. ही ऋचा कठिण आहे. कारण प्रथमार्धांत प्रतिपादित जो विषय, तो उत्तरार्धांत प्रतिपादित असलेल्या विषयाहून भिन्न असतांहि प्रथमार्धांत क्रियापद नाहीं, व कर्ताहि नाहीं; आणि उत्तरार्धांत कर्तृपद जरी आहे, तरी तें कोणाचें दर्शक आहे हें ठाऊक नसल्यामुळें अर्थ समजण्यास कठिण आहे. आम्हीं अर्थ होईल तितका अक्षरशः केला आहे.

'आच्छादित असतांहि आच्छादन काढून टाकणारे'='अपीवृताः अपोर्णुवन्तः'. म्हणजे जरी त्यांस शत्रूंनीं वेष्टिलेलें असतें तरी आम्हांवरचें शत्रुवेष्टन काढून टाकणारे होत असा भावार्थ असेल काय ?

सं यं स्तुभोऽवनयो न यन्ति समुद्रं न स्रवतो रोधचक्राः ।
स विद्वाँ उभयं चष्टे अन्तर्बृहस्पतिस्तर आपश्च गृध्रः ॥ ७ ॥

सम् । यम् । स्तुभः । अवनयः । न । यन्ति । समुद्रम् । न । स्रवतः । रोधऽचक्राः ।

सः । विद्वान् । उभयम् । चष्टे । अन्तः । बृहस्पतिः । तरः । आपः । च । गृध्रः ॥ ७ ॥

एवा महस्तुविजातस्तुविष्मान्बृहस्पतिर्वृषभो धायि देवः ।
स नः स्तुतो वीरवद्धातु गोमद्विद्यामेषं वृजनं जीरदानुम् ॥८॥१३॥

एव । महः । तुविऽजातः । तुविष्मान् । बृहस्पतिः । वृषभः । धायि । देवः ।

सः । नः । स्तुतः । वीरऽवत् । धातु । गोऽमत् । विद्याम । इषम् । वृजनम् । जीरऽदानुम् ॥ ८ ॥ १३ ॥

---

## भाषायाम्.

७. यं स्तुभः (=स्तुतयः) अवनयो न सं यन्ति (=प्रवाहा इव संगच्छन्ते) [अथवा] रोधचक्राः स्रवतो न (=रोधश्चक्रा नद्य इव =रोधांस्येव चक्राणि यासां ता नद्यो यथा समुद्रं गच्छन्ति तथा गच्छन्ति) स विद्वान् (=ज्ञानवान्) गृध्रः (=जलाकाङ्क्षी) बृहस्पतिस् तरः (=वेगम्) आपश्च [इति] उभयम् [अपि] अन्तश्चष्टे (=अन्तः पश्यति) ॥

इत्यक्षरार्थः । अभिप्रायः पुनर्दुर्बोधः ।

८. एव (=अनेन प्रकारेण) बृहस्पतिर् महः (=महान्) तुविजातः (=प्रबलस्) तुविष्मान् (=बलवान्) वृषभः (=वर्षिता=वीर्यवान्) देवो धायि (=अधायि =कृतोस्ति =जातोस्ति) । सः [अस्माभिः] स्तुतः [सन्] वीरवत् गोमत् [धनं] नो धातु (=वीर्यवद्भिः पुत्रैर्युक्तं गोभिर्युक्तं धनम् अस्मभ्यं ददातु) । [अपि च] इषम् (=अन्नं) वृजनं (=बलं) जीरदानुं (=क्षिप्रदानं) [वीरं=पुत्रं च] विद्याम (=लभेमहि) ॥

७. ज्याजप्रत प्रवाह [ वाहल्या ]प्रमाणें सर्व स्तुति वाहून जातात, समुद्राप्रत तीरचक्र नद्या जशा [ वाहतात ] तशा [ वाहून जातात ], तो जलवर्षकांक्षी प्रज्ञावान् बृहस्पति वेग आणि उदकें ह्या दोहोंलाहि अंतर्यामीं पाहतो.

८. या प्रकारेंकरून बृहस्पति हा मोठा प्रबळ सामर्थ्यवान् [ आणि ] वीर्यवान् देव झाला आहे. त्याची स्तुति केली आहे, तर तो आम्हांला वीर आणि गाई प्राप्त करून देओ. आम्हांला अन्न, बळ, [ आणि ] लवकर संपत्ति मिळवून देणारा पुत्र, यांची प्राप्ति होओ.

7. That wise Brihaspati, to whom all praises flow like streams, [ flow ] as rivers rolling on their banks flow to the sea, sees, when desirous of waters, both the force and the waters within himself.

8. Thus has Brihaspati been made a great, strong, mighty, [ and ] puissant god. Being praised may he bestow upon us warriors and cows. May we obtain food, strength, [and a son] that shall quickly make [ us ] rich.

---

७. वरच्या मंत्रापेक्षां हा मंत्र कांहींसा सोपा आहे, तथापि उत्तरार्धांत 'वेग आणि उदकें या दोहोंलाहि अंतर्यामीं पाहतो' असें आहे तें दुर्बोध आहे. अक्षरार्थ भाषांतरांत दिला आहे. कदाचित्, 'बृहस्पतीला जेव्हां उदकवृष्टि व्हावी अशी इच्छा होते तेव्हां उदक कोठें आहे आणि वेगानें कसें येईल तें अंतर्यामीं समजतें' असा भावार्थ असेल काय ?

'तीरचक्र'='रोधचक्राः' हाहि शब्द कठिण आहे. तीर अथवा तटाक हींच ज्यांचीं जणुं चाकें होत अशा नद्यारूप गाड्या असा अक्षरार्थ दिसतो. अथवा सायण म्हणतात तसा तीरांवरून जाणाऱ्या हा अर्थ असेल.

८. हा येथें या सूक्ताचा उपसंहार झाला. यांत ऋषि जो वर मागतो त्याजकडेस लक्ष्य देण्यासारिखें आहे. शूर आणि पराक्रमी पुत्र आणि गुरें ढोरें हीं मागितलीं आहेत, आणि पुढें अन्न, बळ आणि धन मिळवून देणारा पुत्र हीं मागतो. यावरून प्राचीन काळच्या आर्य लोकांत आणि सांप्रतच्या त्यांच्या वंशजांत किती फेरफार झाला आहे तो उघड दृष्टीस पडतो.

## सूक्तम् १९१.

अगस्त्य ऋषिः। अप्तृणसूर्यास्त्रयो देवताः। अनुष्टुप् छन्दः। दशम्येकादशीद्वादश्यो महापङ्क्तयः। त्रयोदशी महाबृहती ॥

अष्टकौ सप्तकः षट्को दशको नवकश्चेति महापङ्क्तिलक्षणम्। चत्वारोष्टका जागतश्चेति महाबृहत्या लक्षणम् ॥

कङ्कतः षोडशोपनिषदानुष्टुभमप्तृणसौर्यं विषशङ्कावान् अगस्त्यः प्राब्रवीत्। दशम्याद्याश्च तिस्रो महापङ्क्त्यो महाबृहती चेति। उपनिषदिति रहस्यमित्यर्थः। विषशङ्कायुक्तोगस्त्यस्तत्परिहारायेदमुक्तवान्। ......... अत्र कङ्कतो नेति सूक्तं तु विषार्तः प्रयतो जपेत्। विषं न क्रमते चास्य सर्पादृष्टिविषादपि। यत्कीटलूतासु विषं दंष्ट्रिवृश्चिकतश्च यत्। मूलं च कृत्रिमं चैव जपन् सर्वमपोहति। ऋग्वि. १. २७

इति। इति सायणः ॥

**कङ्कतो न कङ्कतोऽथो सतीनकङ्कतः।**
**द्वाविति प्लुषी इति न्य१दृष्टा अलिप्सत ॥ १ ॥**

कङ्कतः। न। कङ्कतः। अथो इति। सतीनऽकङ्कतः।
द्वौ। इति। प्लुषी इति। इति। नि। अदृष्टाः। अलिप्सत ॥ १ ॥

---

### भाषायाम्.

१. कङ्कतः (=अल्पविषः कश्चित् प्राणी) न कङ्कतः (=तद्विपरीतः =अनल्पविषो महोरगादिः) अथो (=तथा च) सतीनकङ्कतः (=उदकचारी अल्पविषवान् कश्चिद्दुण्डुभादिः) द्वाविति प्लुषी इति (=एवं दाहकौ विषकारिद्विप्रकारौ) [तथैव] अदृष्टाः (=अदृश्यमानरूपा एतत्संज्ञकाश्च केचित्) नि अलिप्सत (=विशेषेण लिम्पन्ति =सर्वाण्यङ्गानि विषमावृणोति) ॥

## सूक्त १९१.

ऋषि— **अगस्त्य.** देवता—**अप्तृणसूर्य.** म्हणजे उदकें, तृणें आणि सूर्य. वृत्त—**त्रिष्टुभ्,** पण १०,११,१२ ह्या तीन ऋचा **महापङ्क्ती;** १३वी **महाबृहती.** असें संप्रदायास अनुसरून सायण ह्मणतात. परंतु १०,११,१२,१३ ह्या खेरीज करून बाकी सर्व **अनुष्टुभ्** होत.

## HYMN 191.

To *Aptṛiṇasûryâs* (i. e. the *Waters*, the *Plants* and the *sun* viewed in reference to snake and other poisons). By *Agastya*. Metre—*Anushṭubh*, except in 10, 11 and 12 where it is *Mahâpankti*, and in 13 where it is *Mahâbṛihatî*. This is a hymn against poison, or poisonous insects.

१. कंकत, अकंकत आणि जलकंकत, असे दोन प्रकारचे जाळणारे विषार आणि अदृष्ट विषार यांनीं [मला] जाळून टाकिलें आहे.

1. The *kankata*, the non-*kankata*, the water-*kankata*—the two kinds of burning insects—and the unseen poisonous insects are burning me.

---

१. हें सूक्त फार चमत्कारिक आहे. कथा अशी आहे कीं, अगस्त्य ऋषीला आपणास विषाराचा दंश झाला आहे असें वाटलें त्या वेळीं त्याणें हें सूक्त रचिलें. आतां वस्तुतः हें सूक्त विषारी जे सर्पादिक प्राणी त्यांविरुद्ध अथवा त्यांतून कोणी एकानें केलेल्या दंशावर म्हटलें आहे. आणि जसे सर्पदंशावर गारुड्यांनीं अथवा भगतांनीं घालावयाचे मंत्र विसंगत आणि गूढार्थक असतात त्याप्रमाणें हें सूक्त आहे.

'कंकत' म्हणजे किंचित् विषकारी एक जंतु, कदाचित् विंचू असेल. 'अकंकत' म्हणजे ज्याचें विष अल्प नव्हे, तर पुष्कळ आहे असा महासर्पादिक प्राणी. असें सायण म्हणतात.

'अदृष्ट विषार'=' अदृष्टाः.' म्हणजे जे दिसत नाहींत असे विषारी जंतु. त्यांस 'अदृष्ट' हेंच नांव आहे असें सायण म्हणतात. पुढील कितीएक मंत्रांतहि 'अदृष्ट' हें नांव आलें आहे.

शौनक म्हणून जे ऋग्विधानग्रंथाचे कर्ते ते म्हणतात कीं, ज्याला विषबाधा झाली आहे त्याणें मन लावून हें सूक्त जपावें, म्हणजे सर्पाचें अथवा दृष्टीचें, किंवा किड्यांचें किंवा कोळ्याचें, दाढा असलेल्या प्राण्याचें अथवा विंचवाचें जें विष, मग तें मूळचें असो किंवा केलेलें

अदृष्टान्हन्त्यायत्यथो हन्ति परायती ।
अथो अवघ्नती हन्त्यथो पिनष्टि पिंषती ॥ २ ॥
अदृष्टान् । हन्ति । आऽयती । अथो इति । हन्ति । पराऽयती ।
अथो इति । अवऽघ्नती । हन्ति । अथो इति । पिनष्टि । पिंषती ॥२॥
शरासः कुशरासो दर्भासः सैर्या उत ।
मौञ्जा अदृष्टा वैरिणाः सर्वे साकं न्यलिप्सत ॥ ३ ॥
शरासः । कुशरासः । दर्भासः । सैर्याः । उत ।
मौञ्जाः । अदृष्टाः । वैरिणाः । सर्वे । साकम् । नि । अलिप्सत ॥३॥

---

## भाषायाम्.

२. आयती (=आगच्छन्ती) [ओषधिर्] अदृष्टान् (=एतन्नामकान् विषधरान् प्राणिनो) हन्ति (=हिनस्ति)। अथो (=अपि च) परायती (=परागच्छन्ती) [ओषधिस्] [तान्] हन्ति (=हिनस्ति)। अथो (=अपि च) अवघ्नती (=निघातेन घ्नती) [ओषधिर्] हन्ति। अथो पिंषती (=पेषणकर्त्री) [ओषधिस्] [तान्] पिनष्टि (=चूर्णीकरोति) ॥

अनेन विषघ्न्योषधिः स्तूयत इति सायणः ॥

३. शरासः (=शराः वेणुदण्डसदृशा अन्तश्छिद्रास्तृणविशेषाः) कुशरासः (=कुत्सितशरा अन्तश्छिद्राः शरसदृशास्तृणविशेषा) दर्भासः (=दर्भाः =कुशाः) सैर्याः (=तटाकादिप्रान्तोद्भवास्तृणविशेषा अश्ववाला इति प्रसिद्धा) मौञ्जाः (=मुञ्जा इति प्रसिद्धा) वैरिणाः (=वीरणप्रकाराः) [एतेषु वर्तमाना] अदृष्टाः (=पूर्वोक्तरूपा विषधराः) सर्वे साकं (=मिलित्वा युगपदेव) नि अलिप्सत (=निलिम्पन्ति स्म=सर्वाण्यङ्गानि विषेणावृण्वन्ति स्म) ॥

इति सायणाभिप्रायः ॥

---

असो, त्यापासून उपद्रव होणार नाहीं.

हें सूक्त अप्तृणसूर्य या तिघांविषयीं आहे असें अनुक्रमणिकेस अनुसरून वर सांगितलें आहे. 'अप्तृणसूर्य' म्हणजे उदक, गवत आणि सूर्य हे तिघे.

२. येणारी [ औषधी ] अदृष्ट [ विषारां]ला मारून टाकिते, आणि जाणारी [औषधी] मारून टाकिते. आणि आपटणारी [औषधी] मारून टाकिते आणि चुरडणारी [ औषधी ] चुरडते.

३. शर, कुशर, दर्भ आणि सैर्य, मुंज आणि बैरिण [यांतील] सर्व अदृष्ट विषारांनीं एकदम मला जाळून टाकिलें आहे.

2. The [drug] that comes kills the unseen [poisonous insects] and [the drug] that goes away kills. And [the drug] that strikes down kills, and the crushing [drug] crushes [them].

3. All the unseen poisonous things [in] the *s'aras,* in the *Kus'aras,* in the *darbhas* and *sairyas,* [in] the *maunjas* [and] the *bairinas* are burning [me] at the same time.

---

२. ज्या औषधींच्या योगानें विष उतरतें त्यांची स्तुति या ऋचेंत आहे. 'कितीएक औषधि ( म्ह. वनस्पति ) उगवतांना, कितीएक मावळतांनां, कितीएक खालीं विषावर अथवा विषारी प्राण्यावर आपटल्या असतां आणि कितीएक वनस्पतींनीं विषारी पदार्थ चुरडला असतां, विषाचा नाश करणाऱ्या आहेत.'

३. शर, कुशर, दर्भ, सैर्य, मुञ्ज, बैरिण इत्यादिकांमधील जे विषार ते मला एकदम जाळीत आहेत असें तात्पर्य.

'शर' म्हणजे वेळूसारिखें आंत पोकळ असलेलें एकप्रकारचें गवत. 'कुशर' म्हणजेहि त्यांतलाच एक प्रकार. 'दर्भ' प्रसिद्धच आहेत. 'सैर्य' म्हणजे तडागावर वगैरे होणारें अश्वबाल नांवाचें एक गवत. 'मुञ्ज' गवत प्रसिद्ध आहे, कारण त्याची दोरी करून उपनयनाच्या वेळीं कंबरेला बांधितों म्हणून उपनयनाला मौञ्जीबंधन अथवा मुंज असें नांव पडलें आहे. 'बैरिण' हेंहि एक तशाच प्रकारचें गवत आहे.

'शांतिसूक्त' म्हणून जें बाळंतिणीच्या आणि तिच्या मुलाच्या संरक्षणाकरितां दहा रात्री म्हणतात त्यांत या मंत्राचा पाठ म्हणतात.

आणि श्राद्धाच्या वेळींहि हा मंत्र म्हणत असतात.

नि गावो गोष्ठे असदन्नि मृगासो अविक्षत ।
नि केतवो जनानां न्यदृष्टा अलिप्सत ॥ ४ ॥

नि । गावः । गोऽस्थे । असदन् । नि । मृगासः । अविक्षत ।
नि । केतवः । जनानाम् । नि । अदृष्टाः । अलिप्सत ॥ ४ ॥

एत उ त्ये प्रत्यदृश्रन्प्रदोषं तस्करा इव ।
अदृष्टा विश्वदृष्टाः प्रतिबुद्धा अभूतन ॥ ५ ॥ १४ ॥

एते । ऊं इति । त्ये । प्रति । अदृश्रन् । प्रऽदोषम् । तस्कराःऽइव ।
अदृष्टाः । विश्वऽदृष्टाः । प्रतिऽबुद्धाः । अभूतन ॥ ५ ॥ १४

द्यौर्वः पिता पृथिवी माता सोमो भ्रातादितिः स्वसा ।
अदृष्टा विश्वदृष्टास्तिष्ठतेलयता सु कम् ॥ ६ ॥

द्यौः। वः । पिता । पृथिवी । माता । सोमः। भ्राता । अदितिः। स्वसा ।
अदृष्टाः । विश्वऽदृष्टाः । तिष्ठत । इलयत । सु । कम् ॥ ६ ॥

---

## भाषायाम्.

४. गावो गोष्ठे नि असदन् (=निषीदन्ति स्म) मृगासः (=मृगाः =श्वापदा) नि अविक्षत (=निविष्टाः =स्वस्वस्थानेषूपरताः)। जनानां केतवः (=प्रज्ञानानि= बुद्धयो) नि (=नीचान्यभवन्)। [एतस्मिन् समये] अदृष्टाः (=पूर्वोक्तप्रकारा विषधरा) नि अलिप्सत (=सर्वाण्यङ्गानि विषेणावृण्वन्ति स्म) ॥

५. त्ये (=ते प्रसिद्धा विषधरास्) तस्करा इव (=चौरा इव) प्रदोषं (=रात्रौ) एते उ प्रति अदृश्रन् (=एते खलु दृश्यन्ते) हे विश्वदृष्टाः (=सर्वं दृष्टं यैस्ते) अदृष्टाः (=एतन्नामकाः पूर्वोक्ता विषधराः), [यूयं] प्रतिबुद्धा अभूतन (=जागरूका भवत) ॥

६. द्यौः (=द्युदेवो) वः पिता (=युष्माकं पिता भवति)। पृथिवी [युष्माकं] माता। सोमः (=? द्युलोको) [युष्माकं] भ्राता [भवति]। अदितिः स्वसा [भवति]। हे विश्वदृष्टाः (=सर्वस्य द्रष्टारः) अदृष्टाः (=एतन्नामकाः पूर्वोक्ता विषधराः), तिष्ठत इलयत सु कं (=स्वस्वस्थानेषु तिष्ठत सुखं गच्छत च =मां प्रति मा गच्छत) ॥

४. गाई गोठ्यांत बसल्या आहेत, सावजें [ आपापल्या ठिकाणांत ] शिरून निजलीं आहेत. लोकांच्या बुद्धि पडून [स्तब्ध झाल्या आहेत ]. अदृष्ट [विषारांनीं] [ मला ] जाळून टाकिलें आहे.

५. हे ते रात्रीं चोर जसे तसे दृष्टीस पडत आहेत. हे सर्वांस पाहणारे अदृष्ट [विषार] हो, तुम्ही जागे राहा.

६. द्यू तुमचा पिता, पृथिवी तुमची माता, सोम भ्राता [आणि] अदिति [ तुमची ] बहीण होय. हे सर्वांला पाहणारे अदृष्ट [ विषार] हो, तुम्ही यथेच्छ राहा अथवा जा.

4. Down are the cows sitting in the cow-fold, down have the beasts entered [into their cairns]. Down [are] the intellects of people. And down are the unseen [poisonous things] burning [me].

5. Here are seen they like thieves at night. O all-seeing unseen [poisonous insects], be ye watchful!

6. Dyaus [is] your father, the Earth [your] mother. Soma [is your] brother, Aditi [your] sister. O unseen [poisonous insects] that see all, stay you [where you are], go you with ease.

---

४. 'जेव्हां गाई रात्रीं आपल्या गोठ्यांत शांत बसल्या आहेत, जेव्हां सर्व जनावरें आपआपल्या जागेंत पडून राहिलीं आहेत, आणि जेव्हां मनुष्यांचीं इंद्रियें गाढ निद्रेंत विलीन झालीं आहेत, तेव्हां पूर्वी सांगितलेले विषार जाळून टाकितात.'

५. आपल्यापुढें रात्रीच्या वेळीं विषार पाहतो आहे असें कल्पून ऋषि म्हणत आहे कीं, 'दिवसा लपून राहून रात्रीचे जसे चोर बाहेर पडतात तसे हे पहा विषार दृष्टीस पडत आहेत. हे विषार हो, तुम्ही चोरांसारिखे जागे राहतां.'

'विश्वदृष्ट' = 'विश्वदृष्टाः'. म्हणजे सर्वांला पाहणारे असे.

६. 'सायणांच्या म्हणण्याप्रमाणें या मंत्रापासून पुढें विषाची विचिकित्सा आहे. म्हणजे विष जाण्यासाठीं या मंत्रांचा उपयोग औषधाप्रमाणेंच करावयाचा. अदृष्ट जे विषार पृथिवी, अंतरिक्ष आणि द्युलोक यांमध्यें उत्पन्न झालेले असतील, ते आपआपल्या जागीं राहोत मजवर न येओत,' असा भावार्थ.

ये अंस्या ये अङ्ग्याः सूचीका ये प्रकङ्कताः ।
अदृष्टाः किं चनेह वः सर्वे साकं नि जस्यत ॥ ७ ॥

ये । अंस्याः । ये । अङ्ग्याः । सूचीकाः । ये । प्रऽकङ्कताः ।
अदृष्टाः । किम् । चन । इह । वः । सर्वे । साकम् । नि । जस्यत ॥७॥

उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ।
अदृष्टान्त्सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥ ८ ॥

उत् । पुरस्तात् । सूर्यः । एति । विश्वऽदृष्टः । अदृष्टऽहा ।
अदृष्टान् । सर्वान् । जम्भयन् । सर्वाः । च । यातुऽधान्यः ॥ ८ ॥

उदपप्तदसौ सूर्यः पुरु विश्वानि जूर्वन् ।
आदित्यः पर्वतेभ्यो विश्वदृष्टो अदृष्टहा ॥ ९ ॥

उत् । अपप्तत् । असौ । सूर्यः । पुरु । विश्वानि । जूर्वन् ।
आदित्यः । पर्वतेभ्यः । विश्वऽदृष्टः । अदृष्टऽहा ॥ ९ ॥

---

अतः परं विषविचिकित्सा । तत्र तावत् हे सर्पा वो युष्माकं द्यौः पिता । * * * सोमशब्देन सोमाधारो द्युलोक उच्यते । पृथिव्यन्तरिक्षद्युस्थानस्थाः सर्पाः स्वस्वस्थानं प्राप्नुत । अस्मद्बाधं मा कुरुतेत्यर्थः । इति सायणः ॥

---

## भाषायाम्.

७. हे अदृष्टाः (=पूर्वोक्ता विषधराः), ये अंस्याः (=युष्माकं मध्ये ये अंसाभ्यां गच्छन्तो) ये अङ्ग्याः (=अङ्गैर्गच्छन्तो) [ये] सूचीकाः (=सूचीसदृशपुच्छरोमाणो वृश्चिकाद्याः) ये [च] प्रकङ्कताः (=प्रकृष्टविषा महोरगाः) किं चन इह वः (=यत्किंचिच्च युष्माकं सर्पजातमस्ति तद्रूपा) हे अदृष्टाः (=पूर्वोक्ता एतन्नामका विषधराः), सर्वे [यूयं] साकं नि जस्यत (=युगपदेव मुञ्चतास्मान्) ॥

८. विश्वदृष्टः (=विश्वस्य द्रष्टा) अदृष्टहा (=अदृष्टानामेतन्नामकानां विषधराणां हन्ता) सूर्यः सर्वानदृष्टान् (=सर्वानपि विषधरान्) सर्वाश्च यातुधान्यः (=सकलाश्च यातुधानीः =राक्षसीर्) जम्भयन् (=हिंसयन्) पुरस्तात् उदेति (=पूर्वस्यां दिशि प्रादुर्भवति) ॥

९. असौ (=पुरो दृश्यमान) आदित्यः (=अदितेः पुत्रो) विश्वदृष्टः (=विश्वं

७. जे भुजांनीं चालणारे, जे अंगानें चालणारे, जे नांगी मारणारे, जे प्रकंकत आणि जे दुसरे कोणत्याहि प्रकारचे असतील असे अदृष्ट [विषार] हो, तुम्ही सर्व एकदम नाहींसे व्हा.

7. Those of you that move with their shoulders, those that move with their trunks, those that sting, those that are called Prakankatas, and whatever other kinds of you, o unseen [ poisonous insects ], vanish all ye at once !

८. सर्व अदृष्टविषारांला आणि सर्व राक्षसींला नाहींतशा करीत करीत अदृष्ट विषारांचा हंता विश्वदर्शी सूर्य पूर्वेकडे उगवत आहे.

8. The all-seeing sun, destroyer of the unseen [ poisonous insects ] is rising in the east, driving away all the unseen [poisonous insects ] and all the demonesses.

९. हा अदितीचा पुत्र सूर्य, विश्वदर्शी आणि अदृष्टविषारांचा हंता असा होत्साता सकल विषांचा फार नाश करीत करीत पर्वतांपासून वर उडून जात आहे.

9. This sun, the son of Aditi, who sees all, who kills the unseen [poisonous insects ], is flying up from the mountains, altogether destroying all [ poisons ].

---

७. 'हातांनीं चालणारे पालीसारिखे, अंगांनीं चालणारे सर्पासारिखे, नांगी मारणारे विंचवांसारिखे आणि त्यांहून अधिक विष असणारे दुसरे विषार जे जे असतील ते सर्व एकदम नाहींसे होओत ' असा भावार्थ.

८. विषारांस या मंत्रांत धास्ती घातली आहे, कीं ते जर एकदम पळून न जातील तर त्यांस नाहींसा करणारा सूर्य लवकरच पूर्व दिशेला उगवेल.

९. सर्व विषारांचा नाश करणारा जो सूर्य तो पूर्वेकडे उदयाचलावर उगवून तेथून अंतरिक्षांत पक्ष्याप्रमाणें वर उडत आहे.

सूर्ये विषमा सजामि दृतिं सुरावतो गृहे।
सो चिन्नु न मराति नो वयं मरामारे अस्य योजनं हरिष्ठा मधु त्वा मधुला चकार ॥ १० ॥ १५ ॥

सूर्ये । विषम् । आ । सजामि । दृतिम् । सुराऽवतः । गृहे ।
सः । चित् । नु । न । मराति । नो इति । वयम् । मराम । आरे ।
अस्य । योजनम् । हरिऽस्थाः । मधु । त्वा । मधुला । चकार ॥ १० ॥ १९

---

दृष्टं येन सः ) अदृष्टहा ( =अदृष्टानां पूर्वोक्तानां विषधराणां हन्ता ) सूर्यो विश्वानि पुरु जूर्वन् ( =सर्वाणि विषाणि अत्यन्तं हिंसयन् ) पर्वतेभ्यः उत् अपप्तत् ( =पूर्वाचलस्य सकाशात् उत्पतत्यन्तरिक्षे ) ॥

---

## भाषायाम्.

१०. दृतिं सुरावतो गृहे [ इव ] ( =सुराकोशं यथा सुराकर्तुर्गृहे तथा ) विषं सूर्ये आ सजामि ( =आसक्तं करोमि ) । सो चिन्नु न मराति ( =स सूर्यः खलु न म्रियते ) नो वयं मराम ( =वयमपि न म्रियामहै ) । हरिष्ठाः ( =हर्यश्वेषु स्थितः सः) अस्य [ ? विषस्य ] योजनं ( =प्रापणम् ) आरे ( =दूरे ) [ चकार ] । [ हे विष ], त्वा ( =त्वां ) मधुला ( =मधुलया =मधुरया =मधुविद्यया ) मधु चकार ( =निर्विषीचकार ) ॥

सायण एवं व्याचष्टे । आदित्यमण्डले चतुर्थेनाङ्गुलिना विषमादाय मधुकृत्य योजयित्वा निर्विषो भवेदिति यदेतद्विषविद्यायामुक्तं तदिदमत्रोच्यते । अहं विषावृतोऽगस्त्यः सूर्ये सर्वस्य प्रेरयितरि मधुविद्यारूपे सूर्यमण्डले विषमावृत्य वर्तमानं सूर्य आसजामि । आसक्तं करोमि । तत्र दृष्टान्तः । सुरावतो गृहे सुरानिर्मातृसदने दृतिमिव चर्ममयं सुरापात्रमिव । यथा तत्कर्तुर्न दोषाय भवति तद्वद्विषमादित्यस्य न बाधकमित्यर्थः । सो चित् । चित् पूजायाम् । उः प्रसिद्धौ । पूज्यः स सूर्यः खलु न मराति । न म्रियते । नो वयं मराम । तदनुग्रहात्तत्रैव विषस्य योजितत्वाद्वयमपि न म्रियामहै । उभयोरमरणे कारणमाह । हरिष्ठाः । हरयोऽश्वाः । तेषु स्थित आदित्य आरे दूरेऽस्य विषस्य योजनं प्रापणं चकार । तदेवोच्यते । हे विष त्वा त्वां मध्वमृतं चकार । विषस्य विषभावं दूरेऽपनोद्यामृतीचकारेति । एषैव मधुला मधुदात्री निर्विषीकर्त्री मधुविद्या । यदेतदादित्यस्य विषयोजनं तेन चामृतीकरणं यदस्ति एषा मधुविद्या । इति ॥

१०. कलालाच्या घरीं [ दारूची] पखाल ठेविल्याप्रमाणें मी विष सूर्याचे ठायीं लावून ठेवितों. तो तर मरत नाहीं, आम्हीहि मरणार नाहीं. पिवळ्या घोड्यांवर बसलेला [ सूर्य ] या [ विषा]ला दूर पोंहचविता झाला. [हे विषा], तो तुला मधुविद्येच्या योगानें मधुर करिता झाला.

10. I fasten the poison on the sun like a skin [full of liquor ] in the house of a distiller. He ( the sun ) shall not die. Nor shall we die. [The sun], mounted on the golden horses, has removed the [ poison ] afar off. He has made thee sweet, [ o poison], by the art of sweetening.

---

१०. हाहि विष काढण्याविषयींचाच मंत्र आहे. भावार्थः ' जशी पुष्कळ दारू कलालाच्या घरीं असली तरी ती त्याला छाकटा करीत नाहीं तसें कितीहि विष सूर्याला लाविलें तरी त्यापासून सूर्याचा नाश होणें नाहीं; यास्तव हें विष मी सूर्याला लावितों. आणि तो जसा मरणार नाहीं, तसे आम्हीहि येणेंकरून विषाच्या भीतीपासून मुक्त होऊं. त्याणें तें विष दूर नेलें आणि मधुविद्येच्या योगानें गोड केलें.'

' याला दूर पोंहचविता झाला '= 'आरे अस्य योजनम्.' हा अर्थ सायणानुसार केला आहे, पण त्याविषयीं संशय आहे.
त्वम् । अ॒र्य॒मा । सत्ऽप॑तिः । यस्य॑ । स॒म्ऽभुज॑म् । त्वम् । अंशः॑ । वि॒दथे॑ । दे॒व॒ । भा॒ज॒युः ॥ ४ ॥
त्वम॑ग्ने॒ त्वष्टा॑ विध॒ते सु॒वीर्यं॒ तव॒ ग्नावो॑ मित्रमहः स॒जात्य॑म् ।
त्वमा॑शु॒हेमा॑ ररिषे॒ स्वश्व्यं॒ त्वं न॒रां शर्धो॑ असि पु॒रू॒वसुः॑ ॥५॥१७
त्वम् । अ॒ग्ने॒ । त्वष्टा॑ । वि॒ध॒ते । सु॒ऽवीर्य॑म् । तव॑ । ग्नावः॑ । मि॒त्र॒ऽम॒हः॒ । स॒ऽजात्य॑म् ।
त्वम् । आ॒शु॒ऽहेमा॑ । र॒रि॒षे॒ । सु॒ऽअश्व्य॑म् । त्वम् । न॒राम् । शर्धः॑ । अ॒सि॒ । पु॒रु॒ऽवसुः॑ ॥ ५ ॥ १७ ॥

---

## भाषायाम्.

४. हे अग्ने, त्वं धृतव्रतः (=सर्वैरपि कृतशासनो) राजा वरुणो [भवसि]। त्वं दस्मः (=पराक्रमी) ईड्यः (=स्तुत्यश्च) मित्रः (=एतन्नामको देवो) भवसि। यस्य संभुजं (=?यस्य धनं सुभोग्यं भवति) [स] सत्पतिः (=सज्जनानां पालकः) अर्यमा त्वं [भवसि]। त्वं विदथे भाजयुः (=यज्ञे दानशीलः) अंशः (=एतन्नामको देवो) [भवसि] ॥

५. हे अग्ने, त्वं विधते सुवीर्यं (=परिचरते यजमानाय शोभनवीररूपसंततिं) [प्रयच्छन्] त्वष्टा [भवसि]। हे ग्नावः (=ग्नावन्=देवस्त्रीयुक्त) मित्रमहः (=अनुकूलदीप्तिमन्) [त्वष्ट्रा सह देवस्त्रीभिश्च सह] सजात्यं (=समानजातित्वं=बन्धुत्वं) तव [भवति]। त्वम् आशुहेमा (=आशु प्रेरयिता सन्) स्वश्व्यं (=शोभनाश्वरूपं धनं) ररिषे (=प्रयच्छसि)। त्वं पुरूवसु (=बहुधनः सन्) नरां शर्धः (=मनुष्याणां बलरूपः) असि ॥

ग्नावो याः स्तुतिवाचः सन्ति तास्तव स्वभूताः। हे मित्रमहः हितकारितेजः सजात्यमस्माकं बान्धवं भजस इत्यर्थः। इति सायणः ॥

४. हे अग्नी, तूं ज्याची आज्ञा [ लोक ] धारण करितात असा वरुण आहेस. तूं पराक्रमी [ आणि ] स्तुत्य मित्र आहेस. तूं सज्जनांचा प्रभु कीं ज्याचें धन सुभोग्य होय असा अर्यमा [आहेस]. हे प्रकाशमान [ अग्नी ], तूं यज्ञांत उदार अंश आहेस.

५. हे अग्नी, तूं उपासकाला वीर पुत्र देणारा त्वष्टा होस. हे पत्नीसहित आणि अनुकूलदीप्तिमान् [ अग्नी ], बंधुत्व हें तुझें [आहे]. तूं उत्तम घोड्यांनीं भरलेली संपत्ति सत्वर देत असतोस. अत्यंत धनवान् असा जो तूं तो मनुष्यांचें बळ आहेस.

4. Thou, o Agni, art king Varuna whose law is obeyed. Thou art Mitra victorious and praiseworthy. Thou art Aryamâ the lord of the good, whose gift is enjoyable. Thou, o bright one, art liberal Aṁs'a in the sacrifice.

5. Thou, o Agni, art Tvashṭâ giving brave progeny to the worshipper. Thine is relationship, o Agni of friendly splendor and accompanied by the wives! Thou the swift one givest wealth filled with good horses. Thou the affluent one art the strength of men.

---

या मंत्रांत ब्रह्मा म्हणजे कोण तें स्पष्ट समजण्यास मार्ग नाहीं. विष्णु म्हणजे कोण, तें सू. २२ मं. १६ आणि टीप पहा. विष्णूबरोबर ब्रह्मा हें नांव येथें आलें आहे त्यावरून ब्रह्मा, विष्णु, महेश्वर या त्रिमूर्तींपैकीं ब्रह्मा असेल असें प्रथमदृष्ट्या दिसतें. परंतु वैदिक काळीं या ब्रह्मदेवाविषयीं प्रख्याति नाहीं.

'लांब पावलांचा' = 'उरुगायः' सू. १५४ मं. १,३ इत्यादि पहा.

---

४. अग्नि म्हणजे वरुण, मित्र, अर्यमा आणि अंश हे जे देव तद्रूपच होय, असें या मंत्रांत सांगितलें आहे. अर्यमा याविषयीं सू. २६ मं. ४ पहा.

अंश हा एक आदित्य आहे. त्याविषयीं निर्देश मित्र, अर्यमा, भग, वरुण, दक्ष इत्यादिक दुसऱ्या आदित्यांबरोबर होत असतो. ऋ. २.२७.१ यांत 'शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः' असें म्हटलें आहे तें पहा. शिवाय ऋ. ५.४२.५ पहा.

५. 'पुत्रादिक संततीची उत्पत्ति करणारा जो त्वष्टा तोहि अग्नीची एक विभूतिच होय, कारण त्याचें आणि अग्नीचें मोठें बंधुत्व आहे.' इत्यादि या मंत्राचें तात्पर्य दिसतें. पहिला, तिसरा

त्वम॑ग्ने रु॒द्रो असु॑रो म॒हो दि॒वस्त्वं शर्धो॒ मारु॑तं पृ॒क्ष ई॑शिषे ।
त्वं वातै॑ररु॒णैर्या॑सि शंग॒यस्त्वं पू॒षा वि॑ध॒तः पा॑सि॒ नु त्मना॑ ॥ ६ ॥
त्वम् । अ॒ग्ने॒ । रु॒द्रः । असु॑रः । म॒हः । दि॒वः । त्वम् । शर्धः॑ । मारु॑तम् ।
पृ॒क्षः । ई॒शि॒षे॒ ।
त्वम् । वातैः॑ । अ॒रु॒णैः । या॒सि॒ । श॒म्ऽग॒यः । त्वम् । पू॒षा । वि॒ध॒तः ।
पा॒सि॒ । नु । त्मना॑ ॥ ६ ॥
त्वम॑ग्ने द्रवि॒णोदा अ॑रं॒कृते॒ त्वं दे॒वः स॑वि॒ता र॑त्न॒धा अ॑सि ।
त्वं भगो॑ नृपते॒ वस्वं॒ ई॑शिषे॒ त्वं पा॒युर्दमे॒ यस्तेऽवि॑धत् ॥ ७ ॥
त्वम् । अ॒ग्ने॒ । द्र॒वि॒णः॒ऽदाः । अ॒र॒म्ऽकृते॑ । त्वम् । दे॒वः । स॒वि॒ता । र॒-
त्न॒ऽधाः । अ॒सि॒ ।
त्वम् । भगः॑ । नृ॒ऽप॒ते॒ । वस्वः॑ । ई॒शि॒षे॒ । त्वम् । पा॒युः । दमे॑ । यः ।
ते॒ । अवि॑धत् ॥ ७ ॥

---

## भाषायाम्.

६. हे अग्ने, त्वं महो दिवः असुरः (=महतो द्युलोकस्य बलवान्देवो) रुद्रो [नाम] [भवसि] । त्वं मारुतं शर्धः (=मारुतो गणो) [भवसि] । [अपि च] पृक्षः ई-शिषे (=अन्नस्य प्रभुरसि) । त्वं शंगयः (=सुखस्य निवासभूतः सन्) अरुणै-र्वातैः (=?"वायुसदृशैररुणैररुणवर्णैरश्वैः) यासि (=प्राप्नोषि यागगृहम्") । त्वं पूषा [नाम देवः सन्] विधतः (=परिचरणवत उपासकान्) त्मना नु पासि (=स्व-यमेव क्षिप्रं रक्षसि) ॥

७. हे अग्ने, त्वम् अलंकृते (=त्वाम् अलंकुर्वते सेवमानाय यजमानाय) द्रविणोदाः (=धनस्य दाता) [भवसि] । त्वं देवः (=दीप्तिमान्) रत्नधाः (=रमणीयानां ध-नानां मणिमुक्तादीनां धारयिता दाता) सविता [नाम देवः] असि । हे नृपते (=न-राणां प्रभो), त्वं भगो [नाम देवः सन्] वस्वः ईशिषे (=धनस्य राजा भवसि) । यो [यजमानो] दमे (=स्वगृहे) ते अविधत् (=त्वां पर्यचरत्) [तस्य] त्वं पायुः (=पालको) [भवसि] ।

६. हे अग्नी, तूं महाद्युलोकाचा बळवान् देव जो रुद्र तो आहेस. तूं मरुद्गण [आहेस]. तूं अन्नाचा प्रभु आहेस. तूं सुखाचें गृह होत्साता आरक्त वर्णाच्या वातांनीं गमन करितोस. तूं पूषा [ होत्साता ] उपासकांला स्वतः रक्षितोस.

७. हे अग्नी, तूं पूजा करणाराला धनदाता आहेस. तूं देदीप्यमान [आणि] उत्तम संपत्ति देणारा सविता होस. हे नृपती [ अग्नी ], तूं भग [ होत्साता ] धनाचा प्रभु आहेस. तूं, जो तुला [ आपल्या ] घरीं भजतो त्याचा रक्षक आहेस.

6. Thou, o Agni art Rudra the god of the vast heaven. Thou art the troop of Maruts. Thou art the lord of food. Thou the source of happiness goest with ruddy winds. Thou [ being ] Pûshâ dost thyself protect the worshippers.

7. Thou, o Agni, art the giver of wealth to the worshipper. Thou art brilliant Savitâ the giver of excellent wealth. Thou, o king of men, art Bhaga and the master of wealth. Thou art the protector [of him ] who worships thee in [ his ] house.

---

आणि चौथा हे चरण स्पष्टार्थ आहेत, परंतु दुसऱ्यांत ‘ ग्रावः ’ या शब्दाचा अर्थ किंवा उद्देश येथें बरोबर समजत नसल्यामुळें तेवढा पाद दुर्बोध आहे. ‘ ग्रावः ’ हें ‘ ग्रावत् ’ शब्दाचें संबोधनीं एकवचन घेतलें तर अग्नीला येथें तसें विशेषण देण्याचें प्रयोजन समजत नाहीं, आणि ‘ग्रावः’ हें रूप सर्वानुदात्त असावें तसें नाहीं. ‘ ग्रावः’ म्हणजे ‘ स्तुतिवचनें ’ असा सायणाप्रमाणें अर्थ केला तर त्याला या स्थळच्या सायणोक्तीशिवाय दुसरें कांहीं प्रमाण दिसत नाहीं.

---

६. ‘ यांत रुद्र आणि मरुद्गण आणि पूषा हे जे देव, ते केवळ अग्नीच्या विभूति होत ’ असा अभिप्राय आहे.

‘ रुद्र ’ आणि पूषा हे कोण होत त्याविषयीं सू. ४३ मं. १ पहा.

‘ आरक्त वर्णाच्या वातांनीं’= ‘अरुणैर्वातैः.’ याचा अर्थ सायणाचार्य, वायूप्रमाणें चपळ असे जे आरक्त वर्णाचे घोडे त्यांच्या योगानें असा करितात.

७. ‘द्रविणोदा’ म्हणजे धन देणारा एक देव. तो आणि सविता आणि भग हे जे देव ते अग्निरूपच होत असा भावार्थ.

*a* 2

**त्वामग्ने दम आ विश्पतिं विशस्त्वां राजानं सुविदत्रमृञ्जते ।**
**त्वं विश्वानि स्वनीक पत्यसे त्वं सहस्राणि शता दश प्रति ॥८॥**

त्वाम् । अग्ने । दमे । आ । विश्पतिम् । विशः । त्वाम् । राजानम् । सुऽविदत्रम् । ऋञ्जते ।

त्वम् । विश्वानि । सुऽअनीक । पत्यसे । त्वम् । सहस्राणि । शता । दश । प्रति ॥ ८ ॥

**त्वामग्ने पितरमिष्टिभिर्नरस्त्वां भ्रात्राय शम्या तनूरुचम् ।**
**त्वं पुत्रो भवसि यस्तेऽविधत्त्वं सखा सुशेवः पास्याधृषः ॥ ९ ॥**

त्वाम् । अग्ने । पितरम् । इष्टिऽभिः । नरः । त्वाम् । भ्रात्राय । शम्या । तनूऽरुचम् ।

त्वम् । पुत्रः । भवसि । यः । ते । अविधत् । त्वम् । सखा । सुऽशेवः । पासि । आऽधृषः ॥ ९ ॥

---

## भाषायाम्.

८. हे अग्ने, विश्पतिं (=जनानां पालकं) त्वां विशः (=जना) दमे आ (=स्वस्वगृहेषु) [ ऋञ्जते ] । सुविदत्रं (=सुधनं=शोभनदातारं) राजानं त्वाम् ऋञ्जते (=प्रसाधयन्ति=सेवया स्ववशमानयन्ति) । हे स्वनीक (=सुतेजस्क), त्वं विश्वानि [ वस्तूनि] पत्यसे (=तेषाम् ईश्वरो भवसि)—त्वं सहस्राणि शता दश प्रति [पत्यसे] (=अनेकसहस्राणाम् अनेकशतानाम् अनेकदशसंख्याकानां वस्तूनाम् ईश्वरो भवसि) ॥

९. हे अग्ने, पितरं (=पितृवत्पालकं) त्वां नरः इष्टिभिः (=यागैः) [ ऋञ्जते =प्रसाधयन्ति ] तनूरुचं (=शरीरेण शोभमानं) त्वां भ्रात्राय (=भ्रातृत्वाय=तव भ्रातृत्वसंपादनाय) शम्या (=यज्ञादिरूपेण कर्मणा) [ ऋञ्जते=प्रसाधयन्ति=स्ववशमानयन्ति ] । यस्ते अविधत् (=यस्त्वां पर्यचरत्) त्वं [ तस्य ] पुत्रो भवसि । त्वं सुशेवः सखा (=सुखकारी सखा सन्) [परिचरन्तम्] आधृषः पासि (=शत्रोः सकाशाद्रक्षसि) ॥

---

'धन देणारा=' 'द्रविणोदाः.' सू. १५ मं. १० पहा.

भग सू. १४ मं. ३ यावरील टीप पहा.

८. हे अग्नी, लोकांचा प्रभु असा जो महा उदार राजा तूं, त्या तुला लोक–तुला लोक आपल्या घरीं भजून वश करितात. हे सुतेजस्क अग्नी, तूं सकल वस्तूंचा स्वामी आहेस–तूं हजारो, शेकडो आणि दशावधि वस्तूंचा [ स्वामी आहेस ].

९. हे अग्नी, तुज पित्याला लोक यागांनीं [ वश करितात], शरीरानें प्रकाशणाऱ्या तुला बंधुत्व [ संपादण्या]साठीं यज्ञकर्मानें [वश करितात ]. जो तुला भजतो त्याचा तूं पुत्र होतोस. तूं सुखदायक मित्र [ होत्साता ] शत्रूपासून संरक्षण करितोस.

8. Thee o Agni, the lord of men, the people [ propitiate] in their houses,—propitiate thee the bounteous king. Thou art the master of all things, o thou of excellent brightness, thou [ art the master of] thousands, of hundreds, of tens.

9. Thee the father, o Agni, men [ propitiate ] with sacrifices, thee they [ propitiate ] with worship for making thee a brother, thou who shinest with thy body. Thou becomest a son to him who has worshipped thee. Thou the beneficent friend preservest [ thy friend ] from his enemy.

---

८. 'अग्नीला लोक आपआपल्या घरीं भजून प्रसन्न करितात; आणि तो सकल वस्तूंचा स्वामी असल्यामुळें उदार राजाप्रमाणें सेवकांचे मनोरथ पूर्ण करितो' असें तात्पर्य.

९. 'अग्नि लोकांचा बाप, बंधु, पुत्र आणि मित्र होय' असा भावार्थ.

'यागांनीं'='इष्टिभिः'. या ठिकाणीं 'इष्टि' शब्दाचा अर्थ इच्छा, प्रार्थना असा होतो, कारण कीं यागवाचक शब्द असता तर इष्टिभिः हा स्वर झाला असता असें कितीएक पाश्चात्त्य विद्वान् म्हणतात. परंतु ऋग्वेद २. १८.१ यांतहि 'इष्टिभिः' याचा अर्थ सायणांनीं यागांनीं असा केलाच आहे. शिवाय ऋ.७.९३.८ आणि त्याजवरील सायणभाष्य पहा.

**त्वम॑ग्न ऋ॒भुरा॒के न॑म॒स्य॑१स्त्वं वाज॑स्य क्षु॒मतो॑ रा॒य ई॑शिषे ।**
**त्वं वि भा॒स्यनु॑ दक्षि दा॒वने॒ त्वं वि॒शिक्षु॑रसि य॒ज्ञमा॒तनिः॑ ॥ १० ॥ १८**

त्वम् । अ॒ग्ने॒ । ऋ॒भुः । आ॒के । न॒म॒स्यः॑ । त्वम् । वाज॑स्य । क्षु॒ऽमतः॑ ।
रा॒यः । ई॒शि॒षे ।
त्वम् । वि । भा॒सि॒ । अनु॑ । ध॒क्षि॒ । दा॒वने॑ । त्वम् । वि॒ऽशिक्षुः॑ । अ॒सि॒ ।
य॒ज्ञम् । आ॒ऽतनिः॑ ॥ १० ॥ १८ ॥

**त्वम॑ग्ने॒ अदि॑ति॒र्दे॑व दा॒शुषे॒ त्वं होत्रा॒ भार॑ती वर्धसे गि॒रा ।**
**त्वमिळा॑ श॒तहि॑मासि॒ दक्ष॑से॒ त्वं वृ॑त्र॒हा व॑सुपते॒ सर॑स्वती ॥ ११ ॥**

त्वम् । अ॒ग्ने॒ । अदि॑तिः । दे॒व॒ । दा॒शुषे॑ । त्वम् । होत्रा॑ । भार॑ती । व॒-
र्ध॒से॒ । गि॒रा ।
त्वम् । इळा॑ । श॒तऽहि॑मा । अ॒सि॒ । दक्ष॑से । त्वम् । वृ॒त्र॒ऽहा । व॒सु॒-
ऽप॒ते॒ । सर॑स्वती ॥ ११ ॥

---

## भाषायाम्.

१०. हे अग्ने, ऋभुः (=दीप्तः) त्वम् आके नमस्यः (=समीपे नमस्कार्यः=प्रत्यक्षम् उपास्यो भवसि) । त्वं वाजस्य (=बलस्य) [ तथा ] क्षुमतो रायः (=अन्नवतो धनस्य) ईशिषे (=स्वामी भवसि) । त्वं दावने (=हविर्दत्तवते यजमानाय=तद्धितार्थं) वि भासि (=विशेषेण दीप्यसे) अनु धक्षि (=अनुकूलं यथा तथा काष्ठादिकं दहसि च) । त्वं विशिक्षुः (=विशेषेण दानशीलः) असि [ तथा ] यज्ञम् आतनिः (=यज्ञस्य विस्तारयिता=पूरयिता) [ भवसि ] ॥

११. हे देव (=द्योतमान) अग्ने, त्वं दाशुषे (=हविर्दत्तवते यजमानाय) अदितिः (=एतन्नाम्नी देवानां माता) [ भवसि ] । त्वं होत्रा भारती [ च ] [ भवसि ] [अपि च तथा भूत्वा ] गिरा वर्धसे (=स्तुत्या प्रवृद्धो भवसि) त्वं दक्षसे (=बलाय=बलदानाय) शतहिमा इळा (=शतसंवत्सरा=अपरिमितकाला) इळा [ नाम देवी ] असि । हे वसुपते (=धनस्य स्वामिन्), त्वं वृत्रहा (=वृत्रस्य हन्ता) [ तथा ] सरस्वती [ नाम देवी ] [ असि ] ॥

१०. हे अग्नी, तूं तेजस्वी [ असून ] प्रत्यक्ष पूजनीय [ आहेस ]. तूं बळाचा आणि अन्नानें भरलेल्या संपत्तीचा स्वामी आहेस. तूं हविर्दात्यासाठीं प्रकाशतोस [आणि] त्याचें कल्याण होई अशा रीतीनें पेटत असतोस. तूं उदार आहेस [आणि] यज्ञाची पूर्ति करणारा [ आहेस ].

10. Thou, o Agni, art brilliant, thou canst be present for being honoured. Thou art the master of strength and of wealth accompanied by food. Thou shinest and burnest for the benefit of the sacrificer. Thou art liberal, the perfector of the sacrificial rite.

११. हे देदीप्यमान अग्नी, तूं हविर्दात्याला अदिति [ आहेस ]. तूं होत्रा [ आणि ] भारती [ असून] स्तुतीच्या योगेंकरून उत्कर्ष पावतोस. तूं बळ [ प्राप्त करून देण्या]साठीं शतवर्षा इळा आहेस. हे धनाच्या प्रभू, तूं वृत्रघ्न [ आणि ] सरस्वती आहेस.

11. Thou, o resplendent Agni, Art Aditi to the sacrificer. Thou [as] Hotrâ [and] Bhâratî art honoured with praise. Thou art Iḷâ of a hundred years for [granting] strength. Thou, o lord of wealth, art the killer of Vṛitra, [thou art] Sarasvatî.

---

१०. 'इतर देवांची उपासना करणें झाल्यास ते प्रत्यक्ष दिसत नाहींत, पण अग्नि डोळ्यासमोर असून उपासना ग्रहण करितो; तो सर्व धनाचा आणि बळाचा धनी आहे. यास्तव तो उपासकाचें कल्याण करून त्याचा यज्ञ सफळ करितो' असें तात्पर्य.

११. अदिति. सू. ७२ मं. ९ आणि टीप पहा.

होत्रा, भारती, इळा आणि सरस्वती यांविषयीं सू. १४२ मं. ९ पहा. शिवाय सू. २२ मं. १०; सू. १४२ मं. ९; सू. १३ मं. ९; सू. ४० मं. ४; सू. ८९ मं. ३ आणि तेथील टिपा पहा.

'शतवर्षा '= 'शतहिमा.' म्हणजे शंभर वर्षांची. याचा अर्थ अपरिमित काळाची, अथवा अनादि, 'नित्य' असा आहे. अत्यंत प्राचीनकाळीं शंभर वर्षांचें वय म्हटलें म्हणजे फार मोठें असें समजत म्हणून 'शतहिमा' हें विशेषण येथें दिलें आहे. वेदाच्या वेळीं मनुष्याचें आयुष्य दहा हजार वर्षांपर्यंत असूं शकेल असें लोक कल्पूं लागले नव्हते.

**त्वम॑ग्ने सु॒भृ॑त उत्त॒मं वय॒स्तव॑ स्पा॒र्हे व॒र्ण आ सं॒दृशि॒ श्रियः॑ ।**
**त्वं वाजः॑ प्र॒तर॑णो बृ॒हन्न॑सि॒ त्वं र॒यिर्ब॑हु॒लो वि॒श्वत॑स्पृ॒थुः ॥ १२ ॥**

त्वम् । अ॒ग्ने । सु॒ऽभृ॑तः । उ॒त्ऽत॒मम् । वयः॑ । तव॑ । स्पा॒र्हे । वर्णे॑ । आ । स॒म्ऽदृशि॑ । श्रियः॑ ।
त्वम् । वाजः॑ । प्र॒ऽतर॑णः । बृ॒हन् । अ॒सि॒ । त्वम् । र॒यिः । ब॒हु॒लः । वि॒श्वतः॑ । पृ॒थुः ॥ १२ ॥

**त्वाम॑ग्न आदि॒त्यास॑ आ॒स्यं१॒॑ त्वां जि॒ह्वां शुच॑यश्चक्रिरे कवे ।**
**त्वां रा॑ति॒षाचो॑ अध्व॒रेषु॑ सश्चिरे॒ त्वे दे॒वा ह॒विर॑दन्त्याहु॑तम् ॥ १३ ॥**

त्वाम् । अ॒ग्ने॒ । आ॒दि॒त्यासः॑ । आ॒स्य॑म् । त्वाम् । जि॒ह्वाम् । शुच॑यः । च॒क्रि॒रे॒ । क॒वे॒ ।
त्वाम् । रा॒ति॒ऽसाचः॑ । अ॒ध्व॒रेषु॑ । स॒श्चि॒रे॒ । त्वे इति॑ । दे॒वाः । ह॒विः । अ॒द॒न्ति॒ । आ॒ऽहु॑तम् ॥ १३ ॥

---

## भाषायाम्.

१२. हे अग्ने, सुभृतः (=सुष्ठु पोषितस्) त्वम् उत्तमं वयः (=श्रेष्ठम् अन्नं) [भवसि]। स्पार्हे (=स्पृहणीये) संदृशि (=सम्यग्दर्शनीये) तव वर्णे आ (=कान्तौ) श्रियः (=सकलान्यैश्वर्याणि) [वर्तन्ते]। त्वं प्रतरणः (=प्रकर्षेण तारयिता) बृहन् (=महान्) वाजः (=अश्वः) असि। त्वं बहुलः (=महान्) विश्वतः पृथुः (=सर्वतो विस्तीर्णो) रयिः (=धनं) भवसि ॥

१३. हे अग्ने, आदित्यासः (=अदितेः पुत्रा इन्द्रादयो देवास्) त्वाम् आस्यं [चक्रिरे] (=भक्षणपानादये स्वकीयं मुखं कृतवन्तः)। हे कवे (=मेधाविन्नग्ने), शुचयः (=दीप्ता देवास्) त्वां जिह्वां चक्रिरे (=आस्वादनसाधनं कृतवन्तः)। रातिषाचः (=हविर्दानसेवकाः=हविर्दानं कामयमाना देवास्) त्वाम् अध्वरेषु सश्चिरे (=त्वां यज्ञेषु सेवन्ते=हविर्भक्षणाय यज्ञान्प्रति त्वया सह आगच्छन्ति)। त्वे (=त्वयि) आहुतं (=दत्तं) हविर्देवा अदन्ति (=भक्षयन्ति) ॥

१२. हे अग्नी, तूं सुपुष्ट होत्साता श्रेष्ठ अन्न [ आहेस ]. तुझ्या रमणीय [ आणि ] मनोरम रूपाच्या ठायीं [ सर्व ] ऐश्वर्यें [ आहेत ]. तूं उत्तम रक्षण करणारा महा अश्व आहेस. तूं मोठी आणि चोहींकडून विशाळ संपत्ति आहेस.

१३. हे अग्नी, अदितीचे जे पुत्र ते तुला [ आपलें ] तोंड करिते झाले. हे मेधावी अग्नी, देदीप्यमान [ देव ] तुला आपली जिव्हा करिते झाले. दानसेवक [ देव] तुजबरोबर यज्ञांत येतात. तुझ्या ठायीं अर्पण केलेलें हवि देव भक्षितात.

12. Thou, o Agni [being] well-nourished [art] the [giver of] excellent food. In thy excellent and delightful appearance are [all] beauties. Thou art a great charger, saving from danger. Thou art a great treasure extensive on all sides.

13. Thee, o Agni, the sons of Aditi have made their mouth. Thee, o sage, the bright gods have made their tongue. Thee the sacrifice-loving [ gods ] follow in the sacrifices. In thee the offering that is given the gods consume.

---

१२. 'अश्व '=' वाजः.' ऋ. ५. ८४.२ आणि ३.३०.११ आणि त्यांजवरील सायणभाष्य पहा.

१३. 'अग्नि देवांचें मुख होय, आणि जेथें जेथें अग्नि जातो तेथें तेथें त्याच्या तोंडानें हवि भक्षण करण्याकरितां देव जात असतात,' असें अग्नीचें स्वरूप पूर्वीं पुष्कळ ठिकाणीं वर्णिलेंच आहे.

त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्याहुतम् ।
त्वया मर्तासः स्वदन्त आसुतिं त्वं गर्भो वीरुधां जज्ञिषे शुचिः॥१४॥

त्वे इति । अग्ने । विश्वे । अमृतासः । अद्रुहः । आसा । देवाः । हविः । अदन्ति । आऽहुतम् ।

त्वया । मर्तासः । स्वदन्ते । आऽसुतिम् । त्वम् । गर्भः । वीरुधाम् । जज्ञिषे । शुचिः ॥ १४ ॥

त्वं तान्त्सं च प्रति चासि मज्मनाग्ने सुजात प्र च देव रिच्यसे ।
पृक्षो यदत्र महिना वि ते भुवदनु द्यावापृथिवी रोदसी उभे॥१५॥

त्वम् । तान् । सम् । च । प्रति । च । असि । मज्मना । अग्ने । सुऽजात । प्र । च । देव । रिच्यसे ।

पृक्षः । यत् । अत्र । महिना । वि । ते । भुवत् । अनु । द्यावापृथिवी इति । रोदसी इति । उभे इति ॥ १५ ॥

---

## भाषायाम्.

१४. हे अग्ने, त्वे आहुतं (=त्वयि दत्तं) हविः अमृतासः (=अमरणधर्माणः) अद्रुहः (=अद्रोग्धारो) विश्वे देवाः आसा अदन्ति (=अन्तिके प्रत्यक्षं भक्षयन्ति)। त्वया [साधनभूतेन] मर्तासः (=मरणधर्माणो मनुष्या) आसुतिं स्वदन्ते (=अन्नम् आस्वादयन्ति)। त्वं वीरुधां (=लतादीनां) शुचिर्गर्भः (=दीप्तः पुत्रो) जज्ञिषे (=जातोसि)॥

१५. त्वं मज्मना (=बलेन) तान् सं च [असि] प्रतिचासि (=संहतसर्वदेव-समश्चासि तेषां प्रत्येकेन सह समश्चासि)। [नैतावदेव अपि तु] हे सुजात देव (=सुष्ठुजात द्योतमान) अग्ने, प्र च रिच्यसे (=तेभ्योधिकोपि भवसि) यद् (=यस्मा-त्कारणात्) अत्र (=? "अस्मिन्यज्ञे") ते महिना (=तव महिम्ना) पृक्षः (=अ-न्नम्) अनु द्यावापृथिवी रोदसी उभे (=द्यावापृथिवीरूपावुभावपि लोकावनुलक्ष्य) वि भुवत् (=प्रादुर्भवति=व्याप्तं भवति)॥

१४. हे अग्नी, तुझ्याठायीं अर्पण केलेलें हवि अमर आणि द्वेष न करणारे असे जे सर्व देव ते प्रत्यक्ष भक्षण करितात. तुझ्या योगानें मर्त्य अन्नाचा स्वाद घेतात, तूं वनस्पतींचा देदीप्यमान बाळ उत्पन्न झाला आहेस.

१५. तूं आपल्या प्रभावाच्या योगेंकरून केव्हां त्या सर्वांची बरोबरी करितोस, आणि केव्हां त्यांतून प्रत्येकाची बरोबरी करितोस; हे सुजात, हे देदीप्यमान अग्नी, तूं त्या सर्वांहून अधिकहि आहेस. कारण कीं, तुझ्या महिम्याच्या योगेंकरून येथें अन्न द्युलोक आणि पृथिवी या उभय लोकांस व्यापून पसरत असतें.

14. In Thee, o Agni, the oblation that is offered all the immortal and unhating gods actually consume. Through thee the mortals relish their food. Thou art born the brilliant child of plants.

15. Thou art both equal to them all and through thy power equal to each of them; thou art also, o well-born resplendent Agni, even greater: in-as-much as through thy greatness the food here spreads along earth and heaven, along both the worlds.

---

१४. 'स्वाद घेतात.' म्हणजे मनुष्यें जें अन्न खातात तें अग्नीच्या योगानें शिजतें.

'वनस्पतींचा बाळ'='गर्भो वीरुधाम्.' म्हणजे 'दावानळरूपानें अरण्यामध्यें वृक्षांपासून अग्नि उत्पन्न होतो' असा अभिप्राय.

१५. भावार्थः 'हे अग्नी, तूं सर्व देवांची मिळून बरोबरी करितोस, आणि त्यांतून प्रत्येक देव घेतला तरी त्या प्रत्येकाशीं तूं बरोबर आहेस; आणि इतकेंच नव्हे पण त्या सर्वांपेक्षांहि तूं अधिक आहेस. कारण कीं, या यज्ञांत तुला अर्पण केलेलें अन्न द्युलोक आणि पृथिवी या उभयलोकांस व्यापून जिकडे तिकडे पसरत असतें आणि तेणेंकरून सर्व देवांस पोंहचतें, तें तुझ्याच पराक्रमानें पोंहचतें,' असा या कठिण मंत्राचा भावार्थ दिसतो.

ये स्तोतृभ्यो गोअंग्रामश्वंपेशसमग्ने रातिमुंपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वंदेम विदथें सुवीराः ॥
॥ १६ ॥ १९ ॥

ये । स्तोतृऽभ्यंः । गोऽअंग्राम् । अश्वंऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषिं । वस्यः । आ । बृहत् । वदेम । विदथें । सुऽवीराः ॥ १६ ॥ १९ ॥

## भाषायाम्.

१६. हे अग्ने, ये सूरयः (=यजमानाः) स्तोतृभ्यः (=अस्मादृग्भ्यो) गोअग्रां (=गावोऽग्रगामिन्यो यस्यास्तादृशीं=गोप्रमुखाम्) अश्वपेशसम् (=अश्वप्राधान्यां) रातिम् उपसृजन्ति (=दक्षिणां ददते) तांश्च [यजमानान्] अस्मांश्च [स्तोतॄन्] वस्य आ प्र हि नेषि (=श्रेष्ठं सुखं स्वर्गादिकं प्रति नय)। सुवीराः (=सुष्ठुवीर्योपेत-पुत्रपौत्रादिसमवेता) [वयं] विदथे (=यज्ञे) बृहत् [स्तोत्रं] वदेम (=यथा वदेम तथा कुरु) ॥

अस्माकं प्रेरयितॄन् यजमानान् तेषां च स्तोतॄन् अस्मान् श्रेष्ठं सुखं प्रापय शौर्योपेत-पुत्रपौत्रादिभिः सहिता महन्मन्त्रजातं यथा वदेम तथा तादृशान् पुत्रपौत्रादीन् अस्मभ्यम् उभयेभ्यो देहीत्यभिप्रायः ।

१६. हे अग्नी, जे यजमान स्तोत्यांला गाईनीं भरलेली आणि अश्वाढ्य दक्षिणा देतात, त्यांला आणि त्याप्रमाणें आम्हांलाहि तूं उत्तम कल्याणाप्रत ने. उत्तम वीर्यवान् पुत्रांस घेऊन आम्ही यज्ञांत मोठें स्तोत्र गाऊं असें कर.

16. Lead, o Agni, both those sacrificers, who give to the poets a gift conspicuous by cows and excellent horses, both these and us the poets, to the highest good; may we, accompanied by sons who are excellent heroes, chant a great hymn in the sacrifice.

---

१६. यांत वरप्रार्थना आहेः— 'स्तोत्रें रचून यज्ञ करण्याच्या कामीं आम्हांसारख्या ऋत्विक् जनांस लावून यज्ञसमाप्तीनंतर पुष्कळ गाई, घोडे इत्यादि दक्षिणा देणारे जे यजमान, त्यांस आणि त्याप्रमाणें स्तोते (म्हणजे ऋत्विक्) जे आम्ही त्या आम्हांसहि उत्तम सुखाप्रत ने आणि आम्हांला शूर पुत्रपौत्र दे, म्हणजे आम्ही त्यांस घेऊन यज्ञांत मोठमोठीं स्तोत्रें गाऊं.'

या ऋचेवरून असें उघड होतें कीं, वेदकाळींहि यजमानांनीं देव प्रसन्न करण्याच्या कामीं ऋत्विजांस लावावें आणि त्यांस पुष्कळ गाई, घोडे इत्यादि दक्षिणा द्यावी आणि तिजबद्दल ऋत्विजांनीं यजमानाचें देव जेणेंकरून कल्याण करितील अशी देवापाशीं प्रार्थना करावी अशी चाल असे.

## सूक्तम् २—१९३.

मण्डलद्रष्टा गृत्समद ऋषिः । अग्निर्देवता । जगती छन्दः ॥

**यज्ञेन॑ वर्धत जा॒तवे॑दसम॒ग्निं य॑जध्वं ह॒विषा॒ तना॑ गि॒रा ।**
**स॒मि॒धा॒नं सु॑प्र॒यसं॒ स्व॑र्णरं द्यु॒क्षं होता॑रं वृ॒जने॑षु धू॒र्षद॑म् ॥ १ ॥**

य॒ज्ञेन॑ । व॒र्ध॒त । जा॒तऽवे॑दसम् । अ॒ग्निम् । य॒ज॒ध्व॒म् । ह॒विषा॑ । तना॑ । गि॒रा ।
स॒म्ऽइ॒धा॒नम् । सु॒ऽप्र॒यस॑म् । स्वः॑ऽनरम् । द्यु॒क्षम् । होता॑रम् । वृ॒जने॑षु । धूः॒ऽसद॑म् ॥ १ ॥

**अ॒भि त्वा॒ नक्ती॑रु॒षसो॑ ववाशि॒रेऽग्ने॑ व॒त्सं न स्वस॑रेषु धे॒नवः॑ ।**
**दि॒व इ॒वेद॑र॒तिर्मानु॑षा यु॒गा क्षपो॑ भासि पुरुवार सं॒यतः॑ ॥ २ ॥**

अ॒भि । त्वा॒ । नक्तीः॑ । उ॒षसः॑ । व॒वा॒शि॒रे । अग्ने॑ । व॒त्सम् । न । स्वस॑रेषु । धे॒नवः॑ ।
दि॒वःऽइ॑व । इत् । अ॒र॒तिः । मानु॑षा । यु॒गा । आ । क्षपः॑ । भा॒सि॒ । पु॒रु॒ऽवा॒र॒ । स॒म्ऽयतः॑ ॥ २ ॥

---

## भाषायाम्.

१. [ हे यजमानाः ], जातवेदसं (=सर्वस्य वस्तुजातस्य वेदितारम्) अग्निं यज्ञेन वर्धत (=वर्धयत )। समिधानं (=सम्यग्दीप्तं ) सुप्रयसं ( =शोभनहविरन्नवन्तं ) स्वर्णरं (=दिव्यशूरं ) द्युक्षं होतारं (=स्वर्गनिवासिनं होमसंपादकं) वृजनेषु धूर्षदं (=बलेषु संग्रामेषु रथस्य धुरि निषण्णः कश्चित् शौर्येण रथं निर्वाहयति तद्वत् निर्वाहकम्) [अग्निं] हविषा तना गिरा (=हविर्दानेन अखण्डितया स्तुत्या च) यजध्वं (=पूजयत)॥

२. हे अग्ने, स्वसरेषु धेनवो वत्सं न (=गोष्ठेषु वत्सं प्रति गावो यथा शब्दायन्ते=शब्दायमाना धावन्ति तद्वत्) नक्तीरुषसः (=रात्र्यश्चोषसश्च=प्रातःकालाः सायंकालाश्च) ववाशिरे (=शब्दायन्ते=शब्दायमानाः सत्य आगच्छन्ति ) । हे पुरुवार ( =बहुभिर्वरणीय ), दिव इव इत् अरतिः (=द्युलोकस्य दूत इव ) [ त्वं ] मानुषा युगा (=सर्वेषु मानुषेषु युगेषु=सर्वेष्वपि जनेषु ) क्षपः (=रात्रीः=रात्रिकालेषु) संयत आ भासि (=नियतः प्रकाशसे=नित्यं दीप्यसे ) ॥

## सूक्त २—१९३.

ऋषि–गृत्समद. देवता–अग्नि. वृत्त–जगती.

१. सर्वज्ञ अग्नीला यज्ञानें वाढवा, हवीनें [ आणि ] अखंड वाणीनें पूजा: चांगला पेटलेला, उत्तमान्नवान्, दिव्य वीर, द्युलोकनिवासी होता, आणि संग्रामांत धुरंधर [ अशा अग्नीला पूजा ].

२. हे अग्नी, गाई गोठयांत वत्साप्रत [ हंबरडत येतात ] तशा रात्री आणि उषा तुजप्रत हंबरडत येतात. द्युलोकाचा दूतच जणुं असा जो तूं तो, हे बहुजनप्रिय [ अग्नी ], नित्य मानवलोकीं रात्रीं प्रकाशत असतोस.

## HYMN. 2—193.

To *Agni*. By *Gṛitsamada*. Metre, *Jagatî*.

1. Honour with sacrifice all-knowing Agni. Worship with oblation [ and ] unbroken hymn well-kindled Agni, who receives excellent food, the divine hero, the celestial invoker, Agni brave in battles.

2. Towards thee, o Agni, the Nights and the Dawns run fondly lowing even as cows [ run fondly lowing] to [their] calves in the cow-folds. Nothing less than a messenger of heaven thou, o beloved of many, daily shinest in the nights among human races.

---

१. ‘ उत्तमान्नवान् ’ = ‘ सुप्रयसम्.’ म्हणजे ज्याला उत्तम हविरन्न उपासक लोक अर्पण करितात असा.

२. ‘ गाई जशा आपल्या वत्साप्रत हंबरडा फोडीत गोठ्यांत येतात तशा उषा आणि रात्री ह्या अग्नीजवळ यज्ञमंडपांत येत असतात. कारण देदीप्यमान प्रकाशवंत द्युलोकाचा दूतच जणुं असा जो अग्नि तो मनुष्यलोकीं नित्य रात्रीं प्रकाशत असतो.’

उषःकाळीं आणि सायंकाळीं अग्नीला हवि देत, म्हणून उषा आणि रात्र ह्या येतांच अग्नीला खावयास मिळावयाचें; तेणेंकरून गाई आल्या म्हणजे वत्साला जसा हर्ष होतो तसा उषा आणि रात्र ह्या आल्या म्हणजे अग्नीला हर्ष होतो. आणि तसा हर्ष व्हावा म्हणून त्या अग्नीजवळ हंबरडा जणुं फोडीत येत असतात, असें तात्पर्य.

‘ हंबरडत येत असतात ’=‘ ववाशिरे.’ ऋ.९.९४.२ आणि सायणभाष्य पहा.

**तं देवा बुध्ने रजसः सुदंससं दिवस्पृथिव्योररतिं न्यैरिरे ।**
**रथमिव वेद्यं शुक्रशोचिषमग्निं मित्रं न क्षितिषु प्रशंस्यम् ॥ ३ ॥**

तम् । देवाः । बुध्ने । रजसः । सुऽदंससम् । दिवःपृथिव्योः । अरतिम् । नि । एरिरे ।
रथम्ऽइव । वेद्यम् । शुक्रऽशोचिषम् । अग्निम् । मित्रम् । न । क्षितिषु । प्रऽशंस्यम् ॥ ३ ॥

**तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः ।**
**पृश्न्याः पतरं चितयन्तमक्षभिः पाथो न पायुं जनसी उभे अनु॥४॥**

तम् । उक्षमाणम् । रजसि । स्वे । आ । दमे । चन्द्रम्ऽइव । सुऽरुचम् । ह्वारे । आ । दधुः ।
पृश्न्याः । पतरम् । चितयन्तम् । अक्षऽभिः । पाथः । न । पायुम् । जनसी इति । उभे इति । अनु ॥ ४ ॥

---

## भाषायाम्.

३. तं (=पूर्वोक्तं) सुदंससं (=शोभनकर्माणं=पराक्रमवन्तम्) [अग्निं] देवा रजसो बुध्ने दिवः पृथिव्योररतिं नि एरिरे (=अस्मिन् भूतले द्यावापृथिव्योर्दूतं कृत्वा नियोजितवन्तः=प्रेषितवन्तः) । वेद्यं रथमिव (=प्रख्यातं रथमिव) शुक्रशोचिषं (=दीप्ततेजस्कम्) [अथवा] मित्रं न (=मित्रवत्) प्रशंस्यं (=प्रकर्षेण स्तुत्यम्) अग्निं क्षितिषु (=मनुष्येषु) [नि एरिरे=प्रेरितवन्तः] ॥

४. तं (=पूर्वोक्तं) रजसि उक्षमाणम् (=अन्तरिक्षे वर्धमानं) सुरुचं (=शोभनदीप्तिमन्तम्) [अग्निं] ह्वारे चन्द्रम् इव (=निर्जने स्थले सुवर्णमिव) स्वे आ दमे (=तस्य स्वकीये यागमण्डपरूपे गृहे) आ दधुः (=देवा अस्थापयन्) । पृश्न्याः पतरम् (=? अन्तरिक्षस्य पक्षिणम्) अक्षभिः (=नेत्रैर्ज्वालारूपैर्) उभे जनसी अनु चितयन्तं (=द्यावापृथिव्यौ प्रकाशयन्तम्) [एतादृशं] [तम् आदधुः] ॥

पाथो न पायुम् इति नो बोधातीतम् । अन्नवाचकः पाथःशब्दो हि पाथं इत्याद्युदात्तो भवति । पाथः पथो मार्गान् छन्दोवशाद्दीर्घत्वम् इति यत् केचित्पाश्चात्त्या वदन्ति तन्न युज्यते । दीर्घाभावेपि छन्दोनिर्वाहात् ॥

सायणस्त्विमामेवं व्याचष्टे । तं स्तुत्यतरं रजस्यन्तरिक्ष आ उक्षमाणं सर्वतः सि-

३. त्या महापराक्रमी [अग्नी]-ला देव भूतलावर द्यावापृथिवींचा दूत [ करून ] पाठविते झाले. प्रसिद्ध रथाप्रमाणें, देदीप्यमान वर्णाच्या [ अग्नीला पाठविते झाले ],– एकाद्या मित्राप्रमाणें स्तुत्य अग्नीला [ या ] लोकीं [ पाठविते झाले ].

४. आकाशांत वाढणारा [ आणि ] कांतिमान् असा जो [ अग्नि ] त्याला एकांतीं सुवर्णाला [ लपवून ठेविल्या]प्रमाणें त्याच्या स्वताहाच्या घरीं ठेविते झाले; अंतरिक्षांतील पक्षी आणि उभय लोकांला आपल्या डोळ्यांनीं प्रकाशविणारा असा जो [ अग्नि ] त्याला स्थापिते झाले.

3. Him of wonderful achievements the gods have sent on the surface of this world as the messenger of heaven and earth: [ have sent ] [ Agni ] of brilliant effulgence like a well-known chariot, [sent] unto human beings Agni the praiseworthy one like a friend.

4. Him who grows in the firmament and who is of brilliant splendor [ the gods ] have placed in his own house like gold in a secret place; the bird of the sky that brightens both the worlds with its eyes.

---

४. वर तिसऱ्या मंत्रांत देवांनीं अग्नीला पृथ्वीवर पाठविलें असें सांगितलें. त्यालाच अनुसरून पुढें म्हणतो, ‘ आकाशांत वैद्युतरूपानें वर्धमान आणि सोन्याप्रमाणें चकचकीत, आणि पृथ्वीरूप अंतरिक्षांत फिरणारा आणि आपल्या ज्वालारूप डोळ्यांनीं द्युलोक आणि पृथिवी या दोन्हीं लोकांस लकलकीत प्रकाशविणारा असा जो अग्नि त्याला देव, एकाद्या निर्जनस्थळीं सोनें ठेविल्याप्रमाणें, यागमंडपरूप त्याच्या गृहीं स्थापिते झाले.’

असा साधारण भावार्थ दिसतो; पण ‘ पाथो न पायुम् ’ ही जी उपमा मुळांत आहे त्याचा अर्थ समजत नाहीं त्यामुळें त्याचें भाषांतर केलें नाहीं. एकंदरींत हा मंत्र कठिण आहे.

**स होता विश्वं परि भूत्वध्वरं तमु हव्यैर्मनुष ऋञ्जते गिरा ।**
**हिरिशिप्रो वृधसानासु जर्भुरद्द्यौर्न स्तृभिश्चितयद्रोदसी अनु ५॥२०**

सः । होता । विश्वम् । परि । भूतु । अध्वरम् । तम् । ऊं इति ।
हव्यैः । मनुषः । ऋञ्जते । गिरा ।
हिरिऽशिप्रः । वृधसानासु । जर्भुरत् । द्यौः । न । स्तृऽभिः । चितयत् ।
रोदसी इति । अनु ॥ ५ ॥ २० ॥

**स नो रेवत्समिधानः स्वस्तये संददस्वान्रयिमस्मासु दीदिहि ।**
**आ नः कृणुष्व सुविताय रोदसी अग्ने हव्या मनुषो देव वीतये॥६॥**

सः । नः । रेवत् । सम्ऽइधानः । स्वस्तये । सम्ऽददस्वान् । रयिम् ।
अस्मासु । दीदिहि ।
आ । नः । कृणुष्व । सुविताय । रोदसी इति । अग्ने । हव्या । म-
नुषः । देव । वीतये ॥ ६ ॥

---

ञन्तं वृष्टिजलं रजसि पृथिव्यां वेद्यां घृतादिनासिच्यमानं वा । स्वे स्वकीये द्वारे विजने दमे यागगृह आदधुः । आदधते । कीदृशं तम् । चन्द्रमिव सुरुचम् । चन्द्रमिति हिरण्यनाम । हिरण्यमिव शोभनदीप्तिम् । पश्चात्प्रवृद्धावस्थायां पृश्न्याः पतरम् । द्युलोकस्यान्तरिक्षस्य गन्तारम् । अक्षभिः स्वकीयैर्ज्वालारूपैरवयवैश्चितयन्तं चेतयमानम् । पाथो न पायुम् । उदकमिव रक्षकम् । उभे जनसी सर्वस्य जनयित्र्यौ द्यावापृथिव्यावनु व्याप्तम् । भूम्यां होमाधारत्वेन स्थित्वा हविःप्रापणाय द्युलोकगामिनमिति भावः । एवंरूपमग्निमादधते । इति ॥

---

## भाषायाम्.

५. होता ( =होमसंपादकः ) सः [ अग्निर् ] विश्वम् अध्वरं परि भूतु ( =सर्वं यज्ञं संरक्षणाय परितो भवतु=परिवेष्टयतु ) । तम् उ (=तमेव ) मनुषः ( =मनुष्या ) हव्यैः गिरा ( =स्तुत्या ) [ च ] ऋञ्जते ( =प्रसाधयन्ति=स्ववशं कुर्वन्ति ) । हिरिशिप्रः ( = हिरण्योष्णीषो ) वृधसानासु जर्भुरत् ( =ओषधीः पुनःपुनर्दहन् ) [ स ] द्यौः स्तृभिर्न रोदसी अनु चितयत् ( =अन्तरिक्षं यथा नक्षत्रैर्ज्ञापितं भवति सप्रकाशं भवति तथा ज्वालाभिर्विस्फुलिङ्गैश्च द्यावापृथिव्यौ ज्ञापयति प्रकाशयति=सप्रकाशं करोति ) ॥

५. तो होता सर्व यज्ञाला वेष्टून राहो. त्यालाच मनुष्यें हव्यांनीं [ आणि ] स्तुतीनें वश करितात. सोन्याचें मंदिल घालणारा आणि ओषधींमध्यें विहार करणारा असा [ जो अग्नि तो ] नक्षत्रांनीं आकाश लकलकीत दिसतें त्याप्रमाणें द्यावापृथिवींला लकलकीत करितो.

5. May that invoker surround all sacrifice [ for protecting it ]. Him [all] men make their own with oblations [ and ] praise. Wearing a gold head-dress [ and ] crackling among the trees he brightens the heaven and the earth even as the sky [is bright] with the stars.

६. असा जो तूं तो हे अग्नी, आम्हांकडून पेटविला होत्साता आम्हांला कल्याणासाठीं धन देऊन आम्हांस संपत्ति मिळे अशा रीतीनें प्रकाश. हे देदीप्यमान अग्नी, आमच्या कल्याणासाठीं द्यावापृथिवींस [ मज ] मनुष्याचीं हव्यें भक्षण्याकरितां इकडे घेऊन ये.

6. Therefore, being kindled by us, give us for our good wealth, and shine thou, so that we may obtain prosperity. Bring hither for our weal Heaven and Earth that they may, o brilliant Agni, eat the offerings of [ this ] man.

---

५. 'वेष्टून राहो.' म्हणजे यज्ञाचें संरक्षण करण्याकरितां पाहरेकऱ्यासारिखा पाहरा करो. ऋ. १.१.४ पहा.

'लकलकीत करितो'=' चितयत्." म्हणजे आपल्या ज्वालांनीं आणि ठिणग्यांनीं असें सायण म्हणतात तें खरें दिसतें.

*a* 4

दा नो॑ अग्ने बृह॒तो दाः स॑ह॒स्रिणो॑ दु॒रो न वाज॒ं श्रुत्या॒ अपा॑ वृधि।
प्राची॒ द्यावा॑पृथि॒वी ब्रह्म॑णा कृधि॒ स्व॑र्ण॒ शु॒क्रमु॒षसो॒ वि दि॑द्युतुः ॥ ७ ॥

दाः । न॒ः । अ॒ग्ने॒ । बृ॒ह॒तः । दाः । स॒ह॒स्रिणः॑ । दु॒रः । न । वाज॑म् ।
श्रुत्यै॑ । अप॑ । वृ॒धि॒ ।
प्राची॒ इति॑ । द्यावा॑पृथि॒वी इति॑ । ब्रह्म॑णा । कृ॒धि॒ । स्वः॑ । न । शु॒क्रम् ।
उ॒षसः॑ । वि । दि॒द्यु॒तुः ॥ ७ ॥

६. स [ त्वम् ] ( अतः कारणात् त्वं ) समिधानः ( =अस्माभिः सम्यगिध्यमानः सन् ) नः स्वस्तये रेवत् संददस्वान् ( =अस्माकं क्षेमाय धनं प्रयच्छन् ) अस्मासु रयिं दीदिहि ( =अस्मासु मध्ये धनं दीप्यस्व=धनवद्दीप्यस्व=वयं धनं यथा लभेमहि तथा दीप्यस्व ) । [ अपिच ] सुविताय ( =सुहिताय=वयं सुहितं यथा लभेमहि तथा ) हे देव अग्ने ( =दीप्तिमन्नग्ने ), मनुषो हव्या वीतये ( =मनुष्यस्य मम हव्यानि भक्षयितुं ) रोदसी ( =द्यावापृथिव्यौ ) आ कृणुष्व ( =आभिमुख्यौ कुरु=अत्रानय ) ॥

संददस्वान् सम्यक्प्रयच्छन्निति सायणः । पाश्चात्त्यो ग्रासमन्नामकः पण्डितस्तु संददस्वान् संस्थापितः निर्गतः हततेजस्क इति ॥

## भाषायाम्.

७. हे अग्ने, नो बृहतो [ रयीन् ] दाः ( =अस्मभ्यं महान्ति धनानि देहि ) सहस्रिणो [ रयीन् ] दाः ( =सहस्रसंख्योपेतान् धनविशेषान् देहि ) । दुरो न वाजं श्रुत्यै अप वृधि ( =द्वाराणीव कीर्त्यै अन्नम् अपावृणु=अन्नपूर्णकोषस्य द्वाराण्युद्घाट्येव अन्नं यथाकामं लम्भय येन वयं कीर्तिमन्तः स्याम ) । [ अपि च ] ब्रह्मणा ( =अस्माकं स्तोत्रेण द्वारा ) द्यावापृथिवी ( =द्यावापृथिव्यौ ) प्राची कृधि (=प्राच्यौ=अनुकूले कुरु ) [ तथैव ] उषसः (=प्रातःकालाः ) शुक्रं स्वर्न (=तेजस्वी सूर्य इव ) [ प्राक्=अनुकूलं यथा तथा ] वि दिद्युतुः ( =विद्योतन्ताम् ) ॥

७. हे अग्नी, आम्हांला मोठ्या [ संपत्ति ] दे. सहस्र [ संपत्ति ] दे. [ आमची ] कीर्ति व्हावी म्हणून अन्न [आमच्या पुढें] दरवाजा उघडल्याप्रमाणें उघडें कर. [ आमच्या ] स्तोत्रेंकरून द्यावापृथिवी आम्हांस अनुकूळ कर. तेजस्वी सूर्याप्रमाणें उषा प्रकाशोत.

7. Give us, o Agni, great riches, give us a thousand riches. Open [to us] food like a door for the sake of renown. Through [our] hymn make Heaven and Earth favourable [ to us ]; may the Ushases shine like the brilliant sun, [ favourable unto us].

---

७. 'आम्हांला मोठ्या आणि हजारो संपत्ति दे आणि अन्न दे म्हणजे आमची कीर्ति होईल. आणि द्यावापृथिवी आणि उषा ह्या आम्हांस अनुकूळ अशा रीतीनें येतील असें कर.'

स इंधान उषसो राम्या अनु स्वर्ण दीदेदरुषेण भानुना ।
होत्राभिरग्निर्मनुषः स्वध्वरो राजा विशामतिथिश्चारुरायवे ॥८॥
सः । इधानः । उषसः । राम्याः । अनु । स्वः । न । दीदेत् । अरुषेण । भानुना ।
होत्राभिः । अग्निः । मनुषः । सुऽअध्वरः । राजा । विशाम् । अतिथिः । चारुः । आयवे ॥ ८ ॥

एवा नो अग्ने अमृतेषु पूर्व्य धीष्पीपाय बृहद्दिवेषु मानुषा ।
दुहाना धेनुर्वृजनेषु कारवे त्मना शतिनं पुरुरूपमिषणि ॥ ९ ॥
एव । नः । अग्ने । अमृतेषु । पूर्व्य । धीः । पीपाय । बृहत्ऽदिवेषु । मानुषा ।
दुहाना । धेनुः । वृजनेषु । कारवे । त्मना । शतिनम् । पुरुऽरूपम् । इषणि ॥ ९ ॥

---

## भाषायाम्.

८. स राम्या उषसः अनु इधानः (=रात्रीश्चोषसश्चानुसृत्य समिध्यमानः=प्रतिरजन्याः पश्चात् प्रत्युषसश्च पश्चात् समिद्धः) स्वर्न (=सूर्य इव) अरुषेण भानुना (=रोचमानेन तेजसा) दीदेत् (=दीप्यताम्)। मनुषो होत्राभिः (=मनुष्यस्य यज्ञैः) स्वध्वरः (=सुयज्ञो) विशां राजा (=जनानां प्रभुः) [एतादृशः] अग्निर् आयवे (=यजमानाय) चारुरतिथिः (=प्रियोतिथिर्) [भवति] ॥

९. बृहद्दिवेषु (=प्रभूतद्युतिषु) अमृतेषु (=मरणरहितेषु) [देवेषु मध्ये] हे पूर्व्य (=प्रथम) अग्ने, एवा नो मानुषा धीः पीपाय (=एवमस्माकं मनुष्यसंबन्धिनी स्तुतिः=मनुष्यैरस्माभिः कृतस्तुतिरूपा धेनुः पीना बभूव=पयःपीनधेनुवत् पयोदानसमर्था बभूव)। [सा] धेनुर् वृजनेषु (=यज्ञेषु) इषणि (=एषणायां सत्यां=पयोदोहने सति) त्मना (=आत्मनैव) कारवे (=स्तोत्रकर्त्रे) शतिनं (=शतसंख्योपेतं) पुरुरूपं (=गवाश्वादिरूपेण नानारूपं) [वाजं=धनं] दुहाना (=दोग्ध्री=दात्री) [भवतु] ॥

हे अमर्त्याग्ने, मर्त्यानामस्माकं स्तुत्या प्रीतः सन्नस्मभ्यमनेकसंख्यमनेकरूपं धनं देहीत्यर्थः ॥

८. तो [ अग्नि ] प्रत्येक रात्रीच्या आणि प्रत्येक उषेच्या मागून पेटविला होत्साता सूर्याप्रमाणें लकलकीत तेजानें प्रकाशो. मनुष्याच्या हवींनीं शोभनयज्ञ [ आणि] जनांचा राजा असा जो अग्नि तो उपासकाचा प्रिय अतिथि होय.

९. हे महादीप्तिमंत अमरांमध्यें प्रथम अग्नी, या प्रकारेंकरून आम्हां मनुष्यांची स्तुति तीच कोणीएक धेनु पूर्ण झाली आहे. ती धेनु यज्ञांमध्यें दोहन होतांच उपासकासाठीं आपोआप शेकडो प्रकारचें आणि अनेकरूपी [अन्न] देओ.

8. He, kindled after every night and every Ushas—may he shine like the sun with brilliant splendor. Agni, the lord of good sacrifices through the offerings of man, and king of the people, is the beloved guest of the worshipper.

9. Thus o Agni, first among the resplendent immortals, has our human worship been fattened; may it [ like a ] milch-cow being pressed yield of its own accord in the sacrifices, for the sake of the praiser, a hundred-fold food of many forms.

---

८. 'प्रत्येक रात्रीच्या' इ०='राम्याः' इ०. म्हणजे रात्र आणि उषा ह्या प्रत्यहीं निघून जातांच अग्नीला प्रतिदिवसीं उषःकाळ होतांच पेटवून देवांस हवि अर्पण करीत असत.

९. यांत स्तोत्यानें केलेली जी स्तुतिरूप आणि कर्मरूप सेवा, तिला धेनूचें रूप दिलें आहे. आणि कवि म्हणतो, या स्तुतिरूप गाईला आम्हीं पुष्ट केलें आहे, तर ती आम्हांस अनेक प्रकारचें अन्नादिक धन देओ.

वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति ।
अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरम् ॥ १० ॥

वयम् । अग्ने । अर्वता । वा । सुऽवीर्यम् । ब्रह्मणा । वा । चितयेम । जनान् । अति ।
अस्माकम् । द्युम्नम् । अधि । पञ्च । कृष्टिषु । उच्चा । स्वः । न । शुशुचीत । दुस्तरम् ॥ १० ॥

स नो बोधि सहस्य प्रशंस्यो यस्मिन्त्सुजाता इषयन्त सूरयः ।
यमग्ने यज्ञमुपयन्ति वाजिनो नित्ये तोके दीदिवांसं स्वे दमे ॥ ११ ॥

सः । नः । बोधि । सहस्य । प्रऽशंस्यः । यस्मिन् । सुऽजाताः । इषयन्त । सूरयः ।
यम् । अग्ने । यज्ञम् । उपऽयन्ति । वाजिनः । नित्ये । तोके । दीदिऽवांसम् । स्वे । दमे ॥ ११ ॥

---

## भाषायाम्.

१०. हे अग्ने, वयम् अर्वता (=अश्वेन=त्वया दत्तेनाश्वसमूहेन) सुवीर्यं वा (=सुवीर्येण वा=शोभनवीर्योपेतैः पुत्रपौत्रादिभिश्च) ब्रह्मणा वा (=अस्माकं श्रेष्ठेन स्तोत्रेण च) जनान् अति चितयेम (=इतरजनान् अतिक्रम्य ज्ञायेमहि)। अस्माकं द्युम्नं (=धनं) दुस्तरम् (=अन्यैरप्राप्यं सत्) अधि पञ्च कृष्टिषु (=पञ्च जनेषु मध्ये) स्वर्ण उच्चा शुशुचीत (=सूर्य इव उच्चैर्भृशं दीप्यताम्) ॥

अधिः सप्तमीद्योतनार्थः ॥

११. हे सहस्य (=बलवन्नग्ने), यस्मिन् [त्वयि] सुजाताः सूरयः (=सुजन्मानो यजमाना) इषयन्त (=प्राप्तुमिच्छन्ति) [अपि च] हे अग्ने, यज्ञं (=यज्ञियं) यं [त्वां] वाजिन उपयन्ति (=उपासका हविर्भिः सेवन्ते)—नित्ये तोके [इव] स्वे दमे दीदिवांसम् (=औरसस्य पुत्रस्य गृह इव स्वकीये सवनस्थानरूपे गृहे दीप्यमानं) [त्वाम् उपयन्ति] स प्रशंस्यः (=प्रकर्षेण स्तवनीयस्त्वं) नः बोधि (=अस्माकं भव) ॥

१०. हे अग्नी, आम्ही अश्वांच्या योगानें आणि उत्तम वीर्यवान् संपत्तीच्या योगानें आणि स्तोत्राच्या योगानें इतर जनांपेक्षां अधिक आहों अशी आमची प्रसिद्धि होओ. आमचें वैभव पंच जनांमध्यें सूर्याप्रमाणें अप्राप्य होत्सातें उच्चस्थलीं प्रकाशो.

10. May we, o Agni, through horses and through brave sons and through piety be known beyond [ other ] people. May our prosperity, unattainable like the sun, shine high among the five races.

११. हे प्रबळ [ अग्नी], ज्या तुझी प्राप्ति होण्याविषयीं सुजात उपासक इच्छा करितात, [आणि] हे अग्नी, ज्या तुज पूज्याला यजमानलोक हवि देऊन भजतात—औरस पुत्राच्या घरीं प्रकाशल्याप्रमाणें आपल्या स्वताहाच्या घरीं प्रकाशणाऱ्या तुजला [ भजतात]—तो अत्यंत स्तुत्य तूं आमचा हो.

11. O Victorious Agni, be thou ours, thou the praiseworthy one, to reach whom well born worshippers strive, whom pious men serve with oblations, thou worthy of oblations, thou who shinest in thine own home as in the house of thine own son.

---

१०. 'स्तोत्राच्या योगानें'=' ब्रह्मणा.' म्हणजे आम्ही इतर जनांपेक्षां अधिक भक्तिमान् आहों अशी आमची ख्याति होओ.

११. 'आमचा हो'=' नः बोधि.' सू. ७६ मं. ४ आणि त्याजवरील टीप पहा.

'आपल्या स्वताहाच्या घरीं'=' स्वे दमे.' अग्नीचें ' स्वताहाचें घर ' म्हणजे जेथें त्याला पेटवितात आणि पूजितात तें स्थळ, अथवा ती खोली. जसा एखादा बाप वेगळा राहत असून आपल्या औरस पुत्राचे घरीं जाऊन तेथें प्रीतीनें विराजमान होत असतो ( म्हणजे आदरानें दिलेल्या आसनावर बसून पूजादिक ग्रहण करितो ) त्याप्रमाणें अग्नि हा उपासकाला आपला पुत्र मानून त्याच्या घरीं स्वीकारिलेल्या स्थानीं विराजत असतो.

'औरस पुत्राचे घरीं'='नित्ये तोके.' 'तोके' या सप्तमीचा जो हा येथें अर्थ केला आहे, तो वेदांत केव्हां केव्हां येत असतो, व याचीं उदाहरणें पूर्वींहि आलीं आहेत.

उभयांसो जातवेदः स्याम ते स्तोतारों अग्ने सूरयंश्च शर्मणि ।
वस्वों रायः पुरुश्चन्द्रस्य भूयंसः प्रजावंतः स्वपत्यस्यं शग्धि नः
॥ १२ ॥

उभयासः । जातऽवेदः । स्याम । ते । स्तोतारः । अग्ने । सूरयः । च । शर्मणि ।
वस्वः । रायः । पुरुऽचन्द्रस्यं । भूयंसः । प्रजाऽवंतः । सुऽअपत्यस्यं । शग्धि । नः ॥ १२ ॥

ये स्तोतृभ्यो गोअंग्रामश्वंपेशसमग्ने रातिमुपसृजन्ति सूरयः ।
अस्माञ्च तांश्च प्र हि नेषि वस्य आ बृहद्वंदेम विदथें सुवीराः ॥
॥ १३ ॥ २१ ॥

ये । स्तोतृऽभ्यः । गोऽअंग्राम् । अश्वंऽपेशसम् । अग्ने । रातिम् । उपऽसृजन्ति । सूरयः ।
अस्मान् । च । तान् । च । प्र । हि । नेषिं । वस्यः । आ । बृहत् । वदेम । विदथें । सुऽवीराः ॥ १३ ॥ २१ ॥

---

## भाषायाम्.

१२. हे जातवेदः (=जातानां सर्वेषां वेदितर्) अग्ने, ते (=तव) स्तोतारः (=स्तोत्रकृतः) सूरयश्च (=यजमाना) [इत्येते] उभयासः (=उभये) [वयं] शर्मणि स्याम (=सुखे भवेम)। वस्वः (=श्रेष्ठस्य) पुरुश्चन्द्रस्य (=अतिशयेनाह्लादकस्य) भूयसः (=प्रभूतस्य) प्रजावतः (=प्रजायुक्तस्य) स्वपत्यस्य (=सुपुत्रस्य) रायः (=धनस्य=एतादृशं धनं) नः (=अस्मभ्यं) शग्धि (=देहि)॥

प्रजावतः भृत्याद्युपेतस्य स्वपत्यस्य शोभनपुत्रस्येति सायणः ॥

१३. हे अग्ने, ये सूरयः (=यजमानाः) स्तोतृभ्यो (=अस्मादृग्भ्यो) गोअग्रां (=गावोऽग्रगामिन्यो यस्यास्तादृशीं=गोप्रमुखाम्) अश्वपेशसम् (=अश्वप्राधान्यां) रातिम् उपसृजन्ति (=दक्षिणां ददते) तांश्च [यजमानान्] अस्मांश्च [स्तोतॄन्] वस्य आ प्र हि नेषि (=श्रेष्ठं सुखं स्वर्गादिकं प्रति नय)। सुवीराः (=सुष्ठुवीर्योपेतपुत्रपौत्रादिसमवेता) [वयं] विदथे (=यज्ञे) बृहत् [स्तोत्रं] वदेम (=यथा वदेम तथा कुरु)॥

१२. हे सर्वज्ञ अग्नी, तुझे स्तोते आणि यजमान असे आम्ही उभयतां सुखी असूं असें कर. [ आणि ] कल्याणकारक, अतिशय आल्हादकारक, विपुळ, प्रजायुक्त आणि चांगल्या अपत्यांनीं भरलेली संपत्ति आम्हांला दे.

१३. हे अग्नी, जे यजमान स्तोत्यांला गाईंनीं भरलेली आणि अश्वाढ्य दक्षिणा देतात, त्यांला आणि त्याप्रमाणें आम्हांलाहि तूं उत्तम कल्याणाप्रत ने. उत्तम वीर्यवान् पुत्रांस घेऊन आम्ही यज्ञांत मोठें स्तोत्र गाऊं असें कर.

12. May we both, thy praisers and thy sacrificers, be happy, o all-knowing Agni! Give us prosperity that is wholesome, exceedingly delightful, plentiful, accompanied by children, and full of good sons.

13. Lead, o Agni, both those sacrificers who give to the poets a gift conspicuous by cows and excellent horses, both these and us the poets, to the highest good; may we, accompanied by sons who are excellent heroes, chant a great hymn in the sacrifice.

---

१२. 'प्रजायुक्त'='प्रजावतः'. म्हणजे चाकर नोकर इत्यादिक जींत आहेत अशी, असें सायण म्हणतात.

१३. पूर्वीच्या सूक्ताच्या शेवटच्या मंत्रावरची टीप पहा.

## सूक्तम् ३–१९४.

गृत्समद ऋषिः। आप्रीसूक्तमिदम्। प्रथमा समिद्धाग्निदेवताका। द्वितीया नराशंसदेवताका। तृतीया इड्नामकाग्निदेवताका। चतुर्थ्या बर्हिर्देवता। पञ्चम्या द्वारो देव्यः। षष्ठ्या उषासानक्तौ। सप्तम्या दैव्यौ होतारौ। अष्टम्यास्तिस्रो देव्यः। नवम्यास्त्वष्टा। दशम्या वनस्पतिः। एकादश्याः स्वाहा॥ त्रिष्टुप् छन्दः। सप्तमी तु जगती॥

**समिद्धो अग्निर्निहितः पृथिव्यां प्रत्यङ् विश्वानि भुवनान्यस्थात्।**
**होता पावकः प्रदिवः सुमेधा देवो देवान्यजत्वग्निरर्हन्॥ १॥**

सम्ऽइद्धः। अग्निः। निऽहितः। पृथिव्याम्। प्रत्यङ्। विश्वानि। भुवनानि। अस्थात्।
होता। पावकः। प्रऽदिवः। सुऽमेधाः। देवः। देवान्। यजतु। अग्निः। अर्हन्॥ १॥

**नराशंसः प्रति धामान्यञ्जन् तिस्रो दिवः प्रति मह्ना स्वर्चिः।**
**घृतप्रुषा मनसा हव्यमुन्दन्मूर्धन्यज्ञस्य समनक्तु देवान्॥ २॥**

नराशंसः। प्रति। धामानि। अञ्जन्। तिस्रः। दिवः। प्रति। मह्ना। सुऽअर्चिः।
घृतऽप्रुषा। मनसा। हव्यम्। उन्दन्। मूर्धन्। यज्ञस्य। सम्। अनक्तु। देवान्॥ २॥

---

## भाषायाम्.

१. पृथिव्यां निहितः (=वेदिलक्षणायां भूमौ स्थापितः) समिद्धोऽग्निः (=सम्यग्दीप्त एतन्नामकोऽग्निर्) विश्वानि भुवनानि प्रत्यङ् अस्थात् (=सर्वाणि भूतजातानि=तेषाम् अभिमुखः संस्तिष्ठति)। होता (=देवानामाह्वाता) पावकः (=शोधकः) प्रदिवः (=पुरातनः) सुमेधाः (=शोभनप्रज्ञो) देवः (=द्योतमानः) अर्हन् (=यागयोग्यः) [एतादृशोऽयम्] अग्निर्देवान् यजतु (=पूजयतु)॥

२. स्वर्चिः (=शोभनज्वालः) प्रति धामानि तिस्रो दिवः प्रति च मह्ना अञ्जन् (=त्रीणि स्वकीयानि स्थानानि प्रत्येकं त्रींश्च द्युलोकान् प्रत्येकं व्यक्तीकुर्वन् अलं-

## सूक्त ३–१९४.

ऋषि—**गृत्समद**. देवता—**आप्रिय अग्नि** ( म्हणजे हें सूक्त आप्रीसूक्त आहे). देवता आहेत त्या ह्याः—१ **समिद्ध अग्नि**; २ **नराशंस**; ३ **इड्**; ४ **बर्हिः**; ५ **द्वारो देवी**; ६ **उषा आणि रात्र**; ७ **दोन दिव्य होते**; ८ **सरस्वती, इळा आणि भारती** ह्या तिघी देवी; ९ **त्वष्टा**; १० **वनस्पति** (म्ह० यूप); ११ **स्वाहा** ). वृत्त—सातवी ऋचा जगती आहे, ती शिवाय करून सर्व ऋचा त्रिष्टुप् छंदाच्या आहेत.

१. पृथिवीवर स्थापिलेला **समिद्ध** अग्नि सकळ भूतांसंमुख उभा राहिला आहे. तो देवांला बोलाविणारा, शुद्धिकारक, पुरातन, सुप्रज्ञ, देदीप्यमान [आणि] [याग]योग्य अग्नि देवांला पूजो.

२. सुज्वाल **नराशंस** आपल्या मोठेपणानें आपलीं धामें आणि तीन द्युलोक शोभविणारा होत्साता, घृत गळविणाऱ्या स्तोत्रानें हवि भिजवून यज्ञाच्या आरंभीं देवांला अलंकृत करो.

## HYMN 3–194.

To *Âpriya Agni* (i. e. V. 1 to *Samiddha Agni*; V. 2 to *Narâs'amsa*; V. 3 to *Iḍ*; V. 4 to *Barhis*; V. 5 to the *Doors*; V. 6 to *Ushas* and *Night*; V. 7 to the *two divine invokers*; V. 8 to the three Goddesses, *Sarasvatî*, *Iḷâ* and *Bhâratî*; V. 9 to *Tvashṭâ*; V. 10 to the *Vanaspati* or sacrificial post; and V. 11 to *Svâhâ*). Metre *Trishṭubh*, except in verse 7 where it is *Jagatî*.

1. [*Well*]-*kindled* Agni, established on the earth, is overlooking all beings. Invoking, purifying, ancient, wise, resplendent [and] worthy Agni—may he worship the gods!

2. May *Narâs'ṁnsa* of excellent splendor, adorning with his greatness each of his seats and the three heavens, sprinkle the oblation with a hymn that shall make gat showers to rain, honour the gods at the commencement of the sacrifice.

---

१. हें एक आप्रीसूक्त आहे. सू. १८८ मं. १. पहा.

२. सू. १३ मं. ३ पहा. ‘ आपलीं धामें ’=‘ धामानि.’ म्हणजे

ईळितो अग्ने मनसा नो अर्हन्देवान्यक्षि मानुषात्पूर्वो अद्य ।
स आ वह मरुतां शर्धो अच्युतमिन्द्रं नरो बर्हिषदं यजध्वम् ३

ईळितः । अग्ने । मनसा । नः । अर्हन् । देवान् । यक्षि । मानुषात् । पूर्वः । अद्य ।
सः । आ । वह । मरुताम् । शर्धः । अच्युतम् । इन्द्रम् । नरः । बर्हिऽसदम् । यजध्वम् ॥ ३ ॥

देवं बर्हिर्वर्धमानं सुवीरं स्तीर्णं राये सुभरं वेद्यस्याम् ।
घृतेनाक्तं वसवः सीदतेदं विश्वे देवा आदित्या यज्ञियासः ॥४॥

देव । बर्हिः। वर्धमानम् । सुऽवीरम् । स्तीर्णम् । राये । सुऽभरम् । वेदी इति । अस्याम् ।
घृतेन । अक्तम् । वसवः । सीदत । इदम् । विश्वे । देवाः । आदित्याः । यज्ञियासः ॥ ४ ॥

---

कुर्वन् ) घृतप्रुषा ( =घृतवन्मेघवृष्टेः सेचनकारकेण ) मनसा ( =स्तोत्रेण ) हव्यम् उन्दन् ( =हविः क्लेदयन् स्निग्धीकुर्वन् सन् ) यज्ञस्य मूर्धन् ( =यागस्यादौ ) देवान् सम् अनक्तु ( =व्यक्तीकरोतु=पूजया अलंकरोतु ) ॥

---

## भाषायाम्.

३. हे अग्ने, अर्हन् ( =यागयोग्यस् ) [ तथा च ] मानुषात् ( =मनुष्यसंबधिनो होतुः ) पूर्वः ( =पूर्वभूतस् ) [ त्वं ] नो मनसा ईळितः ( =अस्माकं स्तोत्रेण स्तुतः सन् ) अद्य देवान् यक्षि ( =अस्मिन् दिने देवान् पूजय ) । सः ( =पूर्वोक्तप्रकारस् ) [ त्वम् ] अच्युतं ( =स्थिरं ) मरुतां शर्धः (=मारुतं गणम्) आ वह (=अत्रानय) । हे नरः (=ऋत्विजः), बर्हिषदं (=कुशेषु निषण्णम्) इन्द्रं यजध्वं (=पूजयत)॥

